॥अथमुहूर्तमार्तंडसटीकप्रारंभः॥
॥पत्रसंख्या१९२॥

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY

॥श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥मार्त्तंडोवनुवाचेनःपैर्दोर्जोद्यतमोहरः॥इत्तवद्दतनुःसेव्यो भीष्टदेविश्वलोचनः॥अर्थद्वयवाची॥तत्रप्रथमंसूर्यपक्षे॥मार्त्तंडःश्रीसूर्यःनोस्माकंवाचंत नोतुरक्षतु॥किंभूतःमार्तंडः॥इत्तवद्दतनुः॥इत्तेमंडलेवद्धानतुर्येनसतथा॥तथाचस्मृतौ॥सशं खचक्रंविमंडलेस्थितंकुंडलोद्यंकांतमनंतमच्युतं॥इत्यादि॥श्रुतिरपि॥यएषएतस्मिन्म ंडलेपुरुषःसोमिरित्यादि॥पुनःकिंलक्षणः॥पादैःकिरणैःजाद्यतमोहरः॥जाड्यंपातकं॥ शीतंवातमः अंधकारःतद्धरतितथा॥पुनःकिंभूतःसेव्यःसेवितुंयोग्यः॥अभीष्टफलदात्तला त्॥पुनःकिंलक्षणः॥अभीष्टदःसेवितः सन्नभीष्टदायीस्वर्थः॥पुनःकिंभूतः॥विश्व...लो चनः॥प्रकाशकत्वात्॥विश्वंलोच्यतेयेनेतिविश्वलोचनः॥लोकचक्षुर्ग्रहेश्वरइत्यादिस्मृत्यंतरे उक्तत्वात्॥प्रकाशकत्वात्॥अथयंथपक्षे॥मार्त्तंडोमुहूर्त्तमार्त्तंडः॥नःवाचेअवतु॥किंलक्ष ण्म १

णः॥इत्तवद्दतनुः॥इत्तानिप्रहर्षिणीग्रहैर्लवि र्कीर्तितानितैर्निबद्धातनुर्यस्यसतथा॥पुनःक थंभूतः॥पादैर्जोद्यतमोहरः॥पादैरिंत्तचरणैःजाड्यंमूर्खत्वंतदेवतमःतद्धरतीतितथा॥पु.सेव्यः निरंतरंपठनीयइत्यर्थः॥पुनःअभीष्टदःयथोक्तमुहूर्त्तेकृत्यकरणादभीष्टकारी॥पुनः०विश्वलो चनःसमयप्रकाशकत्वात्॥कुर्वेमुहूर्त्तमार्त्तंडरिष्टकांमार्त्तंडवल्लभां॥इयमाकल्पमेतेनदीक्ष्या हिप्तास्यवेश्मसु॥२॥इहशास्त्रेनावतसंबंधाभिधेयप्रयोजनान्युच्यंते॥आद्यत्वादिविनि र्गतमिदंवेदांगमितिसंबंधः॥उक्तंचनारदमुनिनास्वसंहितायां॥वेदस्यनिर्मलंचक्षुर्ज्योतिः शास्त्रमनुत्तमं॥अस्यशास्त्रस्यसंबंधोवेदांगमितिधातनूनि॥अत्रापिउक्तं॥पूर्वंवाक्यार्थमा दायग्रंथोयंरचितोलघुरितिस्याज्यनक्षत्रायर्क्षलग्नगोचरगर्भाधानादिसंस्कारविवाहा ध्यानयात्रामिश्रानध्यायप्रश्नीयग्रहगोचरसंक्रांतिकथनमभिधेयं॥तथाचना

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

रदः॥अभिधेयंचजगतः शुभाशुभनिरूपणमिति॥अस्यप्रयोजनंमुहूर्त्तैर्नीनाकार्यसाधनं
अस्यसम्यग्ज्ञानान्मोक्षावाप्तिरितिवा॥किमेभिरुक्तैरित्युच्यते॥नृणांसंबंधाभिधेयप्र
योजनकथनान्नशास्त्रेप्रवृत्तिर्जायते॥उक्तंच॥सिद्धिश्रोतृप्रवृत्तीनांसंबंधकथनाद्यतः॥त
स्मात्सर्वेषुशास्त्रेषुसंबंधःपूर्वमुच्यते॥किमेतावताभिधेयंस्यादितिएतत्तुकेनचित्॥यदि
नप्रोच्यतेतस्मैफलंमूल्यंतुनइच्छेत्॥सर्वस्यैवहिशास्त्रस्यकर्मणोवापिकस्यचित्॥यावत्प्र
योजनंनोक्तंतावत्तेननप्रवर्त्ततइति॥इहशास्त्रेकस्याधिकारइतिप्रोच्यते॥द्विजस्यैववेदं
गलात्॥यतःषडंगोवेदोद्विजैरध्ययनीयोज्ञातव्यश्च॥तथाचोक्तंभास्करीयसिद्धांतशिरो
मणौ॥तस्माद्द्विजैरध्ययनीयमेतत्सपुण्यंरहस्यंपरमंचतत्त्वं॥योज्योतिषंवेत्तिनरःससम्य ग्म
क्धर्मार्थमोक्षान्लभतेयशश्चेति॥शिष्टास्तावच्छास्त्रारंभेसर्वारंभाहिदोषेनदूषेना २

शिरिवा दनाप्रतिपाद्येनसर्वारंभेघंतरायशमनोसत्यांधर्मेणपापमपनुदतिइतिश्रुति
सिद्धंप्रयोजनमास्तायस्त्वत्तिनरंद्रोद्रष्टुश्चाद्रतिश्रुतिलिंगाच्चग्रंथस्यनिःप्रत्यूहपरिस
माप्तयेमंगलमाचरंति॥तस्मान्माध्यंदिनीयोब्राह्मणोनारायणोनारायणकृपावाप्तम
निर्ज्योतिःशास्त्रसंहितास्कंधंचिकीर्षुरनेकप्रत्यूहोपशांतयेऽभिमतदेवतानमस्कार
लक्षणंमंगलपूर्वकंग्रंथकरणप्रतिज्ञांप्रहर्षिण्याह॥सिंदूरेत्यस्मिन्नभिधेयत्वऋंबांर
श्रीविघ्नंवियतिचरानगुरून्प्रणम्य॥वक्ष्यर्थंविबुधमुदेलघुंमुहूर्त्तमार्त्तंडसुगममहंत
नोमिसिध्ये॥१॥सिंदूरेणत्वत्सिनंशोभायमानंरभेऽवऋंगजाननं॥अंबांसरस्वतीं॥श्री
विघ्नंप्रसिद्ध॥वियतिचरानग्रहान्॥गुरून्निजगुरून्शास्त्रोपदेष्टॄन्प्रणम्यनमस्कृत्याऽहंनारा
यणोमुहूर्त्तमार्त्तंडनामग्रंथंतनोमिविस्तारयामि॥किमर्थंसिध्येकार्यसाधनाय॥पुनःकिमर्थं

विबुधमुदेपंडितहर्षोय॥हर्षणकारणंविशेषणद्वारेणाह॥किंलक्षणंमुहूर्त्तमा
र्तंडंलघु॥अतिशयेनाल्पं।अल्पेवक्वार्थाभावइंकांविशेषणद्वारेणपरिहरति॥
पुनःकिंलक्षणंवक्वर्थेअर्थवहुलं॥अल्पग्रंथेवक्वर्थेउदाहरणंकांपरिहरति।उ॰
किंलक्षणंसुगमंप्रकटार्थं॥अथनानामुहूर्त्तानविचक्षुस्तावछुभेकर्मणिस्याज्यंत्रि
भिःशार्दूलविक्रीडितेनाह॥ ॥यामार्द्धकुलिकंदिनर्द्धिमवमंपूर्वेदलंपरिघंवि
ष्टिर्व्यतिपातसंक्रमगणंगंडांतमेकार्गलं॥रुद्रानंगचतुर्दिनंरविशशिक्रांत्योः
समत्वंस्वलांहोरंगत्रिदिनार्द्धकेक्षयदिनंपित्र्यौर्जनन्यार्त्तवं॥ ॥२॥ ॥मासाद्यैज
न्मसंभवंग्रहणभंचेंद्रायुधंदुःक्षणंज्येष्ठपूर्वभवस्यपापयुगितैष्यर्क्षाणिविरुन्धभं।
पुनाख्याधिकमासकौयुतिभविष्याश्ववगंडांतिभत्र्यंशकाश्चौपकरसद्युद्वर्ज

घटिकाभानांविपाख्याघटीः॥३॥लग्नापंचकपापवर्गमशुभंचेंद्वर्कारिष्टगंजन्मे
शोज्यसिनास्तमंगशशिनोःक्रूरेक्षवांकर्त्तरीं॥रिष्टंगोचरसंभवंग्रहजनिप्रांतोद्भवंस्व
र्तकंदुश्चिन्हानिमनोविभंगमपिचव्याधिंशुभेसंत्यजेत्॥४॥ ॥यामार्द्धादिकंशुभक
र्मणिसंत्यजेत्।इत्यंतिमश्लोकेनान्वयः।यामार्द्धकुलिकौवक्ष्यमाणलक्षणौ।दिनर्द्धिनी
मयत्रतिथिःसूर्योदयात्षष्टिघटिकाभवतिसैवान्यस्मिन्दिनेदृश्यतेसादिनर्द्धिः।अव
मःप्रसिद्धः।परिघशब्दश्चपरियोगस्यपूर्वार्द्धविष्टिर्भद्राचवक्ष्यमाणावैधृतिर्योगः
पातोव्यतीपातः।संक्रमगणंसूर्यर्क्षांशसंक्रमणंसर्वेषांग्रहाणांसंक्रमणेस्वा
स्वघटिकाश्चयेवक्ष्यमाणाः।गंडांतंत्रिविधंवक्ष्यमाणं।एकार्गलोवक्ष्यमाणःरुद्रा
नंगचतुर्दिनंरुद्रचतुर्दश्यादिप्रतिपदांतंचंद्रस्यक्षीण त्वात्॥कैश्चिद्वादश्यादि

सार्द्धदिनपंचकंसजेत्॥कृष्णेचांत्यत्रिकंकैश्चित्॥तेषुमध्यमोयंपक्षोंगीकृतः॥कृष्णा
नेगचतुर्दिनमिति॥रविशशिक्रांत्योःसमत्वंसूर्यचंद्रमसोःक्रांतिसाम्यंगणितगम्यं
तथापितस्यावलोकनंकस्मिन्दिनेकर्त्तव्यमित्यत्रेवक्ष्यतिखलांहोरंपापग्रहहो
रं॥एत्रिदिनार्धके॥दिनार्द्धेरात्र्यर्द्धेच॥उक्तंग्रंथांतरे॥मुहूर्त्तकालोनिवसतिमहानि
शायांचदिनरळेयस्मात्॥दशापूर्वेदशापरतस्तस्माद्रात्र्यांनिचपठ्यानीति॥क्षयदि
नेपित्रोःमाताचपिताचपितरौतयोःपित्रोःश्राद्धदिनमित्यर्थः॥जनन्या र्त्रवं।मातु
रजस्वळात्वं।मासाद्यंजनिसंभवं॥जनिरुत्पत्तिः॥तत्रसंभवोयस्यैवंविधंमासाद्यमु
सप्रभृति॥जन्ममासतिथिनक्षत्रादि॥ग्रहणभंग्रहणनक्षत्रं।चंद्रायुधंवक्ष्यमाणं
डुःक्षणोऽर्द्धहूर्त्तोवक्ष्यमाणलं॥ज्येष्ठंपूर्वभवस्यप्रथमजातापत्यस्यज्येष्ठं॥ज्येष्ठमासं

पापयुगितेष्वर्क्षाणि।पापाःपापग्रहाःवक्ष्यमाणाःतेषामन्यतमस्ययुक्तंयुक्तं।इतंगतं
एष्यंपुरस्थितं।एतानिऋक्षाणी।विद्धंचभंविद्धनक्षत्रंवक्ष्यमाणनक्षत्रं।युग्याख्यधि
कमासकौ।क्षयमासंधिमासौवक्ष्यमाणलक्षणौ॥पंचभिर्विप्राश्चवर्गेऽतिभुक्त्यंशका
र्थंपंकरसर्त्तुरूपूर्वघटिकाःविष्कंभः।व्याघातः।शूलः।वज्रः।गंडःप्रति
द्धः।अति।अतिगंडः।एषुयोगेषुक्रमेणव्यंकार्थीकरसर्त्तुसंख्याकाःपूर्वघटिकाःप्रथ
मघटिकाः॥तद्यथा॥विष्कंभेनिस्त्रिः।व्याघातेंकाःनव।शूलेऽर्थाः५पंच।वज्रेऽंकाः
नव।गंडेरसाःषट्॥अतिगंडेऋतवःपठिति॥भानांविद्याख्यायदीः॥भानांअश्विन्या
दीनांनक्षत्राणांविद्याख्याःघट्यःवक्ष्यमाणलक्षणाः॥लक्षपंचकपापवर्गः।एतत्सर्वं
वक्ष्यमाणं॥अशुभंचंद्रंवक्ष्यमाणगोचरप्रकरणेवेद्यं।दशारिष्टंकंजातकशास्त्रगम्यं

जन्मेशेज्यसितास्तं। जन्मेशेरविरिष्टगामी॥इज्योगुरुः।सितःशुक्रःएषांअस्तमनंरवि
नुमकिरणत्वं।अंगनाशिनोःक्रूरेऽहनिकर्त्तरी।अंगंलग्नं।नशीचंद्रःतयोःक्रूरेऽह
क्रूरग्रहजनितांकर्त्तरींवक्ष्यमाणेलक्षणां॥रिष्टंगोचरसंभवं।गोचरेदुष्टग्रहाधिक
गोचरेवक्ष्यमाणं।ग्रहजनिप्रांतोऽहंसूतकं।ग्रहेग्रहणं।जनिर्जन्म।प्रांतोमरण
एभ्यःउद्भूतंसूतकं।ग्रहणसूतकं।जन्मसूतकं।मृतिसूतकमिति।तेषुग्रहणसूत
कंवक्ष्यमाणं।उश्चिकानिकार्योरंभसमयेक्षनडुर्वचनश्रवणादीनि॥मनोविभंगं
अंतःकरणंचनेत्रं।व्याधिर्ज्वरस्तमपि॥रोगःपाप्माज्वरोव्याधिर्विकारोदुःखमाम
यमितिवाग्भटः॥ज्वरितस्यमंगलंनकुर्यादित्यर्थः॥तथाचोक्तं॥ज्योतिःप्रकाशे॥ एम
जन्माधिपविलग्नेशचंद्रभार्गवमित्रिणां॥विरश्मिस्वंजन्ममासोजन्मभंजन्मवासर ५

दुर्निमित्तंमनोभंगःक्षयमासाधिमासकौ॥मृतजातकयोश्चैवसूतकंग्रहणस्यच।ज्व
रोत्पत्तिरजोमातुःपित्रोःक्षयदिनंतथा॥गंडांतत्रितयंकालःसंधिर्भस्यतिथेस्तनोः॥
क्रांतिपातोव्यतीपातोवैधृतिःपरिघार्धकं॥भानोःसंक्रांतिभोगश्चकुलिकश्चार्धयाम
कः॥क्रूरैर्मुक्तंयुतंभोग्यंसरहुशिखिधूमितं।धिस्म्यंग्रहणभंपापैर्विद्धंसौम्यश्चपादत
।विष्टिःक्रूरयुतेलग्नेशेरिपुमृत्युगः॥जन्मनोदुश्चिताश्चंद्रेलग्नस्थोनिधनोपगः।
जन्मभाज्जन्मलग्नाच्चलग्नलग्नेशकाष्टमौ॥पापयोर्मध्यगेलग्नेक्षीणेंदुःक्रूरवीक्षक
क्रूरवारेपापहोराऽष्टयोगाग्रहोद्भवाः॥तिथिवृद्धिक्षयोभानांनाडिकाविषसंज्ञकाः॥
एतेदोषाःसमाख्याताःशुभकर्मणिगर्हिताः॥दशारिष्टोद्भवाश्चान्येगोचरेत्याजितथा
परे॥लग्नेकार्गलचंद्रास्त्रिकालवेलाश्चपंचकं॥मृत्युयोगोपग्रहाद्याःस्वस्वदेशेतुनि

दितइति॥तथाचयज्ञमानंडे॥विष्टिंचेंद्रुष्टमंदग्धंव्यतीपातंचवैधृतं॥अन्यां
श्चवदुशेषांश्चसिद्धियोगःशमंनयेत्॥२॥रुक्चामृत्युयोगाश्चनिंद्यंदग्धंतथैव
च॥चंद्रेशुभेक्षयंयांतिदक्षावज्रहताइव॥२॥भृगुः॥एकोप्यमृतयोगोयंसक
लंदोषसंचयं॥विनाशयतिघर्मोंशुर्यथादित्येतिमिरंयथा॥३॥लल्लः॥वारर्क्षतिथि
योगैश्चयात्रामिवविवर्जयेत्॥विवाहादीनिकुर्वीतगर्गादीनामिदंवचः॥४॥उक्ता
तेयमघटेचकाणेचरुक्चेतथा॥तिथौदग्धेचपापेचप्राग्भागाःपरतःशुभं॥अ
थोपग्रहांतर्वर्त्तिदोषांतरंदृष्ट्वाहेनाह॥ ॥नोकुर्याद्विभाघगेंद्वृतिनोयुग्मेषु
७।८।१५।२५।२८।१९॥पंचाशयोःस्वर्गात्पंचसु॥२१।२२।२३।२५॥२५॥शोभनानित्त
नुयादेषूग्रशस्त्रादिकं॥मासर्त्वयनवारयोगतिथिभादीनांचसिद्धिभाःशात्त

व्याःपुनरुक्तिरस्तिकुहचित्सातत्स्मृतिग्रामये॥५॥ ॥रविभादिसूर्याधिष्ठितनक्षत्रा
दिभगेंद्वृतिमितानियानिनक्षत्राणितेभ्योयुग्मेषु॥एतदुक्तंभवति॥सप्तमाष्टम
योः।चतुर्दशपंचदशयोः॥अष्टादशैकोनविंशयोरिति॥तथापंचाशयोरविनक्ष
त्रात्पंचमदशमयोः॥तथास्वर्गात्पंचसु॥एकविंशात्पंचसुनक्षत्रेषु।२१।२२।२३।२५।
२५॥शोभनानिकर्माणिनोकुर्यात्तत्रोग्रशस्त्रघातादिकंतनुयाद्विलायेत्कुर्यादित्य
र्थः॥उक्तंच॥ ॥विष्टत्पंचमभेक्षितेशुचलनंस्यात्सप्तमेसूर्यभाच्छूलश्चाष्टमभेशनि
श्चदशमेकेतुस्तथाष्टादशे॥दंडःपंचदशेचतुर्दशगदोक्तोनिपातोवुधैरुल्काकाल
विदांगणेर्निगदितैकोनविंशेर्कभादिति॥दैवज्ञवस्त्रभेपि॥क्रमशोमोहनिर्घातभूकं
पावज्रएवच॥परिवेषाघविज्ञेयानक्षत्रादेकविंशतेः॥एतेषिंडसमेतेषुकुर्यात्कर्मनशो

भनं॥ दहनास्त्रविषैःसाध्यंयत्रसिद्धिमुपैतिचेति॥ अन्यानपिदोषानत्रेप्रसंगतो व
क्ष्यामि॥ अथास्मिन्ग्रंथेमासादीनांसंज्ञालोकसिद्धाज्ञेयाइति॥ तथापुनरुक्तिनिर्दुष
णंदर्शनार्हंनाह॥ मासर्त्वयनेति॥ ॥मासाश्चैत्रादयः॥ ऋतवःवसंतादयः॥ अयनेएकाय
नेदक्षिणोत्तरे॥ वाराःसूर्यादयः॥ योगाःविष्कंभादयः॥ तिथयःप्रतिपदादयः॥ भान्यश्विन्या
दीनि॥ इत्यादीनांकरणरश्मिभादीनांसिद्धाभिधाःशास्त्रांतरसिद्धाःसंज्ञाज्ञातव्याः॥ तथा
दृहास्मिन्ग्रंथेकुदृहचिन्नक्वचिन्नपुनरुक्तिर्वर्ततेसानस्यदूरंतरितस्यस्मृतिमात्रयेस्मर
णायेतिनदोषः॥ ॥इतिस्त्रीनक्षत्रमुहूर्त्तमान्नंडटीकायांमान्नंडवस्त्रभाषांत्याज्यप्रकरणंस
माप्तं॥ ॥अथसाधारणंनक्षत्रप्रकरणंविवक्षुरादौनक्षत्रदेवताहृत्तेकेनाह॥ ॥ रम
अस्मिन्प्रकरणेसर्वाणिशार्दूलविक्रीडितानि॥ ॥भेशाद्रत्रयमाग्निकंद्युगिरिशाःप्रोक्ता ७

अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः॥ विश्वेदेवाअदितिःपंचजना
अदितिर्जातमदितिर्जनित्वं॥ ऋ॥ ॥
अश्विन्याःसकाशात्क्रमशोबुधैर्भेषाःप्रोक्ताइत्यन्वयः॥ भानांनक्षत्राणांईशाःस्वामिनः
स्युःअश्विन्याःयमोभरण्याः॥ अग्निःकृत्तिकायाः॥ कोब्रह्मारोहिण्याः॥ इंदुर्मृगशिरस्य॥
गिरिशोमहादेवआर्द्रायाः॥ अदितिःपुनर्वसोःगुरुःपुष्यस्य॥ पन्नगाःसर्पाआश्लेषायाः
कव्यभुज्ःपितरोमघायाः॥ भगःपूर्वाफाल्गुन्याः॥ अर्यमाउत्तराफाल्गुन्याः॥ रविर्हस्तस्य
धा त्वष्टाचित्रायाः॥ मित्रोनुराधायाः॥ इंद्रोज्येष्ठायाः॥ निर्ऋतिर्वृक्षमूलस्य॥ नीरंजलंपूर्व
षाढायाः॥ विश्वेदेवाउत्तरषाढायाः॥ विधिर्ब्रह्माभिजितः॥ वैकुंठोविष्णुः श्रवणस्य॥ वसवोध
निष्ठायाः॥ पाशीवरुणः॥ अजएकचरणःपूर्वाभाद्रपदायाः॥ अहिर्बुध्न्यःउत्त

समीरःवायुःस्वात्याः॥ इंद्राग्नीविशाखयोः॥ ३

णभाद्यपरायाः।पूषारेवत्याः।देवताप्रयोजनंनक्षत्रज्ञानार्थंशांतिकादौयजनार्थंच।
अथनक्षत्रादीनांस्थिरचरादिसंज्ञामाह॥ ॥उत्तरात्रयंध्रुवंस्थिरमथोपूर्वात्र
यायाम्यभं।क्रूरोग्रंश्रवणत्रयादितिपुनास्वातीचरसंज्ञाचला॥दस्रार्कभाभिजिदीज्यभंल
घुतथाक्षिप्रंचमैत्रांतिमेंदुलाघ्रंमृदुमैत्रमग्निभविशेमिश्रंचसाधारणे॥ ॥७॥ ॥उत्त
रेहिणी।किंलक्षणं।त्र्युत्तरपुष्कृतिसृणांउत्तराणांसमाहारस्त्र्युत्तरं॥तेनपुष्कं॥ध्रुवंस्थि
रमितिअभिधानं॥मुनीद्रैःस्मृतमित्यन्वयः॥अथोपूर्वात्रयायाम्यभंपूर्वात्रयंमघाभर
णीतिपंचक्रूरसंज्ञं॥क्रूरंउग्रंचोक्तं॥श्रवणत्रयादितिपुनास्वातीश्रवणधनिष्ठाशततार
काः॥अदितिःपुनर्वसुःएभिःसहितास्वातीचरसंज्ञाचरोक्ता॥श्रवणत्रयादिपंचकंचरं
प्रोक्तमित्यर्थः॥दस्रार्कभाभिजिदीज्यभं॥दस्रोअश्विनीअर्कोहस्तःअभिजिदुक्तस्यमाणल ८

क्षणः।ईज्योगुरुःतस्यभंपुष्यः॥ ॥इतिचतुष्टयंलघुतथाक्षिप्रंप्रोक्तं।मैत्रंतिमेंदुलाघ्रं॥मै
त्रेअनुराधाअंतिमरेवती।इंदुर्मृगःलाघ्रंचित्रार्एतत्चतुष्टयंमृदुतथामैत्रंप्रोक्तं।अग्नि
भविशेअग्निभंकृत्तिका।विशाविशाखाएतद्वैमिश्रंसाधारणेचप्रोक्तं॥मूलाहींद्रंशि वं
चदारुणमदस्तीक्ष्णंमुनींद्रैःस्मृतंसंज्ञातुल्यमिहाचरंतिसुधियःकार्यं हिंसिद्वये।स्थि सं
रोधाःस्थिरचंचलोग्रमिलिताःक्षिप्रोमृदुर्दारुणःक्षीणेदुर्कयमारराहुअग्निखिनःपापाख्
धस्तैर्युतः॥ ॥८॥मूलंप्रसिद्धं॥अहिरश्लेषा।इंद्रोज्येष्ठा।शिवोआर्द्रा।एतत्चतुष्टयं॥
दारुणंचतीक्ष्णंप्रोक्तंइहएषुऋक्षादिसंज्ञेषुनक्षत्रेषुसंज्ञातुल्यंकार्यंसुधियःपंडिता
आचरंति।किमर्थंसंसिद्ध्ये॥एतदुक्तंभवति॥स्थिरनक्षत्रेषुस्थिरं।स्तंभप्रतिष्ठादि
कंचरेचरमित्यादिकुर्वंतीतिस्पष्टं॥अत्रसमानार्थसंज्ञाद्वयकारणं॥कवित्वबंधनार्थो

अत्रप्रसंगेनसूर्यादीनामपिस्थिरादिसंज्ञाःसौम्यपापत्वंचवक्ष्यतेइत्याह॥सूर्यादयइत्यादि
सूर्यःस्थिरः॥चंद्रश्चंचलः।भौमोग्रःबुधोमिश्रितोमिश्रः।गुरुःक्षिप्रः।शुक्रोमृदुः।शनिर्दारु
णः॥अथपापसौम्यानग्रहानाह॥क्षीणेतिः॥क्षीणेंदुःकृष्णाष्टम्यूर्ध्वंप्रतिपत्पर्यंतेक्षी
णः॥एवंविधश्चंद्रःअर्कःसूर्यः।यमःशनिः।अरेर्भौमः।राहुःप्रसिद्धः॥शिखीकेतुः।एते
क्षीणेंदादयःपापाः।क्रूराःनैर्ऋतोबुधःपापःस्यात्॥उक्तंज्ञातकोत्तमे॥क्षीणेंदुर्कार्किभौ
माःस्युःपापाःसौम्योपितद्युतः॥एतुकेतूपपतरौपापःपापयुतस्तथेति॥अर्थोदन्येसौम्याः
॥एषांप्रयोजनंक्रूरकर्मसाधने॥ ॥अथप्रसंगेननक्षत्रसमानाथान्दिनरात्रिमुहूर्त्ता
नक्षत्रोक्तकार्यसाधकानाहत्रिभिरेकेनाह॥ ॥अन्हःस्युःशिवसार्पमित्रपितरोवस्वंबु
विश्वेभिजिल्लेंद्राग्निनिशाचराब्जपित्र्याधीशार्यमाख्योभगः॥एत्रेःस्युःस्मरहात्रयो॰ ८

जचरणात्पंचाश्वितोथोदितिर्द्वीवोविष्णुरिनाश्रवस्तिथिलवाःकर्मेषुभोक्तंस्मृतं॥४॥
॥ ॥एतेअक्षोदिवसस्तिथिलवाःपंचदशमुहूर्त्ताःस्युः॥प्रथमःशिवःसार्पःअमित्रः३
पिता४वसु५अंबु६विश्वे७अभिजित८ब्रह्मा९इंद्रः१०इंद्राग्नी११निशाचरः१२जलाधी
शोवरुणः१३अर्यमाख्यः१४भगः१५।अथरात्रैःस्मरहाशिवः१अजचरणादयः।अजच
रणाहिर्बुध्नपूषाभिधाःक्रमेण।अजचरणः२अहिर्बुध्न्यः३पूषा४पंचाश्वितइति।अश्वि
नःपंच॥दस्रयमार्किकेंदवःदस्रः५यमः६अग्नि७कंब्रह्मा८इंदुः९अथोदितिः१०विष्णु
ःइत्याश्रयःरविर्त्वष्टानिलाःरविः१३त्वष्टा१४अनिलोवायुः॥१५॥ ॥प्रयोजनमाह।कर्मेषु
भोक्तंस्मृतं॥एषुभोक्तंनक्षत्रोक्तंकर्मस्मृतंमुनीद्रैरित्यध्याहारः॥एतदुक्तंभवति॥शिवमृ
त्तैआर्द्रानक्षत्रोक्तं॥मित्रमुहूर्त्तेअनुराधोक्तं॥कर्मकुर्यादित्यर्थः॥एतदुक्तंरत्नमालायां ॥

यस्मिन्धिष्ण्येयच्चकर्मोपदिष्टंतद्दैवत्येतन्मुहूर्त्तेपिकार्यमित्यादि॥लोकेहिस्वामिभृत्यैसे
वकैप्रयुंजमानादृश्यंते॥अतोदेवताऋक्षनक्षत्रतिथ्यादिषूपचार्यते॥तथाविधस्य
प्रयोगदर्शनाच्च॥नागोद्वादशनाडीभिर्यैर्दिवदृश्यभिस्तथा॥भूतोष्टादशनाडीभिर्ष
यत्कृत्रंतितिथिमिति॥नागःपंचमी।दिग्दशमी।भूतःचतुर्दशीतिवचनात्॥ ॥इतिस्वो
क्तमुहूर्त्तमार्त्तंडटिकायांनक्षत्रप्रकरणं॥अथगर्भाधानादिसंस्कारप्रकरणंविवक्षुस्तावे
दृर्भाधानस्यऋतुसंबंधत्वात्प्रथमर्तुफलंस्मृत्यरण्टेनाह॥ ॥आघ्नौपौषशुक्रोर्ज
मधुश्चिनभस्याःकुयुक्पापवारिक्तामार्कैषष्ठाः॥४॥९।५।३०।१२।८।६।परगृहकु
पदेरात्रिसंध्यापरिक्ताः॥मिश्रोग्रामूलतीक्ष्णंविवरमनरुणात्स्थाधिकात्रंगरक्षोत्रातः
पापस्यलग्नंनसदरुणजरन्नीलचित्रांबरंच॥१०॥ ॥तत्रादौमासफलमाह॥आघ्नौप्र १९

थमर्त्तौपौषशुक्रोर्जमधुश्चिनभस्याःसंतोनस्युरित्यन्वयः॥अर्थोदिभंक्तिपरिणामः।
पौषःप्रसिरुःशुक्रोज्येष्ठःऊर्जःकार्त्तिकः।मधुश्चैत्रः।शुचिरषाढःनभस्योभाद्रपदः।एते
षण्मासानशुभाइत्यर्थः॥अर्थादन्येशुभाः॥नडुक्कंज्योतिर्निबंधे॥प्रथमर्त्तौमधौनारी
विधवाभवतिध्रुवं॥वैशाखेधनपुत्राढ्याज्येष्ठेरोगान्विताभवेत्॥आषाढेचमृतापत्या
श्रावणेचधनान्विता॥भाद्रपदेदुर्भगाचआश्विनेचतपस्विनी॥ऊर्जेत्यासुभगानारी
मार्गशीर्षेबहुप्रजा॥पौषेतुपुंश्चलीनारीमाघेपुत्रसुखान्विता॥फाल्गुनेश्रीमतीसाध्वी
क्रमान्मासफलंस्मृतमिति॥योगफलमाह॥कुयुगिति॥कुयोगेषुविष्कंभादिकुयोगेषु
नवयोगाइत्यर्थः॥विष्कंभातिगंडशूलेगंडव्याघातवज्रव्यतीपातपरिघवैधृतयः
एतेयोगानशुभाइत्यर्थः॥अर्थादन्येशुभाः॥नडुक्कं॥आघ्नौदुर्भगानारीविष्कंभेचेद्ज

खला। वंध्याचैवातिगंडेचशूलेशूलवतीभवेत्॥गंडेचवंश्चलीनारीव्यापातेचात्मघा
तिनी। वज्रेचस्त्रैणीप्रोक्तापातेचपतिघातिनी। परिघेमृतवंध्याचवैधृतौपतिमारि
णी। शेषाःशुभावह्यायोगायथानामफलप्रदाइति॥ ॥वारफळमाह॥पापवाराइति॥
क्षीणेंदुर्कयमाराःपापास्तेषांवारानशुभाः॥अर्थादन्येशुभाः॥उक्तंचकारिकायां॥आ
दित्येविधवानारीसोमेचैवमृतप्रजा॥अंगारेखस्फुटंस्त्रीचबुधेकन्याप्रसूर्भवेत्॥३त्रि
णीगुरुवारेचकन्यापुत्रवतीभृगौ।ज्ञानौतुपुंश्चलीनारीप्रथमर्क्षेविदुर्बुधाः॥तथाचना
रदः॥रोगीपतिव्रतादुःखीत्रिणीभोगभागिनी॥पतिप्रियाल्केशभागीसूर्यवारादिषुक्र
मादिति॥कारिकावचनेसोमवारफलंमृतप्रजेतिनारदवचनंपतिव्रतेति।एवंहयोर्विरो
धेमृतप्रजेतिशुक्लपक्षेसोमवारविषयं॥पतिव्रतेतिशुक्लसोमविषयं॥इतिव्यवस्थाप ११

नीयं। अतोमार्त्तंडवचनंपापवाराइत्येतदभिप्रायेणं॥तिथिफळमाह॥रिक्तामार्कीष
ष्ठ्यइतिरिक्तास्वनुथीनवमीचतुर्दश्यः। अमावास्या।अर्कोद्वादशी।द्वादश्याःस्वमीअर्कः।
अथवाअर्थसंख्यापिद्वादशवाचका।संख्यापिद्वादशीभवति॥तिथिदेवतारत्नमाळायां
तिथिपाश्चतुर्मुखविधातृविरचइत्यादयः॥अष्टअष्टमी॥षष्ठीप्रसिद्धा।एताःसप्ततिथ
योनशुभाः॥अर्थादन्याःशुभाउक्तंच॥आद्यत्रौसुभगानारीप्रतिपत्सुरजस्वला॥द्वि
तीयांभागैवतीतृतीयायांसुतान्विता।चतुर्थ्यांविधवानारीपंचम्यांधनदायिनी।षष्ठ्यांच
क्लेशभाक्नारीसप्तम्यांधनवर्द्धिनी॥अष्टम्यांराक्षसीनारीनवम्यांपापवर्द्धिनी॥दशम्या
मीतिकृन्नारीएकादश्यांसुतान्विता॥द्वादश्यांउभेगानारीत्रयोदश्यांहिरण्यदा।चतुर्द
श्यांपुंश्चलीस्यात्पौर्णमास्यांसुपुत्रिणी॥यदिभद्रानज्ञायेतदर्शेस्याच्चौरिकाध्रुवमिति॥

स्त्रीनफळमाह॥परगृहकुपदेति।परगृहंभर्तृगृहादन्यत्कुपदंकुत्सितस्थानंएतेनभेनिं
ये।अर्थादन्यच्छुभं।उक्तंच।देवस्थानेपितृस्थानेनिंद्यस्थानेन्यवेश्मनि॥पुष्यवत्याः
फलंनस्यान्मार्गेचंडाळवेश्मनीति। देवस्थानंदेवालयं।पितृस्थानंश्मशानं।निंद्यस्था
~~देवस्थानंपितृस्थानंनिंद्यस्थानंअन्यवेश्मनि पुष्यवत्याःफलंनस्यान्मार्गेचंडाळवेश्मनीति~~।निंद्यस्थानंकुत्सितस्था
नं।अन्यवेश्मभर्तृगृहादन्यगृहंअर्थात्पितृगृहेपिनिंद्यंस्यात्॥अन्यगृहेपीतिविशेषो
क्तत्वात्॥अन्यत्सुगमं।ननुअत्रश्लोकेवहूक्तंअत्रकथंपरगृहकुपदेतिस्वल्पमेवोक्तं॥
सत्यं।अत्रस्त्रीनरुयमुक्तंतस्मिन्नेवसर्वंश्लोकोक्तमधितिष्ठति॥तद्यथा॥देवस्थानान्य
वेश्मचंडाळवेश्मेतिपदत्रयंपरगृहइत्येतस्मिन्पदेधितिष्ठति॥अन्यश्लोकोक्तंतत्कुप त्
देवर्न्नते॥ननुमार्गःनकथंकुपदेभवितुमर्हतिकुत्सितोनभवति॥अतिमार्गेपिऽष्टस्त्रस ११

र्वजनसंचारादुर्मार्गस्त्रप्रसिद्धं॥तर्हिपूर्वश्लोकोक्तंवहुभाषणंत्वनधिकाधिकविव
क्षयोक्तमितिनदोषः॥वेळाफळमाह॥रात्रिसंध्यापरार्द्धरतिरात्रिःप्रसिद्धा॥संध्येदे।
अपरार्द्धस्त्रेधाविभक्तस्यार्द्धस्तृतीयोभागःएतेचत्वारःकालाःशुभाःअर्थादन्योपू
र्वार्द्धमध्यार्द्धौशुभौ।उक्तंच॥उत्रिणीसुभगापुण्यापूर्वार्द्धेयारजस्वला॥मध्यार्द्धेतु
शुभप्राप्तिःस्वैरिणीचापरार्द्धके।संध्ययोरुभयोर्वेश्यानिशायांविधवानथेति॥नक्ष
त्रफळमाह॥मिश्रोग्रामूळतीक्ष्णंरतिः।मिश्रेकृत्तिकाविशाखे॥उग्राणिपूर्वात्रयभरणी
मघा।अमूळतीक्ष्णंनिर्मूळरहिततीक्ष्णानि।आश्लेषाज्येष्ठार्द्राःइत्येतन्नक्षत्रादिकंन
शुभं।अर्थादन्यानिशुभानि॥तदुक्तंनारदीयसंहितायां॥श्रीपुनासुगापुत्रवतीसौख्या भ
न्विताक्षिरा॥कुळाधिकामानवतीचाश्विन्यांप्रथमोर्न्नवा॥१॥दुःशीळास्वैरिणीस्वस्यगर्भ

पतनतत्परा।परप्रेष्याकाकवंध्याभरण्यांप्रथमार्न्नवा॥२॥अनर्थापुंश्चलीवंध्यागर्भ
पातनतत्परा॥प्रेष्यामृतप्रजावापिवक्रिभेप्रथमार्न्नवा॥३॥सुशीलासुप्रजामान्यापति
भक्तादृढव्रता॥गृहार्चनरतानित्यंधात्रभेप्रथमार्न्नवा॥४॥गुणान्विताधर्मयुतानारी
सर्वसहासती।पतिप्रियासुताद्याचचेड्भेप्रथमार्न्नवा॥५॥कुलटादुर्भगादुष्टामृतपुत्रा
खलाजडा॥दुष्टाव्रतपरिभ्रष्टारौद्रभेप्रथमार्न्नवा॥६॥पतिभक्तापुत्रवतीरससंतानमो
दिनी।कुलाचारानुरक्ताद्याऽदितिभेप्रथमार्न्नवा॥७॥पतिप्रियापुत्रवतीनानाभोगव
तीशुभा॥स्वकर्मनिरतादक्षातिष्यभेप्रथमार्न्नवा॥८॥परभर्तृरतापेष्याकोपनाति घृ
णालसा॥मृषावादिनिदुःपुत्राभौजंगेप्रथमार्न्नवा॥९॥निर्दैव्यारोगसंयुक्तासर्वदागे
यलोलुपा॥पितृवेश्मरतामान्यापित्रभेप्रथमार्न्नवा॥१०॥परकार्यरतादीनादुःपुत्राक्लै

ब्याभागिनी॥मलिनाकर्कशाक्रूराभाग्यर्क्षेप्रथमार्न्नवा॥११॥प्रजावतीधर्मरतानिर्वै
रीमित्रपूजिता॥सतीमातृगृहासक्ताअर्यमर्क्षेरजस्वला॥१२॥निर्दैव्याभूरिविभवापुत्र
ष्यभोगभागिनी॥प्रधानदीनकुशलाहस्तर्क्षेप्रथमार्न्नवा॥१३॥चित्रकर्मीभोगिनीच
कुशलाक्रयविक्रये ॥विकिर्णकामाश्लक्ष्णाद्यात्वाष्ट्रेप्रथमार्न्नवा॥१४॥बहुचित्र
वतीनारीकुशलाशिल्पकर्मणि।पुत्रपौत्रवतीसाध्वीवायुर्क्षेप्रथमार्न्नवा॥१५॥नीचक
र्मरतादुष्टापानासक्तापरप्रिया॥विपुत्रामलिनाक्रूरादितिदैवेप्रथमार्न्नवा॥१६॥स्वामीप
क्षार्चिनास्वस्यगुणैःसम्यग्विभूषिता॥सुपुत्रासुभगाकांतामित्रभेप्रथमार्न्नवा॥१७॥दुः
श्चरित्रारथाकेशिन्यनर्थापुंश्चलीक्ष्यसुःदुःसंतानवतीज्येष्ठानक्षत्रेप्रथमार्न्नवा॥१८॥
संतानार्थगुणैर्नाल्पैर्युतान्यत्नकृतामोचिनी॥स्वकर्मनिरतानित्यंमूलर्क्षेप्रथमार्न्नवा॥

॥१९॥ प्रच्छन्नपापादुःश्वात्राप्राणिहिंसनतत्परा॥अजस्रंव्यसनासक्तोयभेप्रथमा
र्न्नवा॥२०॥कार्याकार्येषुकुशळासेदाधर्मानुवर्त्तिनी॥गुणाश्रयाभाग्यवतीविश्वभे
प्रथमार्न्नवा॥२१॥पुत्रपौत्रान्विताभोगधनधान्यवतीसती॥कुळानुमोदिनीमान्या
विस्रुभेप्रथमार्न्नवा॥२२॥धनधान्यवतीभोगपुत्रपौत्रसमन्विता॥स्वकर्मनिरता
सा ध्रीवसुभेप्रथमार्न्नवा॥२३॥बहुपुत्राधनवतीस्वकर्मनिरतासती॥कुळानुमो
दिनीमान्यावारुणेप्रथमार्न्नवा॥२४॥बंधकीबंधुविद्वेष्यानित्यंदुष्टरतास्वळा॥शि
ल्पकार्येषुकुशळाऽजांघ्रिभेप्रथमार्न्नवा॥२५॥आढ्यापुत्रवतीमान्यासुप्रसन्नापति
प्रिया॥वैधृत्यांधर्मवत्यहिर्बुध्न्येप्रथमार्न्नवा॥२६॥दृढव्रताधर्मवतीपुत्रसौख्या
र्थसंयुता॥विख्यातागुणसंपन्नापौष्णेप्रथमार्न्नवा॥२७॥ ॥संधिफळमाह॥विवर १५

मिति।तिथिभादीनांविवरंसंधिःनशुभं॥उक्तंच॥दुर्भगासंधिक्षिति॥रक्तफळमाह॥
अनरुणाल्पाधिकास्त्रमिति॥अरुणादन्यत्।अनरुणं॥अनरुणंच॥अल्पंच।अ
त धिकं॥च॥अनरुणाधिकंतद्वेदस्त्रंच॥अनरुणाल्पाधिकास्त्रंनसत्तस्यात्॥अनरु
णंनामयत्सुरंगमारक्तंनभवति॥अस्त्ररक्तं।अन्यत्सुगमं॥अर्थादन्यच्छुभं॥उक्तंच।प्र
थमार्त्तौफळंस्त्रीणामुच्यतेरजसोधुना॥सुभगापुत्रसंयुक्ताशुक्लवर्णेनथार्त्तवे॥शो
णितसंकाशोयद्वारक्तकसन्निभे॥पुत्रकन्याप्रसूतिःस्यान्नीलेनुस्यान्मृतप्रजा॥क
र्बूरेस्त्रीयतेसाचपिंगलेचमृतप्रजा॥कृष्णेनुविधवानारीरजस्येवंविनिर्दिशेत्॥शोणि
तेविद्रुमाभेनुस्थैरिणीचाल्पशोणिता॥वरामध्यस्त्रवास्यानुदुर्भगाबहुशोणितेति॥रक्ते
रक्तेभवेत्पुत्रःकृष्णेचमृतपुत्रिका॥पिच्छिलाचभवेद्वंध्याकोकवंध्याचपांडुरेति।पीते

चस्त्रैरिणी प्रोक्ता सुभगा गुंजवर्णके॥ सिंहराभे भवेत्कन्या रजःश्रोणितलक्षणमिति। फल
णफलमाह॥ गरा इति। गरा न अष्टगरा इष्ट॥ गरा द्यष्टकरणानि वपर्यंतानि नो संतिनशु
भानि। अर्थादन्यानि शुभानि॥ उक्तंच॥ बवे पुष्पवती नारी वंध्या वा विधवा भवेत्।
बालवे पुत्रिणी नारी कौलवे प्रमदा भवेत्॥ तैतिले संमतवती गरे नारी विनश्यति॥ नष्ट
प्रजा वणिक्संज्ञे विष्ट्यां वंध्या धनोदिता॥ शकुनौ च चतुष्पादे नारी वैधव्यमाप्नुयात्
नागे नरमते रामा किंस्तुघ्ने विधवा भवेत्॥ अथोत्पातफलं॥ उत्पातस्त्रिविधः सन्नस्या
त्॥ तथा च नारदः॥ संध्यासु चसवे विष्ट्यामशुभं प्रथमार्त्तवमिति॥ अथलग्नमाह॥
पापस्यलग्नमिति॥ पापग्रहस्यलग्नं नस्तन्स्यात्॥ क्षीणेंदुर्कयमाराः पापास्तेषामन्य
तमस्यलग्नमित्यर्थः॥ पापग्रहलग्नानि मेषसिंहवृश्चिकमकरकुंभाः एतानिलग्नानिनशु

भानि इत्यर्थः॥ अर्थादन्यानि शुभानि॥ कर्केलग्नं शुक्लपक्षे शुभं॥ स्वामी वर्गात्। कृष्णपक्षे
शुभं॥ लग्नस्वामिनो वक्ष्यमाणाः॥ उक्तंच॥ आत्मघ्नी भ्रूणहा मेषे वृषे पुत्रवती भवेत्॥
द्वंद्वे कन्या प्रसूर्नारी मृता पत्या च कर्किणी॥ सिंहे वैधव्यमाप्नोति कन्यायां स्त्री प्रसूर्भवेत्
तुलायां वहुपुत्राढ्या दुष्टकर्मरतालिनि॥ चापे पुत्रधनाढ्या स्यान्मकरे दुःखिनी भवेत्॥
सरुत्प्रजावती कुंभे मीने चाल्पप्रजा भवेत्॥ नारदेपि॥ कुलीरवृषचापांत्यवृश्चिकन्यातु
लाधराः॥ एताश्शुभदा ज्ञेया नारीणां प्रथमार्त्तवे इति॥ अत्रापि कर्कलग्नस्य द्वैधे चंद्र
स्यसौम्यत्वपापत्ववशाद्व्यवस्थाज्ञेया॥ ॥ अथवस्त्रफलमाह॥ अरुणजरन्नीलचि
त्रांवरमिति॥ नसस्यात्॥ अरुणंआरक्तं॥ जरन्नीर्णं। नीलंप्रसिद्धं॥ चित्रंनानावर्णैरं
जितं। एवंविधंअंवरंवस्त्रंनसस्यात्॥ नशुभमित्यर्थः॥ अर्थात्हृद्यंशुभंपीतंवस्त्रंशुभं।

उक्तंच॥सुभगास्वेतवस्त्राचरोगिणीरक्तवाससा॥नीलांबरधरानारीविधवाप्रथमार्त्तवा।भोगिनीपीतवस्त्राचदृढवस्त्रापतिव्रता॥दुर्भगाजीर्णवस्त्राचसुभगाचारुवस्त्रिणी॥अत्रानुक्तमपित्याज्यप्रकरणोक्तमन्यदुष्टंविचारणीयं॥इतिस्वोक्तमुहूर्त्तमार्त्तंड टीकायांमार्त्तंडवल्लभायांप्रथमार्त्तचप्रकरणं॥ ॥छ॥ ॥अथसाधारणलग्नबलेस्निग्धरक्तेनाह॥प्रायश्चंद्रंत्यजांत्या१२ष्टमरिपुदनुगंभांशकौमूढनाथौक्रूरैर्दृष्टौखलांशंमृतिष्ठगतखचरंमृत्युतत्पौतनुस्थौ॥सौम्याःकेंद्रत्रिकोणेषु१।४।१०।९।५।रिभवसहजे।६।११।३।धन्यखेटाःप्रशस्ताःसर्वत्रैतत्प्रयोज्यंप्रकरणपठितांस्तद्विज्ञेयान्विदित्वा॥१९॥ ॥इहवक्ष्यमाणेगर्भाधानादिकृत्येप्रायोबाहुल्येनचंद्रं अंत्याष्टमरिपुतनुगंत्यजजहि हीतिदृष्टकंप्रतिदैवविदचनं॥अंत्यंद्वादशं॥अष्टमंप्र

नम १६

सिद्धं।रिपुःषष्ठं।तनुर्लग्नं।एतान्यतिगतंत्यजेति।तथाभांशकौत्यज।किंलक्षणौमूढनाथौमूढौनाथौयस्यसौतथा॥अस्तंगतस्यलग्ननवांशाधित्यर्थः।पुनःकिंलक्षणौ॥क्रूरैर्दृष्टौ।क्रूरग्रहचंद्राणामन्यतमयुक्तौ।तथाखलांशंत्यज॥यत्रकुत्रापिलग्नेपापग्रहनवांशाधित्यर्थः॥तथामृतिगतंखचरंत्यजेत्॥लग्नादष्टमंग्रहंत्यजेदित्यर्थः॥तथामृत्युतत्पौतनुस्थौत्यज॥मृत्युर्जन्मराशिजन्मलग्नाभ्यामष्टमे॥तत्पतिरेतौतनुस्थौत्यजेत्यर्थः॥लग्नेगोचरमाह॥सौम्याइति।सौम्याःसौम्यग्रहाः॥केंद्रत्रिकोणलग्नचतुर्थसप्तमदशमानि॥त्रिकोणेनवमपंचमे॥एतेषुकेंद्रकोणेषुसौम्यग्रहाःप्रशस्ताः॥अरिभवसहजेषुअन्यखेटाः।अरिःषष्ठं।भवएकादशं।सहजस्तृतीयं।एषुस्थानेष्वन्यखेटाः।सौम्येभ्योअन्येपापग्रहाःप्रशस्ताःस्युःसर्वत्रैतत्प्रयोज्यं।एतत्श्लोकोक्तंसर्वत्र

गर्भाधानादिकृत्येप्रयोज्यं॥साधारणत्वात्॥किंकृत्वा।प्रकरणपठितांस्तद्विशेषान्विदित्वा
एवंकृत्यंकृत्यंप्रतिपठितान्विशेषान्ज्ञात्वा॥अथगर्भाधानंस्वग्धराछन्देनाह॥ ॥
स्वस्त्री प्राङ्मिद्वचतुष्कासमदिनविवरश्राद्धतत्पाग्दिनानित्यक्तामूलंमघांत्यैवसुष्क
लि१४जनिभाहानिपर्वाणिचर्तौ॥याहीज्याकैटुलग्नैर्विषमभलवगैरुद्वलैर्भोसुतार्थि
न्यस्तैरेतैरिहैवायुगहनिमुदितःकन्यकेछोसुचंद्रे॥ ॥१२॥भोसुतार्थिन्ऋतौमुदि
तःसन्स्वस्त्रीप्रतियाहिगच्छेत्यर्थः॥सुतमर्थयतेसौसुतार्थीतस्यसंबोधनंहेऋतार्थिन्
॥ऋतोरजोदर्शनमारभ्यषोडशरात्रयोऋतुःतस्मिन्मुतहर्षःसंजातायस्यसःमुदितः
एवंविधःसन्स्वस्त्रीगच्छेत्यर्थः॥ततोत्रस्त्रीगर्भधारणंकरोतिअत्रस्त्रीअपिमुदिता
भावयाततोभयोःसकाशात्संतानोक्रमः॥तथाचमनुः॥ऋतुःस्वाभाविकःस्त्रीणांर ७७

त्रयःषोडशरात्रयथाइति॥किंकृत्वा॥प्राङ्मिद्वचतुष्कासमदिनविवरश्राद्धतत्पाग्दिनानित्य
क्तामाद्यांनिशांचचतुष्कंप्राङ्मिद्वचतुष्कंपूर्वेत्रीचचतुष्टयं॥असमदिनंविषमदिनंविवर
णिदिनरात्रितिथिनक्षत्रादीनांसंधयःश्राद्धंस्वपित्रोःश्राद्धदिनंतत्पाग्दिनं॥तस्यश्रा
द्धस्यपूर्वदिनंएतानित्यक्तेत्यर्थः॥एवंमूलंत्यक्त्वा।तथामघांत्येत्यक्त्वा॥मघाप्रसिद्धं
अन्त्येरवती॥एतेत्यक्तेत्यर्थः॥तथावसुकलिजनिभाहानित्यक्त्वा॥वसुरष्टमी।क
लिश्चतुर्दशीजनिभंजन्मनक्षत्रं॥अहोदिवा।एतानित्यक्तेत्यर्थः॥तथापर्वाणिवत्य
क्त्वा॥पर्वाणि।दर्शपौर्णमासीव्यतीपातवैधृतिसंक्रांतिमहापातादीनि त्यक्त्वास्त्रि
यंप्रतिव्रजेत्यर्थः॥तथाचनारदः॥ऋतोर्दर्शनतोस्पृश्यानार्योदिनचतुष्टयं॥ततःशु
द्धाःक्रियाश्चैताःसर्ववर्णेषयंविधिरिति॥वसिष्ठः॥उक्तेवैधृतिपातयोश्चविस्पांदि

कापरिघपूर्वभागे॥संध्यासुसर्वास्वपिमातृपित्रोर्मृतौक्रियपत्नीगमनंविवर्ज्यं।दिनेषुयु
ग्मेषुचवक्ष्यमाणयोगैःसुताथीस्वसतीमुपेयात्॥दिनेष्वयुग्मेषुचकन्यकाथीहित्वाच
गंडान्तिथिलग्नभागान्॥ज्योतिषार्के॥कृतौयुग्मनिशिस्वस्त्रिगछेत्पुत्रायसद्दिधौ।
मघामूलंस्वपक्षांतनिंद्यभूताष्टमींत्यजेदिति॥कैर्दैवेज्यार्केंदुलग्नैःविषमभलवगैः
॥दैवेज्योगुरुःअर्कःप्रसिद्धःइंदुश्चंद्रःलग्नंप्रसिद्धं॥एतैर्विषमभलवगैः।भंराशि।ल
वोनवांशःविषमराशिविषमनवांशस्तिथैरित्यर्थः॥नकेवलंविषमभलवगैःअपि
तुशुद्धलैः।उक्तशुद्धबलंयेषांतानित्यथातैः॥अथकन्याकामिनोविशेषमाह॥भो
कन्यकेछाःइहैवअनंतरेकलक्षणेकाले।युगेहनिविषमदिनेमुदितःसन्स्त्रीप्र
तियाहि॥कैःएतैर्व्यस्तैः॥एतैःदैवेज्यार्केंदुलग्नैः॥व्यस्तैरितिसमभलवगैः॥तथाच १८

दृहज्जातके॥ओजर्क्षेगुरुपांशकेशुक्रभिर्लग्नार्कगुर्विंदुभिःपुंजन्मप्रवदेत्समांश
कगतैर्युग्मेषुतैर्योषितइति॥कस्मिन्नतिसुचंद्रेशोभनेचंद्रेसति॥गोचरेणचंद्र व
लइत्यर्थः॥सुचंद्रइति॥अनन्यगतिकंविनासर्वत्रयोज्यं॥पूर्ववत्तन्नबलं॥अ
थपुंसवनसीमंतोन्नयनेस्त्रग्धरयाह॥ ॥पुंभेऽर्केज्यारवारेविमिथुनविषमो
गांशयोःपुंसवंस्यात्सीमंताख्यंचसत्कव्ययसुतगृहयोःपर्वरिक्तोनतिथ्यां॥मासे
द्वित्रिप्रसंख्येप्रथमकमपरंतूर्यषष्ठाष्टमेऽष्टमेशोक्रंपुंगर्भलग्नंगृहबलमन
योर्योज्यमाद्यश्चपक्षः॥१२॥पुंभेऽन्नक्षत्रेपुंनक्षत्राणिचैतानिपुष्योहस्तःश्रव
र्क्षम्॥अभिजित्पौष्णचैवत्रमनुराधाश्चयुक्ततथेति॥मोक्षपात्तस्त्रीभाऽपदा॥
एषामन्यतमेऽन्नक्षत्रेअर्केज्यारवारे॥रविगुरुभौमवारे॥विमिथुनविषमांगांश

मो.टी. योः अंगंच अंशश्च अंगांशौ विगतं मिथुनं याभ्यां तौ विगतमिथुनौ तौ च तौ अंगांशौ च तथा
१८ तयोः मिथुनरहिते विषमलग्ने विषमनवांशे इत्यर्थः॥ पुंसवं पुंसवनं सीमंतोन्नयनमपि सत्स्यात्॥ नामैकदेशग्रहणेन नामग्रहणं॥ कयोः सतोः सुव्ययसुत
ग्रहयोः सतोः पापग्रहरहिते योः व्ययसुतभवनयोः सतोरित्यर्थः॥ पर्वरिक्तोनतिथौ
पूर्णिमारिक्तातिथिरहिततिथ्यां॥ मासिद्वित्रिप्रसंख्ये प्रथमकं॥ प्रथमकं पुंसव
नंगर्भाधानाद्द्वित्रिप्रसंख्ये मासि द्वितीये तृतीये वा मासि सत्स्यात्॥ अपरं सीमंतो
यनं नैर्ऋतर्क्षषष्ठाष्टमेषु गर्भाच्चतुर्थषष्ठाष्टमेषु मासेषु सत्स्यात्॥ यत्पुंगर्भीयलग्नग्रह
बलमुक्तं। दैवज्ञाकैरुलग्नैरित्यादिकंतदनयोः पुंसवनसीमंतोन्नयनयोर्योज्यं॥
आद्यःपक्षःशुक्लपक्षश्चयोज्यः॥ नक्तंस्त्रः॥ अत्रगर्भाच्चन्नाम्नांतेषु गुरुशुक्रौस्था १८

दिकंनचिंत्यमग्रेवक्ष्यति॥ लग्नबलंपूर्ववत्॥ जातकर्ण्यः॥ द्वितीयेवातृतीयेवा मा
सिपुंसवनंभवेत्॥ व्यत्येगर्भेभवेत्कार्यंसीमंतेनसहोथवा॥ नृसिंहः॥ रिक्तांचपर्वन
वमीमस्तंक्रापुंसवनेशुभाः॥ दत्तपुत्रे। सीमंतोन्नयनेऽधरक्तहिनगौपूर्णामधिस्थेन्दि
तेऽर्कार्किपुंसवनंचरविदिवसेभौमस्यजीवस्यवेत्यादि॥ बृहस्पतिः॥ ऊनारंमिथुनं
कन्यांहित्वाशेषाःशुभावहाइति॥ नारदः॥ चतुर्थेमासिषष्ठेवाप्यष्टमेवातदीश्वरे। व
लोपपन्नेदंपत्योश्चंद्रबलान्विते इति॥ अरिक्तापर्वदिवसे। कुजज्ञीवार्कवासरे। तीक्ष्ण
मिश्रोग्रवर्ज्येषुपुंलग्नेपुन्नवांशके। शुद्धेष्टमेजन्मलग्नान्नयोर्लग्नेननैधने॥ शुभग्रह
युतेदृष्टेपक्षर्क्षदायुतेक्षिते॥ पंचेष्टिकेचतुर्भिर्वाइष्टेर्कं ह्रीज्ञपूर्वकैः॥ स्त्रीणांतुप्रथमे
गर्भेसीमंतोनयनंशुभं॥ शुभग्रहेषुधीधर्मकेंद्रेषरिभवत्रिषु॥ पापेषुसत्सुचेंद्यनि

धनाद्यारिवर्जिते॥क्रूरग्रहाणामेकोपिलग्नादंस्यात्सजाष्टगः॥सीमंतिनीवान्तर्भवं
लिहंतिनसंशयइति॥अथजातकर्मविधिंस्मृत्यंतरमाह॥ ॥सूतौजातंविदध्यादपि
जनिमरणाशौचकेवानदंतेक्षिप्रैर्ब्राह्म्योत्तरभिश्वरमृदुभिरथोनामवर्णाविदध्युः॥
सूतेःसूर्याऽष्टिऽविंशा२०क्षतिऽमितदिवसेजातभेवांचरणंरिक्काष्टम्यारमंदाच्च
मगतखचरंप्रोह्यरात्रिंपरांके॥१४॥ ॥सूतौप्रसूतौजातायांजातेजातकर्मविदध्या
त्।कुर्यात्।अथकदाचित्सूतकमध्येप्रसूतौजातायांसत्यांस्मार्तंकर्मपरित्यागोराहो
रन्यत्रसूतकइतिशास्त्रेणजातकर्मणोपरोधेप्राप्तेतदपवादमाह॥जनिमरणाशौ
चकेपि॥अयमर्थः॥कदाचिज्जातमृतकयोःप्रसूतिर्भवतितदास्मिन्जातकर्मवि
धयेसूतकांतरदोषोनास्तीतिभावः॥सूतिकांतरेसत्यपिजातेऽत्रेपितासचैलंस्ना २०

नंकुर्यादिति।स्वस्वगृह्योक्तंकर्मकुर्यादिति।स्वस्वगृह्योक्तंकर्मकुर्यादित्यर्थः॥यतःपू
र्वाशौचेनैवास्यशुद्धिःपितुरितिकर्तुरुपलक्षणंवानदंतेपूर्वाशौचांतेवाएतस्यांतेवाक्षि
प्रादिभिर्नक्षत्रैःकुर्यात्॥क्षिप्राणि।अश्विनीहस्ताभिजित्पुष्यः॥मृदूनिरेहिणी।उत्तरा
स्तिस्रः।चराणि।श्रवणत्रयपुनर्वसुस्वात्यःमृदूनि।अनुराधारेवतीमृगचित्राःएभि
रित्यर्थः।लग्नबलेपूर्ववत्।उक्तंच।तस्मिंजन्ममुहूर्तेपिसूतकांतेथवाशिशोः॥जा
तकर्मचकर्तव्यंपित्रादिपूजनपूर्वकं॥क्षिप्रैश्चरैर्ध्रुवैर्मिश्रैर्दशेमथमेक्षिवा॥केइ
दुरुक्षगौकार्यंजातकर्मसनातनमितिप्रजापतिः॥सूतकेतुसमुत्पन्नेऽत्रजन्मपरा
भवेत्॥कर्तुस्नात्कालिकीशुद्धिःपूर्वाशौचेनशुध्यति॥संवर्तः।जातेऽत्रेपितुःस्नानं
सचैलंतुविधीयते॥इतिकर्तुरशौचोदकेनकार्यं॥तत्रजाबालिः॥कुर्यान्नैमित्तिकंस्ना

नंशीनाङ्गिःकाम्यमेवचेति॥एतच्चरात्रावपिकार्यं॥तत्रवसिष्ठः॥पुत्रजन्मनियज्ञेच
तथासंक्रमणेरवेः॥राहोश्चदर्शनेस्नानंप्रशस्तंनान्यथानिशि॥तथौत्तराभिमुखंका
र्यं।तदुक्तंतेनैव॥शुक्लाजातंपितापुत्रंसचैलंस्नानमाचरेत्॥उत्तराभिमुखोभूत्वान
घांवादेवस्नानकेइति॥रात्रौउदकादिगमनान्नौविशेषमाह॥सांख्यायनः॥दिवा
यदाहृतंतोयंकलास्वर्णयुतंतुतत्॥रात्रिस्नानेतुसंप्राप्तेस्नायादनलसंनिधाविति॥
॥अथनामकर्माह॥॥अथोनामवर्णाविदध्युः॥सूतेःसूर्यर्क्षविंशाकृतिमित
दिवसेइति॥अथानंतरंवर्णाःब्राह्मणादयः।क्रमेणसूतेःसकाशात्सूर्यर्क्षविंशा
कृतिमितदिवसेह्यदशाह्यविंशपोडशाविंशमितं दिवसेनामविदध्युः॥कुर्युरि
त्यर्थः॥अयमर्थः॥ब्राह्मणोह्यदशेदिवसेक्षत्रियःषोडशेवैश्योविंशतिमे॥शूद्रो २१

द्वाविंशेदिवसेनामकुर्यादित्यर्थः॥तथोक्तंबृहस्पतिना॥द्वादशेदिवसेवापिजन्म
नोदिवसेशुभे॥षोडशेविंशतौचैवद्वाविंशेवर्णतःक्रमादिति॥अत्रान्येपिविक
ल्पाःसंति॥तत्रव्यासः॥नामधेयंदशम्यांतुकेचिदिच्छंतिसूरयः॥द्वादशेत्र्याहुर
न्येतुमासेपूर्णेतथापरे॥अष्टादशेहनितथावदंत्यन्येमनीषिणइति॥मासकाले
विशेषमाह॥गर्गः॥व्यतीपातेचसंक्रांतौग्रहणेवैधृतावपि॥श्राद्धंविनाशुभंनैव
मासकालेपिमानवः॥अमासंक्रांतिविख्या दौमासकालेपिनाचरेत्इतियत्रकाल
निरोधरुक्तत्रदोषोनास्ति॥यस्यांक्रियायांसर्वोक्तःकालोमासदिनैरपि॥तस्यांनदो
षोमूढत्वंवक्तंवाजीवशुक्रयोरितिज्ञातभैर्वेति॥॥अथकाल्यातिक्रमेनसूत्रा
ण्याह॥ज्ञातभैर्ज्ञातकर्मोक्तनक्षत्रैःमित्रैःऋषिभैरित्यादिभिर्वाकार्यं॥तदुक्तंनारदेन।दे

शकालोपघातादैःकालातिक्रमणंयदि॥अनस्तगेभृगावीज्येतत्कार्यंचोत्तरायणे॥
चरस्थिरमृदुक्षिप्रनक्षत्रेशुभवासरे॥चंद्रतारबलोपेतेदिवसेचशिशोःपितुरि
ति॥अथान्यविशेषमाह॥चरांगमिति॥चरांगंचरलग्नं॥रिक्काष्टम्यारमंदान्रि
क्काश्चतुर्थीनवमीचतुर्दश्यः॥अष्टमीप्रसिद्धा॥आरौभौमः॥मंदःशनिः॥तान्व्य
गनखचरंव्ययभात्रेगतंखगंसौम्यंअसौम्यंवा॥रात्रिःप्रसिद्धा॥अपराह्णोदिनत्रीणां
शःएताःप्रोक्त्यत्कालग्नबलंपूर्ववत्॥तथाचबृहस्पतिः॥पूर्वाह्णःश्रेष्ठइत्युक्तोम
ध्याह्नोमध्यमःस्मृतः॥अपराह्णंचरास्त्रिंचवर्जयेन्नामकर्मणीति॥नृसिंहः॥साया
ह्नेऽष्टयोगेचशनिभूमिजवारयोः॥रिक्तापर्वाष्टमीविष्टिंकिंलुघ्नंचविशेषतः॥एतैर्दो
षैर्युतेकाळेएतावपिनकारयेदिति।बृहस्पतिः॥शुभवारेचषड्गेशुभानांनामसंपदे।

एतायश्चस्थिरश्चेष्टादिस्वभावाःशुभैर्युताइतिनृसिंहः॥लग्नाद्यायष्टमेसर्वेनशुभा
नामकर्मणीति॥तेषांनामकार्यमिति॥संग्रहेनक्रं॥देवाळयगजाश्वानांवृक्षाणांवापि
रूपयोः॥सर्वोपकारणानांचचित्रकानांयोगिनांनृणां॥काव्यादीनांकवीनांचपश्चा
दीनांविशेषतः॥एजप्रसादसंज्ञानांनामकर्मविशिष्यत इति॥अथपालकारोहणं॥भूम्युपवेशनंडुग्धपानंनिष्क्रमणंचेतिचतुष्टयंबृहस्पतिनाह॥जन्माहाद्दशे
क्षिधवमृदुलघुभिर्वन्यसेत्पालकेभेसौम्याश्वीज्यध्रुवैर्द्वैभुविशुभदिवसेपं
चमेमासिदध्यात्॥एकत्रिंशेदिनेवाशननिगदितभेकेचुनायोज्यमर्भंव्यत्यासा
स्तेपयोथास्यगमवेऽदितोनिष्क्रमोमासितृर्यं॥१५॥ ॥प्रसूतेःसकाशाद्दशे
दिवसेपाळकेखट्वायांअर्भंवालंनिदध्यात्॥उक्तकाळातिक्रमेध्रुवमृदुलघुभि

र्वानक्षत्रैर्निदध्यात्लग्नबलंपूर्ववत्॥तथाचोक्तंबृहस्पतिनास्वसंहितायां॥ख
ड्गरोहस्तुकर्त्तव्योदशमेऽब्दोपिवा॥षोडशेदिवसेवापिहाविंशेदिवसेपिवेति।
तथोक्तंभविष्योत्तरे॥अ भिषिक्तदिवसेपुण्येचंद्रतारबलान्विते॥मृदुध्रुवक्षिप्रभे
तुमात्रावाकुळयोषितः॥शोपशायिनमाचिंत्यप्राक्शीर्षंविन्यसेच्छिशुमिति॥
अथपाळनाचक्रं॥सूर्यादौचंद्रभंयावत्संचपंचचतुर्हृतं॥मध्येतुसमदेयानि
पालनाचक्रमुत्तमं॥आरोग्यंपूर्वभागेतुदक्षिणेमरणंध्रुवं॥ईशात्वपश्चिमेज्ञेयं
उत्तरेव्याधिसंभवः॥शेषाणिसमऋक्षाणिशुभानिशयनेशुभे॥अथभूम्युप
वेशनमाह॥सौम्येतिसौम्यंमृगः॥अश्विनीप्रसिद्धा॥ईज्यःपुष्यः॥ध्रुवाणिपूर्वो
क्तानि॥श्रुत्तरारेहिण्यः॥इंद्रोज्येष्ठा॥एभिर्नक्षत्रैःशुभदिवसेरिक्तादिवर्जितेजन्म २४

तःपंचमेमासिभुविभूम्यांअर्भंविदध्यात्॥उपवेशयेदित्यर्थः॥तथाचोक्तंपद्मपुरा
णे॥पंचमेचतथामासिभूमौत्तमुपवेशयेत्त॥तत्रसर्वग्रहाःशस्ताःभौमोप्यत्रविशे
षतः॥तिथिंविवर्जयेद्रिक्तांशस्तानिशृणुभामिनि॥उत्तरात्रितयंसौम्यंपुष्यर्क्षंश
क्रदैवतं॥प्राजापत्यंचहस्तश्चशस्तमश्विनमित्रभं॥वराहंपूजयेद्देवंपृथिवींचतथा
द्विजान॥भूभागमुपलिप्याथतत्रकृत्वातुमंडलं॥वाद्यपुण्याहशब्देनभूमौत्तमुपवे
शयेदिति॥उपवेशनमंत्रस्तत्रैवोक्तः॥ईक्षैनंवसुधेदेविसदासर्वगतंमम॥आयुः
प्रमाणंसकलंनिक्षिपस्वहरिप्रिये।इति॥दुग्धपानमाह॥एकत्रिंशेदिनइति॥एकत्रिं
शत्तमेदिवसेअर्भंबालकंकंबुनाशंखेनपयोदुग्धंपोज्यं॥पाययेदित्यर्थः॥अत्रवृ
सिंहः॥एकत्रिंशेदिनेचैवपयःशंखेनयोजयेदिति॥अथमातुःस्वल्पपयस्त्वेपक्षा

तरमाह॥वाअन्यानिगदितभैरिति॥अंनप्रान्याननक्षत्रैर्वायोज्यं॥भैरित्युपलक्ष
णं।अन्नेप्रान्यानोक्तंअन्यदपिविचार्यं॥किंलक्षणेभे।व्यग्वास्येविगतःअगुः
रहुःयस्याःसाव्यगूःसाचासौआस्याचतस्यांआस्यंमुखंयस्यसतथातस्मिन्।रहु
वर्जितदिङ्मुखइत्यर्थः॥लग्नबलंपूर्ववत्॥व्यग्वास्येइत्युपलक्षणं॥तेनरुद्र
योगिन्यादिनामपिवर्ज्यं॥तथाचोक्तंज्योतिर्निबंधे॥योगिनीरहुरुद्रादिग्मुखंचैव
विवर्जयेत्॥रहुलक्षणं।गुरुभान्वोर्वसेत्याच्यांइंदौशुक्रेचदक्षिणे॥कालेरहुःकु
ज्ञेप्रत्यगुत्तरेबुधमंदयोः॥लक्षणांतरं॥इंद्रेवायौयमेरुद्रेनोयाग्नेनाशिरास्मृते॥
यामाईमुदयात्पाडुर्भ्रमत्येवंदिगष्टकं॥उदयात्सूर्योदयात्त॥रुद्रलक्षणं॥हरिसो
मवक्त्रिरक्षिसयमवरुणानिळहरान्तयेषेवं॥उदयादिभ्रमतिसदाघटिकारुद्रोमहा २५

वलइत्यादि॥हरिंद्रः॥अथनिःक्रमणमाह॥अथ गमवदुक्तोनिःक्रमोमासितुर्यइति।
तुर्यचतुर्थेमासिअस्यार्भकस्यनिःक्रमोनिःक्रमणंगमवत्॥यात्रावदितियावत्॥उदितः
उक्तः॥पूर्वैरितिशेषः॥अत्रयात्राप्रकरणोक्तंसर्वंयोज्यमित्यर्थः॥निःक्रमणलक्षणंबृह
स्पतिनोक्तं॥अथनिःक्रमणंनामगृहात्प्रथमनिर्गमः॥अकृतायांक्रियायांस्यादायुः
श्रीनाशनंशिशोरिति॥यमः॥उपनिःक्रमणंकुर्यात्तच्चतुर्थेमासिशावनेइति॥कारिका
यां॥चतुर्थेमासिपुण्यर्क्षेशुक्रेनिःक्रमणंभवेत्॥स्नातंस्वलंकृतंवापिकृतस्वस्त्ययनं
शिशुं॥आदायगेहान्निःक्रम्यगच्छेयुर्देवतालयं॥अभ्यर्चदेवतांसम्यगाशिषोवाच
येदथ॥कृत्वाप्रदक्षिणंगेहमानयंतिततःस्वकं॥मातस्वसृगृहंगत्वामातुळादेर्गृहंन
येत्॥तदाशीर्वचनाद्यैःस्याद्दीर्घायुरभिनंदितः॥जयंतस्यमतेनायंलिखितःशिशुनिःक्र

मत्रति॥स्वगृह्यानुसारंयोजयेत्॥अथकर्णवेधंमंदाक्रांत्याह॥मैत्रैःक्षिप्रैःस्थिरभचरभै
र्व्यानिळांभःपकक्षैश्चैकाफाघौषिनऋनिकुजर्क्षांऋवारानपास्य॥रिक्तापर्वेश्वरवसुति
थीन्ऋत्रीसंध्येसमाष्टेपुंस्त्रीकर्णौसविधिपटुनादक्षवामादिवेध्यौ॥२५॥॥मैत्रैःअ
नुराधामृगचित्राभिःक्षिप्रैर्दस्तार्कभिजिद्भभैःस्थिरभैःचरैःस्थिराणिध्रुवऋक्षाणिहि
एयःचराणिश्रवणत्रयपुनर्वसुस्वात्यः॥तैःकथंभूतैःस्थिरभचरभैः॥व्यानिळांभःपे
कक्षैःविगतानिळानिळांभःपकक्षीणियेभ्यस्तानितथाभैतैः॥अनिळंस्वातीअंभपःऋत
नारकाः॥ कक्षैरोहिणीइहनैरित्यर्थः॥चैकाफाघौपुनामैकदेशेसर्वनामग्रहणंचैचे
त्रःकार्त्तिकःफाफाल्गुनः।घौघोषःतेषुचैकाफाघौषुपुंस्त्रीकर्णौपुरुषस्त्रियोःकर्णौपटु
नाऽकृशश्लेनसविधियथास्यात्तथादक्षवाम यथास्यात्तथावेध्यौ॥पुरुषस्यदक्षिणक २५

र्णोहिस्त्रीयावामकर्णोदित्यर्थः॥कर्णवेधविधिरुक्तगृह्यपरिशिष्टेनोक्तः॥अथकर्णवे
धोवर्षेतृतीयेपंचमेवापुष्येऽहरिचित्रारेवतीषूत्तरफल्गुनीहस्तेष्वभ्युखउपविश्यदक्षिणक
र्णमभिमंत्रयेत्॥भद्रंकर्णेभिरितिसव्यंवस्यंतीवेदितिकुमारायमधुरंदत्वाघृतंघात
तोब्राह्मणभोजनमिति॥किंकृत्वा॥इनऋनिकुजर्क्षांऋवारानऽपास्यदूरीकृत्यरवि
ऋनिकुजानांऋक्षाणिलग्नानि॥अंशाःनवांशाःवाराःप्रसिद्धास्तांस्तत्केत्यर्थः॥पुनः
किंकृत्वा।रिक्तापर्वेश्वरवसुतिथीन्ऽपास्यत्यक्त्वारिक्ताचतुर्थीनवमीचतुर्दश्यः
पर्वपूर्णिमाऽमावास्येति॥ईश्वरतिथिरेकादशीवसुतिथिरष्टमी॥एतानपास्य।
पुनःकिंकृत्वात्रिसंध्येऽपास्य॥स्पष्टं॥पुनः।किंकृत्वा॥समाष्टंऽपास्य।समंच
पंस्यत्वा।विषमेवर्षेकर्तव्यमित्यर्थः॥अत्रनृसिंहः॥वेध्यौकर्णावदंतस्यविषमेब्दे

=शिशाश्वतिथयःसर्वेरिक्तांशत्रिकंविना॥कर्णेदयादितिक्षिप्रमृदुभैस्त्रायभैःशुभैः॥ध्रुवैर्लग्नेपिकेप्याहुस्तन्नरा=
=सुश्रुतिव्यधः२

पिवाशिनोः॥शुक्लपक्षेशुभेवारेचैत्रेपुष्योर्जफाल्गुने॥एकादश्यष्टमीपर्वरिक्तावर्ज्यांशु
भावहाः॥इति।अगस्त्यः।हृद्योश्वसंधयोर्लग्नेनकुर्यात्कर्णवेधनं॥एतावपित्थालग्नेन
नकुर्यात्कर्णवेधने॥एतावपित्थालग्नेनक्षत्रतिथिसंधिषु॥कर्णवेधंनकुर्वीतनकुर्या
च्चेछेदनेभवेदिति॥बृहस्पतिः॥मंदार्कारंशवाराःस्युर्वर्ज्याःकर्णस्यवेधने॥गुरुशुक्रें
दुजेदूनांशज्यावारांशकोदयाइति॥संग्रहे॥शातकुंभमयीसूचीवेधनेतुशुभप्रदा।
राजतीवायसीवापि यथाविभवतःशुभा॥सूक्ष्मौप्रांगणेरम्येशुचौदेशेवरेवै॥सं
स्थितेवेधयेत्कर्णौस्त्रीपुंसोर्वामदक्षिणौ॥शुक्लसूत्रसमायुक्तांसूच्याथवेधये
त्॥वेधार्हतीयनक्षत्रेक्षालयेदुष्णवारिणेति॥देवलः॥कर्णौचंद्रेरवेछायांनविशेद्
यज्जन्मनः॥तंदृष्ट्वाविलयंयांतिपुण्यौघाश्चउरुतनाःइति॥१६॥ ॥अथान्नप्राशने २६

क्षत्रनैकेनाह॥मासेषष्ठेष्टमेनुर्निगदितमशनंपंचमेसप्तमेवाभीरोरुक्मंतिनंदाहरि
वसुरजनिरिक्तकाःस्वर्क्षमेके॥सदृक्कांशक्रूरवांडेध्रुवमृदुचरभक्षिप्रभेजाग्निमीना
न्यंगेकेंद्रित्रिकोणांत्यमृतिषुविमलास्विंदुरिष्टेखिलेंगे॥१६॥जन्मचंद्रःषष्ठेऽष्टमेवा
मासिनुःनरस्यभशनंअंनप्राशनंनिगदितं॥भीरोःकन्यायाःपंचमेसप्तमेवामासे
अन्नाशनंप्रोक्तं॥ ॥अत्रनंदाहरिवसुरजनीरिक्तकाःउक्तंतिमुनयः॥नंदाप्रतिप
न्षष्ठ्येकादश्यःहरिर्द्वादशीवसुरष्टमी॥रजनीरात्रिः।रिक्ता श्चतुर्थीनवमीचतुर्दशी
नाःस्वर्क्षजन्मनक्षत्रंएकेआचार्याःअत्रउक्तंति ॥तथाचोक्तं॥जन्मर्क्षंथीक्षयंविंधा
रिति॥जन्मर्क्षंतुपुंविवाहअन्नप्राशनादिषुवर्ज्यमित्यृक्षते॥तदग्रेवक्ष्यते॥पुनःक
स्मिन्॥सदृक्कांशक्रि॥दृक्काःदृक्काणाः।अंशोनवांशः॥अहोदिनंएषांसमाहारः॥

दृक्कोणाहः॥सतोग्रहस्यदृक्कोणाहःसदृक्कोणाहःतस्मिन्कथंभूतेसदृक्कोणाह्नि॥
अचांद्रे।नविद्यतेचांद्रदृक्कोणाहोयस्मिन्ततदचांद्रंतस्मिन्।चंद्रस्यदृक्कोणाहा
निनिंद्यानि।अन्येषांशुभग्रहाणांशुभानि॥उनःकस्मिन्॥ध्रुवमृदुचरभक्षिप्रभे॥
ध्रुवा दीनिप्रसिद्धानि।पूर्वमेवोक्तानीत्यर्थः॥उनःकस्मिन्॥अजाळिमीनांत्यांगे।
अजोमेषः॥अळिर्वृश्चिकः॥मीनःप्रसिद्धः॥एभ्योन्येलग्ने॥मेषवृश्चिकमीनलग्ना
न्यंनप्राशनेनशुभानीत्यर्थः॥कामुसतीषुकेंद्रत्रिकोणांत्यमृतिषुविमलासुसतीषु
केंद्राणिचप्रथमचतुर्थसप्तमदशमानि॥त्रिकोणेनचपंचमेअंत्यंद्वादशंमृतिरष्ट
मंपरवस्त्रिगंदंदशतत्पुरुषयोः॥एतासुविमलासुपापग्रहरहितासुसतीषुशुभग्र
होत्रअनिष्टकारीत्यर्थः॥इंदुश्चंद्रःअखिलःपूर्णःअंगेलग्नेदृष्टः॥अंनप्राशनेपूर्ण

श्चंद्रोलग्नेशुभइत्यर्थः।अन्यलग्नबलंपूर्ववत्।अत्रनारदः॥षष्ठेमासेष्टमेवापि
पुंसांस्त्रीणांतुपंचमे॥सप्तमेमासिवाकार्यंनवान्नप्राशनंशिशोः।रिक्तादिनक्षयं नं
दांद्वादशीमष्टमीमर्कं।त्यक्त्वान्यतिथयःश्रेष्ठाःप्राशनेशुभवासराइति॥ज्योतिर्वि
वरणे॥जन्मर्क्षेश्रीक्षयंविद्यात्कर्मर्क्षेचातिसौख्यकृत्॥आधानर्क्षेचवाळानां प्रा
शनंरोगनाशनं॥दृढनारदः॥जीवसौम्यसितानांतुदृक्काणादिवसांशकाः॥बाळा
नप्राशनेशस्तानचंद्रोर्कज्ञारजामिति॥अर्णवे॥गौस्त्रीकुंभतुळाकन्यासिंहः
कर्किमृगोयमः॥एताश्चरादयःशस्तानमेषसप्तवृश्चिकाइति॥नारदः॥चरस्थिरमृदु
क्षिप्रनक्षत्रेषुनवैधनेइति॥श्रीपतिः॥खौलग्नेदृष्टीस्यादि॥अथयेषुसंस्कारेषु॥
गुरुशुक्रास्तादिदोषाभावः॥येषुदोषः॥बालत्वदृढत्वप्रमाणं।ज्ञानेनास्मोद्देकिंकि

नैके
ना
नकार्यमिति चतुष्टयंदृष्टैर्नाह॥ ॥गर्भाद्यैर्नानांतेषुनगुरुसितयोर्बाल्यवार्ध्येचमौढ्ये
जह्यात्कालस्यरोधाद्धरिगुरुमयनंयाम्यमूनाधिमासौ॥एतच्चौलादिषूह्येदथगुरुसि
तयोर्बाल्यवार्ध्येनगाहेचाथोनाखेत्रमौढ्येव्रतमपिनिगमारंभमार्यानकुर्यात्॥ ७ ॥
टीका॥ ॥गर्भाद्यैर्नानांतेषुगर्भाधानादिभिर्नामांतेषुकर्मसुगुरुसितयोर्बाल्य
वार्ध्येचपरंमूढ्यंगुरुशुक्रमूढत्वंनजह्याच्चत्यजेत्॥कस्माद्धेतोःकालस्यरोधान्न॥यतः
शास्त्रोक्ते गर्भाधानादीनांभक्षणानांतानांकर्मणांकालनिरोधःरूढोस्ति॥तस्माद्धेतोः।
हरिगुरुसिंहस्थितंबृहस्पतिं।याम्यमयनंदक्षिणायनंजूनाधिमासौक्षयाधिमासौ॥तस्य
जेत्कालस्यनिरोधादित्येतत्पदंबुध्यावगंतव्यं॥तद्यथा॥प्रसूतिसमयएवजातकर्मवि
हितं।तत्रातिकालनिरोधात्॥किमप्यत्रादिकंनचिंत्यं॥भक्षणंमासेषष्ठेष्टमेवेतिवि २८

कल्पेनमासद्वयेविहितंतत्रयस्मिन्मासेमौढ्यादिकंनस्यात्तत्रकर्तव्यंकालस्यसावकाश
त्वात्॥तयोरपिमासयोर्यदिसिंहस्थगुर्वादिनिरोधःस्यात्तोपत्रनचिंत्यएवंगर्भाद्यन्ना
शनांतेषुविचारणीयं॥अनन्यगतिकंकुर्यान्नित्यनैमित्तिकंतथेतिस्मरणात्॥सं
स्कारक्रमस्तुकात्यायनगृह्यकारिकायां तथाः॥गर्भाधानंपुंसवनंसीमंतोजातकर्मच॥
नामकर्मनिष्क्रमणान्नप्राशनं॥चूडोपनयनंवेदव्रतानांचचतुष्टयं॥गो
दानमेवंक्रमोकौविवाहःषोडशक्रियाइति॥अनेनक्रमेणगर्भाधानान्नांतेषुमौ
ढ्यादिकंबुध्यावलोकयेदित्यर्थः॥ ॥तथाचबृहस्पतिः॥मासंशुक्रकार्येषुमूढत्वंगु प्र
रुशुक्रयोः॥नदोषंकुरुतेमासलक्षणोबलवानिति॥यमोपि॥गर्भाधानेपिकेशास्थे
ऽकर्मणिमासिकेसपिंडीकरणेनिस्तेनाधिमासंविवर्जयेदिति॥मनुः॥सीमंतजातका दी

 नि प्राणानां तानि चक्रमात्॥ कर्णव्यानि नदोषोस्ति पंचानन गते गुरुविति॥ कात्यायन स्मृतौ॥ गर्भाधानादिकाले न प्राणानां नामलिम्लुचे॥ आकर्णवेधाः कर्णव्यानान्यरे साहभास्करइत्यादि। अस्तादिकं चूडादिषुवर्ज्यमित्याह॥ एतच्चौलादिषूक्तन्तरति। ~~स्मार्तोक्तमिताक्षरादिकं चूडादिषु वर्जनीयमित्याह॥ चूडादिषु कर्मसुउक्तस्तेनास्ति~~ एतद्गुरुसिनास्तादिकं चूडादिषुवर्जनीयमित्याह चूडादिषुकर्मसुउक्तस्तेन॥ अथ बालत्वदृढत्वप्रमाणमाह॥ अथगुरुसिनयोरिति॥ गुरुशुक्रयोर्बाल्यवार्ध्ये बालत्व दृढत्वेनगाहेसप्ताहेसप्ताहंबाल्यंसप्ताहंवार्ध्यमित्यर्थः। बालत्वंदृढत्वंबहुविधम स्तितत्रमध्यमेपक्षेत्रांगीकृतः॥ अथश्मश्रुवेशास्तेवर्जेमाह॥ अधोश्मश्रुवेशौ ष्ठइति। श्मश्रुवेशोवेदपतिर्वक्ष्यमाणस्तस्यौद्धेअस्तेव्रतंमौञ्जीबंधेगमारंभंवेदारंभ

मपिआर्यःश्रेष्ठोनकुर्यात्॥ तस्यास्तेव्रतादिकेकृतेसतिवटोर्मूर्खत्वंस्यात्॥ ननुवेदा रंभेमूर्खत्वंघटतेवेदपतित्वात्। व्रतेमूर्खत्वंकिमुक्तं। उच्यते। व्रतबंधस्यवेदाध्याय नार्थंक्रियतेतस्मात्तत्रापिमूर्खत्वंघटते॥ तथाचयाज्ञवल्क्यः॥ उपनीयगुरुःशिष्यं महाव्याहृतिपूर्वकं। वेदमध्यापयेदेनंशौचाचारंश्चशिक्षयेत्॥ प्रतिवेदंव्रतंचर्यं द्वादशाब्दानिपंचवा। ग्रहणांतिकमित्येकेकेशांतश्चैवषोडशे॥ यज्ञानांतपसांचैव शुभानांचैवकर्मणां। वेदएवद्विजातीनांनिःश्रेयसकरःपरइति। तथाचकात्याय नश्रौतसूत्रे। वेदंसमाप्यस्नायाद्व्रतचर्यांवाष्टाचत्वारिंशकंद्वादशकंपैकेगुरुणानु ज्ञातइत्यादि॥ ॥ अथचौलंसनिर्णयंहनडुयेनाह॥ ॥ चौलंमाघादिपंचस्वमधु शुगदितंहित्रिपंचोन्नितेब्देस्वाचाणहासगर्भायदिभवतिजनन्यत्रनोकार्यमेतत्। सा

कंयत्रोपनीत्याक्रियतइहतदायंनिरोधोनहिस्याज्ज्यादंबार्त्तवेदोव्रतमुपयमनंका
विष्णुहेःशुभाथी॥८॥ ॥दी०॥चौलंचूडाकरणंमाघार्सचसुमासेषुअमधुशुचैत्र
हितेषुगदितंउक्तं॥तथाचोक्तंनारदेन॥माघादिपंचकेचौलंहित्वाक्षीणविधुंमधु
मिति॥द्वित्रिपंचोन्मितेब्देद्वितीयेपंचमेवर्षेस्वाचारद्वास्यकुलाचारतोवा।तथा
चकाश्यायनवृद्धौ।सांवत्सरिकस्यचूडाकरणंतृतीयेवाप्रतिहतेषोडशवर्षस्य
केशांतोयथामंगलंवासर्वेषामिति।सांवत्सरिकस्यातिक्रांताब्देसेतिहरिहरभिश्चे
श्वरव्याख्यातं।तथाचपद्मुरुशिष्यः।आद्येब्देकुर्वतेकेचित्पंचमेन्येद्वितीयके।उपनी
तिसहैवेतिविकल्पाःकुलधर्मतः।सगर्भोयदिभवतिजनन्यत्रनोकार्यमेतत्अ
त्रउक्तेषुवर्षेषुद्वित्रिपंचाब्दकेषुजननीकुमारस्यमातायदिसगर्भाभवति॥गर्भव

तीस्यात्तदाएतच्चौलंनोकार्यं।पंचमाद्ध्वंगर्भिण्यांसत्यामपिकार्यमित्यर्थसि
द्धंअत्रनारदः॥स्तनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत्॥पंचाब्दात्प्रागथोर्ध्वंतु
गर्भिण्यामपिकारयेदिति॥उपनयनेनसहकिंयमाणेनदोषइत्याह॥सकंयत्रोप
नीत्याक्रियतइतितदायंनीरोधोनहिस्यादिति।यत्रतूपनीत्यासकंउपनयनेनसह
क्रियतेतदाइहास्मिन्चौलेअमुकोनिरोधश्चैत्रमासमात्रगर्भलक्षणोनस्यात्॥तदुक्तंतत्रैव॥सहोपनीत्याकर्मापिचेत्तदादोषोनविद्यतइति॥अंबाचेवेति
शिष्टमाह॥अंबाविष्णुहेःशुद्धिपर्यंतंएतत्रयंजन्यास्यजेत्॥नकुर्यादित्यर्थः॥तथा
चमनुस्मृतौ॥उद्वाहव्रतचूडासुमातायदिरजस्वला॥तदानमंगलंकार्यंशुद्धौका
र्यंशुभेशुभिरिति॥अन्यमुहूर्तालाभेकारिकानिबंधेउक्तंअलाभेमुमुहूर्तस्यरजो दो

षेतुसंस्थिते॥श्रियंसंप्राप्नुयात्कुर्यात्तत्रहस्ताभयंकरौ।हैमीमाषमितांपद्मांश्री
सूक्तविधिनार्चयेत्॥घृतेचंपायसंहुत्वाभिषिच्यशुभमाचरेत्॥सूतिकोदक्य
योःशुद्धौगोदद्याद्धोमपूर्वकं॥प्राप्तेकर्मणिशुद्धिःस्यादित्तरस्मिन्नशुध्यति।उद
क्यारजस्वला॥अथवर्णविशेषेणवारविशेषंतथानक्षत्राणिलग्नबलंचदृष्ट्वैनेके
नाह॥ ॥कार्यंवर्णैरिनारकिंनिशुनिखिलैस्तत्रयेशुक्रसौम्येज्यांत्यादिसशा
केंदुभिरिनहरितस्त्रित्रिभैश्चौलकर्म॥धूनेर्कारकिंशुक्रागतकविनिखिलामृत्युगा
मृत्युदाःस्युर्व्यज्याःसंनोत्यरुष्टास्त्यजगुरुन्नाशिनोरविसंध्येचरिक्काः॥९॥ ॥दी०
वर्णैश्चौलणादिभिःयथाक्रमेणयथाइनारकिंनिशुचौलंकार्यमित्यन्वयः॥इनः सू
र्यःआरेभौमः॥आर्किःशनिःनेषित्यर्थः॥एतदुक्तंभवति॥विशेषणरविवारेक्षत्रियेण

भौमवारे॥वैश्येनशनिवारेशूद्रेणशनिवारेचौलंकर्त्तव्यमित्यर्थः॥शूद्रस्यहृदशसं
स्काराउक्ताः॥वेदव्रतोपनयनमहानाम्नीमहाव्रतंविनाहृदशशूद्राणांसंस्काराणाम
मंत्रताइति॥निखिलैरितिनिखिलैश्चतुर्भिर्वर्णैर्विशेषेणशत्रयेषुधत्रयेशुक्लगत
सोमवारेकार्यं॥कृष्णपक्षीयसोमवारेनिंदितःक्षीणत्वात॥अत्रनारदः॥अपर्वरिक्का
तिथिष्वशुक्रज्ञेज्येंदुवासरेइत्यादि॥बृहस्पतिः॥सोमवारेसितेपक्षेकृष्णपक्षेतिग
र्हितः॥बुधवारःशुभःप्रोक्तःपापयुक्तेबुधे॥पापयुक्तौवारौद्वौविप्राणांशुभदो
रवेः॥क्षत्रियाणांक्षमासूनुर्विट्शूद्राणांशनिःशुभः॥द्यौत्यद्यादित्यशाकेंदुभिः॥
अंत्येदेइतिद्यात्यंरवत्यश्विन्यौद्यादित्यंपुनर्वसुपुष्ये॥शाकेंज्येष्ठाइंदुमृगतैः॥पुन
र्वसुःइनहरितस्त्रिभिः॥इनोहस्तःहरिश्रवणःताभ्यांत्रित्रिभिः॥हस्तात्रिभिःश्रवणात्रि

भिः॥तथाचनारदः॥दस्रांदितीज्यचंद्रेंद्रपाभानिशुभान्यतः॥चौलकर्मणिहस्तर्क्षा
त्रीणि त्रीणिचविशुभादिति॥द्यूनेकीरर्किशुक्राः॥अत्रचौलेमृत्युदाःस्युः॥द्यूनेस
मेअर्कीरर्किशुक्राः॥अर्कःसूर्यःआर्किःशनिःआरेभौमःशुक्रःप्रसिद्धः॥एतेचता
रेमृत्युदाइति॥चतुर्णांसामान्यंफलमुक्तं॥वसिष्ठेनात्रविशेषफलमुक्तं॥जामित्रेभा
स्करेक्षौरेमृत्युःस्याद्भूमिजेतथा॥शुक्रेसौख्यविनाशःस्यान्मंदभाग्यंशनैश्चरइतिअ
त्रचतुर्णामपिसामान्येनमृत्युफलमुक्तंतद्दारिद्र्यान्मरणंवरमितिन्यायेनेतिनदोषः।
गतकविनिखिलामृत्युदाःस्युः॥गतःकविःशुक्रोयेभ्यस्तेगतकवयःतेचतेनिखिला
श्शुक्ररहिताःसर्वेमृत्युगाअष्टमगामृत्युदाःस्युः॥अत्रबृहस्पतिः॥अष्टमस्थागताः
सर्वेनेष्टाःशुक्रविवर्जिताः॥शुक्रस्तुनिधनेक्षौरेसर्वेसंपत्प्रदःस्मृतिरिति॥व्यज्ञाःसंतं २२

स्तृष्टाविगतःअब्जश्चंद्रोएभ्यस्तेव्यज्ञाः॥एवंविधाःसंतःसत्यहाःचंद्ररहिताःभंसे
ह्यदशेइष्टाःस्युः॥नारदः॥चौलान्नप्राशनोत्सवास्तासौम्यारंभ्ययोपगाइति॥अन्यच्च
२३ नेधनेभौमीतोक्षौपष्ठाष्टांत्यविवर्जितइति॥तस्यैववचनं॥अन्यल्लग्नबलेपूर्वव
त्॥स्यज्गुरुशशिनोरात्रिसंध्येचरिक्ताः।गुरुःपक्षीशशी पौर्णिमा॥स्पष्टमन्यत्॥क्रूर
वारेनिशारिक्तांपक्षीसंध्यांचजन्मभं॥वर्जयेदितिनारदवचनात्॥अथप्रसंगात्क्षौ
रनिर्णयंसाईदृत्तेनैकेनाह॥तत्रादौअमुंडनामाह॥ ॥श्लो०॥ ॥भुक्ताभ्यक्तोपवा
सीश्वरजनसुवनीप्राग्वयस्काश्चयोगीयात्रायुद्वोन्मुखायेकृतदिनविधयोस्यंवका
लेनमुंड्याः॥सीमंतोन्नैनपत्युर्नखकचलवनंदूरदेशप्रयाणंवृक्षच्छेदःसमुद्रास्नुति
र्दृतिहरणेस्याद्दृतेवत्रयकार्यान्॥२०॥ ॥टी०॥ ॥भुक्तःकृतभोजनःअभ्यक्तःकृताभ्यंगः

उपवासी। ईश्वरोजनोराजसेवकःसमर्थोवा॥युवतीस्त्रीसौभाग्यवती। वृद्धवयस्कः। प्रथमवयस्कः। पंचाशद्वर्षपर्यंतंप्रथमवयः। योगीराज योगिन्यादौप्रसिद्धः॥यात्रा युद्धोन्मुखाः। यात्राप्रयाणंयुद्धंतौप्रतियेऽन्मुखाःसन्मुखाः॥यात्रोन्मुखाःयुद्धोन्मुखाश्चेत्यर्थः॥अस्त्यंबकोजीवत्पितृकः॥कृतंदिनकर्मआह्निकं येनासौकृतदिनकर्मा एतेनमुंड्याः। अवश्यकाद्दृत्तइत्युत्तरश्लोकोक्तमंत्रानुसंधेयं॥अत्रअवश्यमुंडनं करणंभवतितत्रावश्यंमुंड्याः॥ ॥अथक्षौरनिषेधप्रसंगादुर्विणीपतेर्निषिद्धंसापवादमाह॥सीमंतोर्ध्वमिति॥सीमंतोर्ध्वंसीमंतोन्नयनादूर्ध्वंपत्युःकृतसीमंतसंस्कारणः भर्तुरवश्यकार्यादृतेनखकचलवनादिकंनस्यात्॥लवनंनामच्छेदनं॥अन्यत्सुगमं॥अवश्यकार्येनदोषः॥यथापितृमरणेक्षौरादि॥देशविप्लवेदेशांतरगमनं॥इत्या

२२०

दिविचारणयाऽवश्यकेनदोषइत्यर्थः॥कृताग्न्याधानस्यमुंडनंपक्षांतरेमुंडनमावश्यकं॥मासिमास्युपानिकस्यमन्यपक्षेपक्षेऽग्निहोत्रिणइति॥अथोक्तेभ्योन्येषांक्षौरार्थंनक्षत्रादिकमाह॥क्षौरंचौलोक्तभादौगदित्तमथरविक्षेत्रंगंगाध्वरग्न्याधानेपित्रोर्विनाशेद्विजनृपकथनेसर्वदाक्षौरमिष्टं॥मित्रऋक्षादितींद्रांतिमहरितुरगैः पंचमेह्नेवृत्तात्पौविद्यारंभोक्तकालेऽक्षरविधिरयंदेसौम्यसंज्ञेयनेर्के॥२७॥

टी०॥ ॥चौलोक्तभादौक्षौरंगदित्तंचौलार्थंउक्तःसचासौभादिश्चतस्मिन्नक्षत्रतिथादिकालेक्षौरंगदित्तंप्रोक्तं॥अथक्षौरनिमित्तान्याह॥रविक्षेत्रंगंगाध्वरग्न्याधानेपित्रोर्विनाशेइत्यादि॥रविक्षेत्रंभास्करक्षेत्रंगंगाच०अध्वरेयागः॥अग्न्याधानंप्रसिद्धं॥तस्मिन्पित्रोर्विनाशेमरणं॥तस्मिंद्विजनृपकथनेब्राह्मणाज्ञायांराजाज्ञायांचसत्यां।स

र्वदाक्षौरंदृष्टंस्यात्॥क्षौरेनक्षत्रादिनियमोनास्तीत्यर्थः॥उक्तंचवृत्तरत्नाते॥भुक्ताभ्यक्तनि
रञ्जनेत्यादि॥रत्नमालायां॥आज्ञयानरपतेर्द्विजन्मनामित्यादि॥बृहस्पतिः॥राजकार्यै
र्नियुक्तानांनराणांभूपसेविनां॥श्मश्रुलोमनखछेदेनास्तिकालविशोधनं॥ज्योतिर्निबं
धे॥राजयोगीश्वरंश्रीचमातापित्रोश्चजीवतोः॥मुंडनंसर्वतीर्थेषुनकुर्याद्दुर्विणीपतिः॥
स्मृत्यंतरे॥सिंधुस्नानंद्रुमच्छेदंस्तवनंप्रेतवाहनं॥विदेशगमनंचैवन कुर्याद्दुर्विणीप
तिः॥क्षौरंनिमित्तिकंकुर्यान्निषेधेसत्यपिध्रुवं॥पित्रोःप्रेतविधानंचनदोषस्तत्रविद्यते॥गं
गायांभास्करक्षेत्रेमातापित्रोर्मृतेहनि॥आधानेसोमपानेचषट्क्षौरंविधीयते॥अंत सु
र्वत्न्यांनुजातायांतीर्थेक्षौरंनकारयेत्॥प्रेतवाहादिकंचैवनसीमोल्लंघयेत्क्वचित्॥पंचाशद्वा
यनात्पूर्वंक्षौरंनिमित्तिकंविना॥नकुर्यात्तत्तदूर्ध्वंतुस्वेच्छयापवनंचरेदिति॥अथर्क्षरा ३५

अ

रंभंदत्ताईनाह॥ ॥मित्रज्यर्केनिमित्तादिभिर्नक्षत्रैर्जन्मतः॥पंचमेवर्षेव्रतात्व्रतवं
धात्प्राक्प्रथमविद्यारंभोक्तकाळेवक्ष्यमाणऋक्षेअक्षरविधिःप्रथमाक्षरारंभविधिः
शुभःस्यादित्यध्याहारः॥कस्मिन्सतिसोम्यसंज्ञेऽर्केयनेसति॥कथंभूतेर्केअघटेनवि
घतेयदोयस्मिन्नथातस्मिन्कुंभरहितउत्तरायणइत्यर्थः॥ ॥व्रतंतुल्येऽयनलक्षणं।
कर्किमृगादिषट्केतेचायनेदक्षिणसौम्यकेस्तइति॥मित्रंअनुराधा।ज्यर्कंहस्तत्रयं।
अदितिःपुनर्वसुः॥इंद्रोज्येष्ठा।अंतिमंरेवती।हरिःश्रवणः।तुरगोश्विनी।त्रयंप्रथम
मेवव्याख्यातंव्रतात्सागित्यनेनव्रतबंधादुपरिनिषेधोयत्सिद्धः॥पंचमेवर्षेपठनरूपा
व्रतबंधोग्रेवक्ष्यति॥तथाचोक्तंबृहस्पतिना॥द्विनीयजन्मतःपूर्वमारंभेनाक्षरान्कुधी
रिति॥नृसिंहः॥अक्षरस्वीकृतिःप्रोक्तापञ्चमेपंचमहायने॥उत्तरायणगेसूर्येकुंभमासंवि

वर्जयेदिति॥ ॥अथ ब्रह्मक्षत्रियविशांमुख्यंगौणंचव्रतबंधेकालंदृष्ट्वेनाह॥ ॥वि
प्रादेर्गर्भतो द्वेष्टमेशिवरविमितेजन्मतोवाव्रतंस्यादत्रानिष्टेपिजीवेनिमिषरविमधौका
र्यमब्दस्यदार्द्यात्॥स्वाब्दादूर्ध्वंक्रमादाद्विगुणितशरदो १६।२२।२४॥निंद्यमब्दक्रमेण
पंचाष्टांकाब्दतोवाप्यपठनरुचितःशस्तमेषांतदा ह्युः॥२२॥गर्भतःगर्भाधानात्जन्म
तोवाअष्टमेशिवरविमितऽब्देविप्रादेर्व्रतं स्यात्॥विप्रस्याष्टमेक्षत्रियस्यशिवमि
तेएकादशेवर्षेवैश्यस्यरविमितेद्वादशेक्षत्रियस्यजीवेगुरौअनिष्टेअशुभेपिसतिव्र
तंकार्यं॥कऽअनिमिषरविमधौऽनिमिषेरविःऽअनिमिषरविः॥तेनविशिष्टोमधुःतस्मि
न्।अनिमिषःमीनःमीनस्थेरवौसतिचैत्रेव्रतंकर्त्तव्यमित्यर्थः॥ऋतुः॥अब्दस्यदार्द्यो
क्तवर्षबलात्॥तदुक्तंसंग्रहे॥शुद्धिर्नविद्यतेयस्यवर्षंप्राप्तेष्टमेयदि॥चैत्रेमीनगतेभा ३५

नौतस्योपनयनंशुभं॥जन्मभादष्टगेसिंहेनीचेवाशत्रुभेगुरौ॥ ॥अथगौणकालेऽ
ब्दमाह॥स्वाब्दादूर्ध्वंक्रमादिति॥स्वाब्दात्स्ववर्षात्तदुर्ध्वंक्रमाद्विगुणिताः॥शरदःद्वि
गुणिताचासौशरश्चद्विगुणितशर तेवर्षेतांमर्यादांकृत्वेतितथातस्याः अ
ब्दक्रमेणनिंद्यं॥एतदुक्तंभवति॥स्वाब्दादूर्ध्वंस्वद्विगुणितवर्षपर्यंतंअब्दक्रमेणनिं
द्यं॥तद्यथा॥ब्राह्मणस्याष्टमं वर्षंमुख्यं॥तद्द्विगुणितषोडशं॥अष्टमवर्षात्षो
डशवर्षपर्यंतंब्राह्मणस्य॥एकादशवर्षाद्द्वाविंशपर्यंतंक्षत्रियस्य॥अब्दक्रमेण
उत्तरोत्तरेणनिंद्यं॥अर्वाक्तनऊर्ध्वमनधिकारिणोभवंति॥तदुक्तंसंग्रहे॥नृपा १६॥
ऋति २२॥जिना २४ ह्यंतेनातिकालस्ततःपरं॥पतित्यंस्यादयाजादेर्व्रात्यस्तोमोविशोधे
नमिति॥तथाचकात्यायनगृह्ये॥आषोडशाद्वर्षाद्ब्राह्मणस्याननीतःकालोभवत्या

मा.टी. ह्यविंशान्नृपजन्यस्याच नुर्विंशाद्वैश्यस्यात्॥नुर्ध्वंपतितसावित्रीकाभवंति॥नैनानुप
३६ नयेयुःनाध्यापयेयुःनयाजयेयुःनचैभिर्व्यवहरेयुः॥कालातिक्रमेनियतवत्रिपुरुषं
पतितसावित्रीकाणामन्येसंस्कारेनाध्यापनंतेषांसंस्कारेषुश्रौत्यस्तो मेनेष्ट्वाकाम
मयीयंव्यवहार्यीभवंतीतिवचनादिति॥अथस्वाध्यास्वागपिअध्ययनोत्सुक्यात्उ
पनयनकालमाह॥पंचाष्टाकाद्वतोवेति॥पंचमाष्टमनवमवर्षेभ्यःसकाशात्एषांब्र
त्र ह्मक्षत्रियविशांक्रमेणोपठनरुचितःवेदादिपठनरुच्यातत्रतंशास्तमाहुर्मुनयः॥उ
क्तंचसंग्रहे॥ब्रह्मवर्चसमोजश्चविद्यायुःश्रीर्यशःसुखं॥विप्रादेरुपनीतस्यपंचाष्टाका
द्वतःफलमिति॥अथात्रगुरुबलाबलमाह॥द्वाभ्यांनाह॥ ॥राशेःषड्त्र्याद्यखस्थो
गुरुरिहशुभदःप्रजयास्यात्तथापिप्रांसोबुस्थोष्टमोनोयदिनिजगृहगस्तुंगगोत्रापि१२ ३६

४।८। शास्तः।एवंकन्यर्क्षतःस्यादतिनरगुणिनोलब्धयेवातिकालेनि. ष्टेपीहद्विर्
च्यैष्टमभवनगतःशोभनस्यात्त्रिरर्च्यः॥२३॥राशेर्जन्मराशेःसकाशात्षड्त्र्याद्यख
स्थोगुरुःइहास्मिन्व्रतबंधेप्रजयाशुभदःस्यात्॥षड्षष्ठं॥त्रयस्तृतीयं।आद्यंजन्म
राशिःखंदशमं।एषुतिष्ठतीतितथातथापिप्रजयापिप्रांसोद्वादशः॥अंबुस्थश्चतु
र्थःनोशुभदःस्यात्॥प्रजयाप्यशुभदःस्यात्॥सयदिनिजगृहगःधनुर्मीनगतइत्य
र्थः॥तुंगगोवायदिभवतितदाइहदुष्टस्थानेषुवर्तमानःशास्तःस्यात्॥अस्यतुंगंकर्क
दःअर्थाद्दुष्टस्थानेभ्योन्यस्थानगःशुभदःस्यात्॥एवंकंन्यर्क्षतःस्यात्॥कंन्यर्क्षतः
कन्यराशेःसकाशात्एवंशुक्रवत्शुभाशुभस्यात्॥अतिनरगुणिनोवरस्यलब्धयेअ
तिकालेवाअनिष्टेगुरुर्द्वादशंचतुर्थोष्टमगःद्विरर्च्यः॥षड्त्र्याद्यखस्थस्शास्त्रेवाप्र

जो क्रान्तस्य माणतोहिरर्च्यः।तेनद्विगुणार्चनेनशस्तःशोभनःस्यात्॥एवं सामान्ये
नोत्कअष्टमस्यविशेषमाह॥अष्टमभवनगतःत्रिरर्च्यः॥तेनशोभनःस्यात्॥अत्र
बृहस्पतिः॥क्षपक्वापक्वजीवस्थोजीवोप्यशुभगोचरः॥अतिशोभनतांदद्याद्विवाहो
पनयादिषु॥व्रतेजन्मत्रिखारिस्थोजीवोपीष्टोर्चनात्सकृत्॥शुभोतिकालेतुर्याष्ट
व्ययस्थोद्विगुणार्चनात्॥उक्तंहतत्रैकन्यर्क्षेद्विसुतद्यूनायनवमेश्रेष्ठोगुरुःश्रान्य
थापूज्योष्टांत्यसप्तखेतिकालइहनुःप्राप्तिर्हिरर्चःशुभः।रिःफांबुत्रिधनाभगैर्यदिस्व
गैःश्रेष्ठोपिविरोत्यसन्वामंविद्रुद्रेष्टदोननिधनेवेधःस्थिरर्चःशुभः॥ ॥अथगुरो
र्वामवेधमाह॥द्वीषायागांकसंस्थोव्ययजळनिधनत्र्यभगैश्चन्नविद्रुः शस्तोनिष्टो
पिवामंशुभद्रुखचरैर्वेधितोनोष्टमस्थः॥शुक्रेमाद्यादिपंचस्थिनशुभदिवसेप्राग्द

लेक्षोव्रतंसत्यक्त्वानध्यायरिक्तातिथिमुनिमदनांशोद्रुभागंप्रदोषं॥२५॥ ॥द्वीषा
कयागांसंस्थोगुरुस्तदाशुभस्यात्॥तदाकदा॥यदिजळव्ययेनिधनत्र्यभगैर्नोविद्रुःस्या य
त्॥द्विद्वित्रीयं॥द्रुःपंचमं॥आयएकादशंभगाःसप्तमं।अंकाःनवमं।एतत्संस्थो
गुरुर्व्ययःद्वादशं।जळंचतुर्थं।निधनेअष्टमं।त्रय स्तृतीयं।अभंदशमं।एतत्संस्थैः
खचरैर्यदिनोविद्धोभवति।तदाशुभःस्यात्॥वेधितश्चेदशुभइत्यर्थः॥अनिष्टोपिव्य
यजळनिधनत्र्यभगोपिवामंविद्रुःसन्द्वीषायागांकसंस्थैःखचरैःवेधितःसंनित्य
र्थः॥इहास्मिन्व्रतबंधेविवाहेचाशुभःस्यान्नोष्टमस्थः॥अष्टमस्थोवेधितोपिनशुभ
स्यादित्यर्थः॥सोतिकाळादौत्रिगुणार्चनादेवशुभःस्यात्॥तथाचबृहस्पतिः॥रज
स्वळायदाकन्यागुरुश्चद्विनचिंतयेत्॥अष्टमेपिप्रकर्त्तव्योविवाहःत्रिगुणार्चनादिति

अथोपनयनेमासादिकमाह॥ ॥शुक्लेति॥शुक्लेपक्षेमाघादिपंचसुमासेषुज्येष्ठो
त्तेषुइनशुभदिवसे॥इनःसूर्यःशुभाःवर्द्धमानेंदुबुधगुरुशुक्राःएषांदिवसस्तस्मि
नहःप्राग्द्वेदिवसपूर्वेह्नी॥व्रतंउपनयनंसत्शुभंस्यात्॥किंकृत्वा॥अनध्यायरिक्ता
तिथिमुनिमदनान्।चंद्रभागंप्रदोषंचत्यक्त्वा॥अनध्यायावक्ष्यमाणाः॥रिक्तातिथ
योचतुर्थीनवमीचतुर्दशीः॥मुनिःसप्तमीमदनस्त्रयोदशी॥एतान्॥चंद्रभागःकर्क
नः॥पापांशाधिकैरेवनिषेधितं।प्रदोषःअनध्यायप्रकरणोक्तःनंस्यक्त्वा॥अथ
नक्षत्राण्याह॥ ॥रुद्रोह्यश्विन्यार्कांतकपित्र्यहितैःसर्वैमैत्रजिवंधोवेदेशै
रेवत्याद्येगुरुसितकुजविसंज्ञकावेदपाःस्युः॥स्वर्क्षेश्वांशेशुसौम्याःश्रुतिपतिरपि
चेत्केंद्रकोणस्थितास्युर्वर्णीवेदार्थवेत्तापशुगृहधनवान्त्र॥४।७।१०।११।६।मंदे

त्यसेवी॥२५॥ ॥दी०॥ ॥स्पष्टोऽर्कश्चमघाचभरणीज्येष्ठाविशाखाश्चैवरुक्षसं
ज्ञकाः॥नक्षत्रपंचकंप्राज्ञैर्नयात्यंव्रतबंधनइति।कस्मिन्सतिवेदज्ञेवेदपतौशु
भेवत्याद्येसति॥रुद्रानादिवत्यसमृद्धेसति।तेकेवेदज्ञाइत्यपेक्षायामाह॥गुरु
सितकुजविसंज्ञकाःवेदपाःस्युःगुरुःऋग्वेदस्य॥शुक्रःयजुर्वेदस्य।भौमःसामवे
दस्य।बुधःअथर्ववेदस्यपतिरस्यर्थः॥अथलग्नगोचरमाह॥ ॥स्वर्क्षेश्वांशेशु
सौम्याःस्वोच्चस्वभांशेवर्त्तमानाः॥श्रुतिर्वेदस्तस्यपतिरपिस्वोच्चस्वभांशेवर्त्तमान
श्चेद्यदिकेंद्रकोणस्थानस्थाःस्युस्तदावर्णीब्रह्मचारीवेदार्थवेत्तास्यात्॥नकेवलं
वेदार्थवेत्तास्यात्॥अपिगृहेधनपशुमान्स्यात्॥अत्रकेंद्रकोणेत्रिकोणेमंदेज्ञौ
सतिअंत्यसेवीअंत्यजसेवकःस्यात्॥तस्मात्केंद्रकोणेज्ञोनिर्नभवितव्यः॥उक्तंसंग्रहे

केंद्रस्थितै रिनाद्यैर्नृपसेविविद्क्रियोस्त्रवृत्तिश्च।वेदाभ्यासीयज्ञाक्रतुकर्त्तीहीनसे
वकोभवति॥लग्नभमाह॥ ॥चंद्रक्रूरविलग्नेशशिसितनृपाःषष्ठगेहेसितांत्येसर्वे
रंध्रेवदुघ्नाःकचनतनुगइनःश्रेष्ठउच्चेडरेके॥विद्यांमौंज्युक्तकालेस्थिरचरहरिभ
स्युन्नरश्चास्यहीनेमौंज्याऊर्ध्वंगणेशंगिरमपिविधिवत्पूजयित्वारभेत॥२६॥ ॥
चंद्रक्रूरविलग्नेशशिसितनृपाःषष्ठगेहेसितःशुक्रःशेषंसुगमं।सितोंत्ये२२स्पष्टं।
सर्वेरंध्रे।रंध्रंअष्टमं।स्पष्टं।एतेपत्येकंबदुघ्नाः॥बदुमारकाभवौ॥कचक्वचिदन्य ति
लग्नाभावेतनुगःलग्नगःरविःशुभःस्यात्॥उक्तंमौंजीपटले॥शुभदोबलवान्भानुर्ल
ग्नगोदशमस्तथा॥सर्वशास्त्राधिपोयस्मात्सर्वेषांव्रतबंधने॥सर्वशास्त्राधिपोभानुः
केचिदूचुर्महर्षयः॥तस्माद्व्यंतरेभावेलग्नस्थोर्कःप्रशस्यतइति॥एकेमुनयः।उच्चें ३९

डुरुच्चसंस्थश्चंद्रःतनुगःश्रेष्ठइतिवदंति॥तदाक्यं॥चंद्रोदयेभिशस्तःस्यात्क्षयरो
गीसितेतरे॥सितेपक्षेभवेद्यज्ञास्वभेतुंगेविशेषतइति॥अस्यार्थः।सितेतरेकृ
ष्णेचद्रोदयेचंद्रयुक्तलग्नेसति॥व्रतीअभिशस्तःस्यात्॥क्षयरोगीस्यात्॥अभि
शस्तोनाममिथ्याभिशप्तः॥अनेनेदंपातकंकृतमितिमिथ्यावदंति॥सअभिशस्तः
।एवंविधस्यादित्यर्थः॥क्षयरोगीस्यादितिकृष्णपक्षे॥लग्नस्थचंद्रफळमुक्तं॥सि
ते पक्षेभवेद्यज्ञेत्यादिस्पष्टं॥अयंश्लोकःपुनःसंस्कारविषयइवप्रतिभाति॥
यतःकृष्णपक्षेलग्नस्थचंद्रफळमुक्तं॥तस्यदिवाऽसंभवात्॥पुनःसंस्कारस्तु
कर्मलोपभयात्॥एतावपिसंस्कारौविहितोनान्यस्य॥यथमद्यनबंधस्तुसर्वैर्यैर्यथ
कारैर्दिवैवपूर्वोक्तैर्विहितोनरात्रौ॥अतःकारणादिदंवचनं॥पुनःसंस्कारविषयंप

तिभाति॥उनःसंस्कारनिमित्तानिधर्मशास्त्रेप्रसिद्धानि।तादृग्वाक्यंरत्नमालायां।
त्रिषट्नवगोर्कत्रिधानस्तकर्मगश्चंद्रस्त्रिषष्ठायनिरुडुभौमः॥सर्वेचलाभेद्वित्रि
कोणलाभगाःशुभाशुभास्सुव्रतबंधकालइति॥अत्रतृतीयस्थसूर्यस्यरात्रिगतल
ग्नेसंभवः॥नारदेनतुलग्नस्थचंद्रेनिंदितएव॥तद्वाक्यमेवं॥स्त्रीत्वसंस्थोपिशी ता
शुव्रतिनोयदिलग्नगः।तंकरोतिशिवंनित्यंसततंक्षयरोगिणंइति॥अन्यत्सुमुह
र्तपूर्ववत्॥अथविद्यारंभंदृष्ट्वाहैनाह॥विद्यांमौंज्युक्तकालेइति॥मौंज्यानुर्ध्वंमौं
ज्युक्तकालेविद्यामारभेत।मौंज्यर्थमुक्तःमौंज्युक्तःसचासौकालश्चतस्मिन्विद्यां
वेदंआरभेत॥मौंज्याःनुर्ध्वमित्यनेनमौंज्याःप्रागनधिकारःसूचितः॥किंकृत्वा॥
गणेशंगिरमपिसरस्वतीमपिविधिवत्विधुक्तमार्गेणपूजयित्वा॥कथंभूतेमौंज्यु ४०

क्तेकालेस्थिरचरहरिभस्युत्तरब्राह्म्यहीने।स्थिरचरलग्नंतिस्रृणांउत्तराणांसमाहा
रस्त्युत्तरं॥ब्राह्म्यंरोहिणी।एभिर्हीनेरहिते॥मौंज्यर्थमेतानिगृह्यतानितानिवि
द्यारंभेनग्राह्याणीत्यर्थः॥स्थिरेजानुं।घंगेसुविद्यामिः॥चरेभ्रमतिश्रवणात्॥अ
थकेशांतंमौंज्याविमोक्षंचदृष्ट्वाहैनाह॥केशांतंचौलवत्स्यान्नृपमितवारदीक्षायु
र्यात्रतोकेकालेमौंजीविमोक्षंगुरुबलमनयोर्नीवलोक्यंसुधीभिःशूद्राणांमौंज्य
भावान्नउदितंतिथिभेनस्तभौमेज्यशुक्रैर्व्यारेवारेलवेमास्युपयमविहितेशूरि
काबंधमाहुः॥२७॥ ॥टी०॥ ॥केशांतंकर्मनृपमितवारदि षोडशेचवर्षेचौलंव
स्यादित्याहुः॥आर्याः॥सर्वचौलोक्तमत्रग्राह्यमित्यर्थः॥व्रतोकेकालेमौंजीविमो
क्षमाहुः॥सुगमं॥अनयोःकेशांतमौंजीविमोक्षयोर्गुरुबलंसुधीभिःनावलोक्यं।

अथशूद्रस्यमौंज्यभावान्छुरिकाबंधंदत्राहैनाह॥शूद्राणामिति॥
शूद्राणांमौंज्याःअभावात्तदुदितंतिथिभेमौंज्युक्तंतिथिनक्षत्रे॥अनलभौमेज्य
शुक्रैःउदितैःभौमेज्यशुक्रैःव्यारेवारेआरेभौमस्तद्हितवारे।लग्नेनवांशे।यत्रकुत्रा
पिनवांशेभौमनवांशवर्जितइत्यर्थः॥उपयमविहितेमासिविवाहोक्तमासेवि वाहोप
यमौसमावित्यर्थः।छुरिकाबंधंकटिप्रदेशेछुरिकाबंधंमुनयआहुः।तथाचसंग्रहे॥
शूद्राणांराजपुत्राणांमौंज्यभावस्त्रबंधनं॥मौंजीबंधोक्तितिथ्यादौकार्यभौमदिनंवि
नेति॥ ॥तथाचनारदः॥ ॥छुरिकाबंधनंवक्ष्येनृपाणांप्राक्करग्रहात्॥विवाहोक्तेषु
मासेषुशुक्लपक्षेप्यनलगे॥जीवेशुक्रेचभूपुत्रेचंद्रताराबलान्विते॥मौंजीबंधर्क्षति
थिष्वृक्षजवर्जितवासरे॥तेषांनवांशकेवक्रेरष्टमोदयवर्जिते॥शुद्धेष्टमेविलग्नषड ४१

ष्ठांत्यविवर्जिते॥धनत्रिकोणकेंद्रस्थैःशुभैस्त्र्यायरिगैःपरैःछुरिकाबंधनंकार्यमर्चयि
त्वासुरान्पितॄन्॥अर्चयेच्छुरिकांसम्यक्देवतानांचसन्निधौ॥ततःसुलग्नेवभीयात्क
द्यांलक्षणसंयुतां॥तस्यास्तुलक्षणंवक्ष्येयदुक्तंब्रह्मणापुरा॥संमितेछुरिकायामंविला
रेणैवनाड्येत्॥भा-तंगजसंस्थैश्चअंगुल्यानपरिकल्पयेत्॥त्रेपंचैवफलंवक्ष्येध्व
जायेधनवान्भवेत्॥धूमायेमरणंसिंहेजयश्वायेतिरोगवान्॥धनलाभेवृषेस्यंतेदुः
खीभवतिगर्दभे।गजायेत्यंतसंप्रीतिर्ध्वांक्षेविघ्नविनाशिनमिति॥सर्वत्रऽऽयात्रकरणो
दितंविलोक्यं।अस्मिन्प्रकरणेकर्णवेधदत्तंविनासर्वाणिस्त्रग्धरावृत्तानि॥ ॥अथ
विवाहप्रकरणंविवक्षुस्तावद्दुष्टितंगुणविचारंचहृदाद्यवृत्तैराह॥ ॥शुद्धांगोत्रकु
लादिभिर्गुणयुतांकांतांवरश्चोद्वहेद्वर्णोवश्यभयोनिखेचरगणाःकूटंचनाडिकमात्॥

रूतिसोक्तमुद्वहेन्मानवो वल्लभां यां गर्भीधानादिसंस्कारप्रकरणं॥॥

वर्णोद्यावलिनोयथोत्तरमहीदूर्ध्वंगुणैक्यंशुभंवर्णाविप्रमुखाश्चषादिहचरेवर्णोत्तमः
स्याच्छुभः॥२८॥ ॥अतःपरमत्रग्रंथेसर्वाणिऋक्षाद्दैवविक्रीडितानि॥वरःगोत्रकुळादि
भिःशुद्धांकांतांकमनीयंकन्यांउद्वहेत्।विवाहयेत्॥चकारात्तद्वरश्चएवंविधोभा
व्यः॥गोत्रशुद्धिर्ग्रंथांतरात्ज्ञातव्या॥कुळमपिसप्तमीपंचमीनिर्णयमपिएतद्ग्रंथं
थांतरात्ज्ञालाअन्यदत्रावलोकयेत्॥अथयथोत्तरंबलिष्ठंघटितक्रममाह॥ ॥वर्ण
इति।वर्णः१वश्यं२भं३योनिः४खेचर५गणाः६ऋक्षं७नाडी८कमाद्यूर्णाद्याःयेथोत्तरं
बलिनःस्युः।अहीदूर्ध्वंअष्टादशाधिकंगुणैक्यंयथोत्तरंतत्रादौवर्णलक्षणमाह।
मृषात्मीनात्सकात्रात्विप्रमुखाःवर्णाःस्युः।एतेःएतेगणनयाज्ञेयाः॥तद्यथा।मी
नोब्राह्मणः।मेषःक्षत्रियःवृषःवैश्यः॥मिथुनः।शूद्रः।एतेःकर्कोब्राह्मणःइत्यादि।इ ४२

ह्यस्मिन्राशिमेळेवर्णोत्तमेवरःशुभःस्यात्॥कन्यापेक्षयावर्णोत्तमोवरःशुभःस्यात्।
नान्यथेत्यर्थात्सिद्धं॥अथैतेनादैनवश्यमाह॥नृभक्ष्याजलजावश्यंविहरयोवश्या
श्चाविकौर्प्योहरेरस्यालिर्नशुभोनृजंतुहरयोनेष्टाःस्युरन्यज्ञानात्॥भेगर्प्येकैतेमि
थस्त्र्यर्गैरेषंनसचाश्विभादश्वेभाव्यहिभोगिनःश्वेतकभुजेषाखुभुकघुडुरोः॥
२९॥ ॥टी०॥ ॥नृःराशेःमनुष्यराशेःजलजाःजलचराःभक्ष्याःतस्यैवविहरयःविगतो
हरिःसिंहोयेभ्यस्तेतथा॥सिंहरहिताःसर्वेवश्याइत्यर्थः॥हरेःसिंहस्याविकौर्प्याःसर्वेव
श्याः।विगतऔर्प्योयेभ्यस्तेतथाऽश्विकरहिताःसर्वेराशयःसिंहस्यवश्याइत्यर्थःअ
स्यानंतरोक्तस्यहरेःअलिर्वृश्चिकोनशुभः।वैरीत्यर्थः॥नृःमनुष्यराशेःअजंहरयो
नेष्टाः।मेळनंनकर्तव्यमित्यर्थः॥अन्यज्ज्ञानात्॥अन्यद्दृश्यमाणंजनोज्ञेयं॥तद्यथा॥

मनुष्यस्यगौर्वश्रोभवति॥अत्रपरस्परमित्रत्वंचदृश्यते॥तस्मादनयोर्मैत्रनंशुभं
स्यात्॥इदमेवम्लेच्छजातीयवधूवरयोर्नशुभं॥म्लेच्छानांगौर्भस्या॥इत्येवंलोकप्र
चारतोपिविचारणीयं॥एशिस्वरूपंजातकवशात्अवगंतव्यं॥इहज्जातके॥मस्यो
घटीनमिथुनंसगदंसवीणंचापिनरोश्वजघनोमकरोमृगास्यः॥तौलिसस्यदहनान्न
वगाचकंन्यानरोषाःस्वनामस्वदृशाःखचराश्चसर्वे।इति।अथभयोनिद्वयपिदृत्तैनै
केनाह॥भेगण्यइति॥मिथःपरस्य रंवधूवरयोर्भेगण्ये।वधूनक्षत्राद्वरनक्षत्रंग
ण्यं॥वरन क्षत्राद्वधूनक्षत्रंगण्यं।उभेअपिअंकवृत्तेभाजितेकार्ये॥शेषंत्र्यगश
णित्रिःसप्तपंचभवंतितदानसत्॥ ॥अथयोनिमाह॥ ॥अश्विभादिति॥अश्विभा
दृक्षकाद्गतभानांनक्षत्राणांअश्वादयोयोनयोभवंति॥अश्वोअश्विन्याः॥१॥इभो

हस्तीभरण्याः२अविःमेषःकृत्तिकायाः॥३॥अहिःसर्पोरोहिण्याः४भोगीसर्पोमृगस्य५
श्वाश्वानआर्द्रायाः६श्वकभुक्मार्जारःपुनर्वसोः७मेषःपुष्यस्य८आखुभुक्मार्जारः
आश्लेषायाः९।घ्रंडुरौद्वौउंडुरौमघापूर्वाफाल्गुनयोः११॥गोकाळीपशुभुक्महिष्य
पपशुद्विदृद्वौमृगोश्वाकपिर्द्वौबभ्रूकपिसिंहवाजिहरिगौनागाःक्रमाद्योनयः॥गौः
उत्तराफाल्गुन्योः।का लीमहिषीहस्तस्य१३।पशुभुक्व्याघ्रश्चित्रायाः१४॥महिषीस्वा
सःपशुद्विदृव्याघ्रोविशाखायाः१६।अनुराधायाःमृगः१७मृगोज्येष्ठायाः१८।श्वाश्वानः
मूलस्य१९॥कपिर्वानरःपूर्वाषाढायाः२०द्वौबभ्रूनरःपाढाभिजितोर्द्वयोर्बभ्रूनकु
ळौ॥२१॥कपिःवानरःश्रवणस्य।सिंहोधनिष्ठायाः।वाजीअश्वःशततारकायाः।हरिःसिं
हःपूर्वाभाद्रपदायाः।गोरुत्तराभाद्रपदायाः।नागोहस्तीरेवत्याः२७॥ ॥इतियोनिमश्वि॰

धायथोनिवैरमाह।सिंहेभंमहिषाश्वमोतुखनकंश्वेणंच कीशाविगोव्याघ्रंवभ्रुफणी
ति भीरुवरयोःप्रेष्येशयोश्चत्यजेत्॥३॥ ॥सिंहश्वइभश्चसिंहेभं।एवंमहिषाश्वं।औ
तुखनकं।मार्जारोंदुरं॥श्वेणंश्वानमृगं।कीशाविवारनमेषकं॥गोव्याघं॥ बभ्रुफणी
नकुलसर्प॥इतिवैरंभीरुवरयोःवधूवरयोः।प्रेष्येशयोःभृत्यस्वामिनोश्चवर्जयेत्॥अ
थग्रहवैरंविवसुस्लावइशिनाथानाह॥ ॥भेशमंशुबुचंरबुशुमगुशाःशोगुःकि
यान्सूरवेमित्राणीज्यकुजेंदवःशनिसितौशत्रूविधोर्नोरिपुः॥मित्रेसूर्यबुधोकुज
स्यविदरिःसूर्येंदुजीवाहिताश्चस्यार्कीशुक्रजितौहितौविधुररिःसूरेःसितशावरी॥३१॥
मित्राण्यर्ककुजेंदवोथभृगुजस्यारीरवींदूहितौमंदज्ञौचशनिःकुजेंडरवयोनेष्टाः
सितज्ञौहितौ॥क्रियान्मेषात्सकाशात्भानांराशीनांईशाःभेशाः॥एतक्रमेणस्युः।मंमं ४४

गळः।मेषस्य।शुःशुक्रोवृषस्य॥इत्यादिस्पष्टं॥रवेःसूर्यस्यईज्यकुजेंदवोमित्राणि।ईज्यो
गुरुःभौमः।इंदुश्चंद्रः एतेमित्राणिसुहृदः॥शनिसितौशत्रुशनिः प्रसिद्धः।सितःशुक्रः ए
तौवैरिणोऽर्थादन्यउदासीनः॥ विधोर्नोरिपुः॥चंद्रस्यनशत्रुः॥सूर्यबुधौमित्रेऽअ
न्येसर्वेउदासीनाः॥कुजस्यभौमस्यविनबुधोऽरिः।वैरी।सूर्येंदुजीवाः हिताः।मित्राणि।
अन्योसमौ।ज्ञस्यबुधस्यऽर्कीशुजितौ।रविशुक्रौहितौमित्रे विधुश्चंद्रोऽरिः वैरिःअ
न्येसमाः॥सूरेः बृहस्पतेः।सितज्ञौशुक्रबुधौअरिवैरिणौ॥अर्ककुजेंदवः।रविभौमचं
द्राः।मित्राणिअन्यःसमः॥भृगुभुवःशुक्रस्यरविंदूसूर्यचंद्रौशत्रूवैरिणौमंदज्ञौशनि
बुधौहितौमित्रे॥अन्यःसमः॥ ॥अथगणमाह॥ ॥सूर्वाईंतककोनरंनरिस्करेर्को
स्रादितीज्यानिळेंडुश्लत्यश्विनिमित्रमन्यदसुरैदैत्यैर्नृणांस्यान्मतिः॥३२॥ ॥टी०॥

स्यादेवासुरयोःकलिर्नृमरयोर्मध्यंस्वयोःसौहृदमित्यादि॥पूर्वास्तिस्रः।आर्द्रेत्र॰अं
तकंभरणी।उत्तरास्तिस्रः॥एतन्नक्षत्रनवकंनरिभवति॥भृगणमित्यर्थः॥अर्को ह
स्तः।अंत्यंरेवतीअदितिः॥पुनर्वसुःईज्यःपुष्यः॥अश्लेंस्वाती।इंद्रुर्मृगः।श्रुतिःश्रव
णः।अश्विनीत्र॰मैत्रमनुराधा॥एतन्नक्षत्रनवकंसुरेदेवेभवति।देवगणेत्यर्थः।दैवै
र्नृणांमृतिर्भवति॥देवासुरयोःदेवदैत्ययोःकलिःस्यात्॥नृमरयोर्नृदेवयोर्मध्यंस्या
त्॥स्वयोर्मेत्रेसौहृदंस्यात्॥ ॥अथकूटमाह॥ ॥नैस्वंद्विद्व्यय१०केषडष्टपु
विपद्वैत्र्यमर्थांककैं॥६।९॥त्रीपेर्थाविविधाविभैकचरणेभिन्नर्क्षराश्येकभं।भि
न्नांघ्येकभमेतयोर्गणखगोनाडीनृदूरंनच॥३४॥टी०॥ ॥द्विद्व्ययकेद्विर्द्वादशेनै
स्वं निर्धनत्वंस्यात्।षडष्टकविपत्॥मरणंस्यात्॥वैत्र्यमर्थांककै।पंचमेनवमेवैपु

ष्यं।अनपत्यंस्यात्।त्रीषेत्रर्वरितेतृतीयैकादशेचतुर्थदशमे।उभयसप्तमेएकर्क्षै
विविधाःअर्थाः॥धनपुत्रादयः।कथंभूतेत्रीषेविभैकचरणेविगतंभैकचरणंनक्ष
त्रैकचरणंयस्मात्तथा॥तस्मिन्नक्षत्रैकचरणेऽनिष्टफलंश्रुयते।एकराशौशुभच
हएकभांशेमृतिपदइति॥एकर्क्षस्यचत्वारोभेदाः॥तत्रैकराशिनक्षत्रचरणंनिंदितं॥
विभैकचरणेइति॥अथशुभेरूढेयद्भिन्नंक्षत्रराश्येकं॥यच्चभिन्नांघ्येकभंएतयोर्द्वयो न
र्गणखगौनाडीनृदूरंनच॥अत्रकिमपिनावलोक्यं॥शुभमित्यर्थः॥दूरंवक्ष्यमाणं
भिन्नाद्येकंभमित्यत्रभवेधेतनद्दयमागतंभवतिएकर्क्षभिन्नराशिकं॥अपरंएराशिन
क्षत्रभिन्नचरणं॥तस्मादेकराशिनक्षत्रचरणंत्यक्त्वात्रिशुभेशुगणादिकंनचिंतयेत्
तत्रगणादिदोषेसत्यपिशुभंस्यात्॥उक्तंचबृहस्पतिना॥एकराश्यौपृथक्धिष्ण्येपृथक्

एशौतथैकभे॥गणनाडीनृदूरत्वंग्रहवैरंनचिंतयेन्नइति॥कालनिर्णये॥दंपत्योरे
कनक्षत्रभिन्नपादेशुभावहं॥दंपत्योरेकपादेतुवर्षांतेमरणंध्रुवमिति॥ ॥अथग्रा
स्यषड्काष्टकंद्विर्द्वीदशंचाह॥ ॥षड्काष्टेसमभंचषष्ठसहितंचेच्छोभनंस्यात्समभं
द्विर्द्वादशकेहितीयसहितंश्रेष्ठंस्त्रियायुग्घरिः॥मूळेंद्रार्कभपाश्यजैकचरणादित्य
र्यमेज्याश्विभैर्याम्येंद्वीज्यभमित्रभाग्यवसुभत्वाष्टं ब्रूहिर्भुंध्यभैः॥३५टी०॥ ॥षड्का
क ष्टेसतिसमभंतुषंर्कंकन्यादिचेद्यदिषष्ठसहितंयदिभवतितदाशोभनंस्यात्॥ग्रास्य
मित्यर्थः॥तद्यथा॥तुषःसमभंतत्॥तस्मात्सकाशात्षष्ठेनुळाधरेणसहितंयदिभ न
वतितदातद्ग्रास्यंस्यादित्यर्थः॥तत्त्वामिनोमैत्रीभावात्॥समभंअष्टमेनसहनग्रा
स्यं।एवमेवग्राह्याग्रास्यंविलोकयेत्॥अथग्रास्यंद्विर्द्वीदशंमहाद्विर्द्वीदशंकेसमभंद्वि ५६

नीयसहितंयदाभवतितदाश्रेष्ठंशोभनंस्यात्॥विपरीतमसत्॥तत्रसिंहेविशेषमा
ह।स्त्रि यायुग्घरिरिति॥विषमोपिसिंहःस्त्रिपाकन्या युकयुकः।श्रेष्ठः॥अथनाडी
भ माह॥मूळेंद्रार्कपाश्यजैकचरणादित्य र्यमेज्याश्विभैर्याम्येंद्वीज्यभमित्रभाग्यवसुभ
त्वाष्टं ब्रूहिर्भुंध्यभैः॥अन्यैर्नाड्यरहैकनाडिनवकेस्यातांद्विभेचेन्मृतिर्गोदादक्षि
णतः कचिच्चपमुखेपार्श्वैकनाडीहितौ॥मैत्र्याद्विव्ययमर्थनंदमपिसत्षड्काष्टकंव
श्यतःषड्भिस्त्रीवृगणावरेस्वपगणैःसत्कूटमैत्र्योस्तदा॥३६॥टी०॥ ॥रक्षस्त्रीवृभ
मान्यदावश्यमुखैःषड्भिर्युतंशोभनमिति॥अथश्लोकेत्रनीयांते स्त्रिभिःपदैतिस्रो
नाड्यःसूचिताः॥मूळंषसिंहं॥इंद्रोज्येष्ठा॥अर्कभंहस्तः॥पाशीशतनारका॥अजैक
चरणंस्वातीभादितिदा॥अदितिःपुनर्वसुः॥अर्यमाउत्तरफाल्गुनी॥ईशःआर्द्रः॥अश्विभं

ति

अश्विनी॥एभिर्नवभिर्नक्षत्रैरेकानाडी भवति॥याम्यंभरणी।इंदुर्मृगः।ईज्यभंपुष्यः।मि
त्रमनुराधा।भाग्यंपूर्वाफाल्गुनी।वसुभंधनिष्ठा।त्वाष्ट्रंचित्रा।अंबुपूर्वापादा॥अहिर्बु
ध्न्यंपूर्वाभाद्रपदा।एभिर्नवभिरेकानाडी॥अन्यैरुर्वरितैर्नवभिरेकानाडी॥एवंतिस्रोना
ड्योभवंति॥इहविवाहविषयेयदाएकनाडीनवकेद्विभेद्वयोर्वरयोर्भिन्नभेत्रेचेत्स्यातांत
दामृतिर्मरणंस्यात्॥अथगौतम्याःदक्षिणेदेशेक्षत्रियादीनांचअन्यवर्ध्याः अलाभेग
तिमाह॥गोदादक्षिणतःगोदागोदावरी॥तस्यादक्षिणतःदक्षिणेदेशेसर्ववर्णेनृपमुखे
क्षत्रियादौसर्वदेशस्थेकचिदन्यकन्यकायाअलाभेसतिपार्श्वैकनाडीहिनाशुभास्यात्
नमध्यमा।उक्तंचरत्नकोशे॥अग्रनाडीवृधेभर्तीमध्यनाडीव्यधेरयं॥एष्यनाडीवृधेक
न्याम्रियतेनात्रसंशयः॥समासनेव्यधेमृत्युर्दूरवेधेचिरेणतु॥व्यधांतरप्रमाणेनवर्षे ४७

ते

ऽष्टंपजायेंदिति॥ब्राह्मणविषयंजठरेनिर्जनत्वंचगर्भेमरणमेवच॥एष्टेदौर्भाग्यमाप्नोति
यस्मान्नांपरिवर्जयेदिति॥क्षत्रियादिविषयं।ज्योतिःप्रकाशे॥निधनंमध्यमनाड्यांदंप
त्योर्नैवपार्श्वयोर्नाड्योरिति॥अस्यचावस्थानत्रैवोक्ताकरग्रहेएष्यनाड्योननिंद्येतियद्व
चः॥ ॥नक्षत्रियादिविषयं॥ ॥गौतमीयाम्यतदेति॥अथपूर्वोक्तानांहिडीदशोक्तानां
शुभत्वमाह॥मैत्र्यैति।मैत्र्यांग्रहमैत्र्याद्विव्ययेद्विर्द्विदशं॥अर्थनंदं।पंचनवमंसत्शुभं
स्यात्॥वश्यादिषड्भिः षड्भाष्टकंशुभंस्यात्॥वश्यभयोनिखेचरगणनाडीभिःषडष्ट
कंशुभंस्यादित्यर्थः॥अथयदास्त्रीनृगणावरोस्वपगणोरक्षोगणःस्यात्॥अथयदार
क्षोगणःस्त्रीनृगणःपुरुषःस्यात्तदावश्यमुखैःषड्भिःवश्यभयोनिखेचरकूटनाडीत्यैतैः
षड्भिर्युतंतन्मेलनंशुभंस्यात्॥ ॥अथनृहूरंसापवादमाह॥ ॥स्त्रीभान्नानिकटेनृहूर

मशुभंखेटोडुमैत्र्योःशुभंह्यर्केनात्रसुवर्णमष्टरिपुकेदद्याद्गोयुग्ममर्धांकके५।९॥रौप्यं
कांस्यमथैकनाड्यृक्षयुजिगोस्वर्णादिदत्त्वोद्वहेत्॥३७॥ ॥टी०॥ ॥स्त्रीनक्षत्राण्याह इति॥नृ
नक्षत्रंयदिनिकटेसमीपेभवतितदानृदूरंस्यात्॥किंनृदूरं।अशुभं।अशुभफलदं॥इ
दंनृदूरंखेटोडुमैत्र्योःशुभंस्यात्॥उडुमैत्रीनक्षत्रमैत्रीयोनिमैत्रीतियावत्॥ ॥अथसंक
टेदुष्टक्रूरादौदानमाह॥ ॥घ्यर्केइति।घ्यर्केहिर्द्वादशेना त्रसुवर्णंदत्त्वोद्वहेत्॥अ
ष्टरिपुकेषडष्टकेगोयुग्मंगोमिथुनं॥अर्धांककेनवमपंचमेरौप्यंकांस्यंदत्त्वोद्वहेत्॥
॥ ॥अथैकनाड्यादानमाह॥ ॥एकनाडीयुजिगोस्वर्णादिदत्त्वोद्वहेत्॥एकनाडीयो
गेस्वर्णवस्त्राणिवृद्धिदत्त्वोद्वहेत्॥ ॥तथाचराजमार्त्तंडे॥ ॥षडष्टमेगोमिथुनंप्र
दद्यात्कांस्यंसरौप्यंनवपंचमेच॥नाड्यांशुधेन्वन्नसुवर्णवस्त्रंहिर्द्वादशेआलणतर्प ४८

णंचेति॥उद्वाहतत्वे॥नाम्नंहेमधनंव्ययेरजतयुक्कांस्यंत्रयोदशेगंदद्याच्चषडष्ट
केहिजभुजिंस्वर्णंचनाडीयुतावितिं॥ ॥अथगुणविचारंत्रिभिर्दिनैराह॥ ॥तत्रादौ
वर्णगुणविचारमाह॥ ॥भूर्वर्णैक्यवरोन्नमेथवश्यभकूटैर्द्वयंमित्रयोःखंवैराशन
केधराविवशकेथोसद्वयोरन्नयः॥मिश्रेतच्छकळंत्वथातिसुहृदोर्वैदास्त्रयोमित्रयो
रेकस्याद्विपतोःस्वभावगुणयोर्ह्यैक्यंमहद्वैरिणोः॥३८॥ ॥टी०॥ ॥वर्णैक्यवरोन्नमे
न्नूरेकोगुणः।वर्णयोरैक्यंयस्मिन्घटितंतद्वर्णैक्यं॥वरः उन्नमोयस्मिन्तद्वरोन्न
मं॥वर्णैक्यंचवरोन्नमंचउभयत्रापिएकैकोगुणइत्यर्थः॥अथहीनेवरेगुणस्याभा
वः॥उक्तंचज्योतिर्निबंधे॥एकोगुणःसदृग्वर्णेतथावर्णोन्नमेवरे॥हीनेवरेगुणःशू
न्यंकेप्याहुःसरक्षोदलमिति॥अथवश्यगुणविचारमाह॥ ॥वश्यभकूटेअर्धंएकस्या

द्वेगुणः॥वन्यभक्ष्यंतथा।मनुष्याणांजलजानांवन्यानांभक्ष्यंचतत्रअर्धगुणोज्ञेयः।
एतत्तुद्विजादौज्ञेयं।द्विजादयस्तुकदाचिच्छ्राद्धेपाठेनजानीमस्यभक्ष्यकाभवंति।
नसर्वेषांतस्माद्धूवरयोर्जातिंविचार्ययोजनीयं॥हीनजातौशून्यं॥यतःखंचैरणा
नकेइत्यस्मिन्नेवश्लोकेउक्तत्वात्॥एवमेवसिंहस्यसर्ववन्याःभक्ष्यंभवंति॥तत्र
मनुष्याचैरभक्ष्यंदृश्चिकस्तुवैरीअन्येवन्यभक्ष्यं॥अथमित्रयोःपरस्परंसुहृदोर्द्व
यंगुणद्वयंविज्ञेयं॥अत्रविचारः॥तत्रस्वजातौमित्रत्वंप्रकटं॥मनुष्याणांमेषवृष
श्वमृगैःसहमित्रत्वं॥तत्रहीनजातीयानांपशवोवन्याभक्ष्यं॥तत्राईगुणाः।अन्यत्र
द्वयं॥अथअरिवन्याकेधरणेकोगुणः॥ ॥अरिवन्याकंयथा॥ ॥मनुष्याणांदृश्चिकः
सिंहदृश्चिकयोर्नित्यंवैरं ॥दृश्चिकदष्टःसिंहोमरणंप्राप्नोति॥इतिलोकेप्रसिद्धिः ४९

तस्माद्वन्यगुणाभावः।प्रथमंवन्यजलभक्षणेअन्यज्ञानादित्युक्तं॥तस्मात्सुबुद्धिभिः
विचार्यवक्तव्यं॥अत्रवन्यविचारणेबुद्धिरेवंस्फुरिता॥अत्रसत्तुरुक्तंतत्सुधैःशो
चनीयं॥ननुवन्यंजलभक्षणैःकोप्यनवन्याहहरेरित्येवोक्तंत्वयाकथं सिंहस्यमनु
ष्याचैरीभक्ष्यमिति॥सत्यं॥तत्श्लोकोक्तंलक्षणंसर्वसामान्यं।अतएवोक्तंग्रंथकर्त्रा
अन्यज्ञानादितिसिंहस्यनरगजादिप्रतापमारणेअस्तेनोसुकः।अन्येषांमारणेनद
क्षीनः॥असद्वन्यत्वात्॥नक्तंच॥वैरभक्ष्येगुणाभावोद्वयोःसख्येगुणद्वयं॥वन्यवैर
व गुणश्चैकोऽन्नभक्ष्येगुणार्धकमिति॥अथतारागुणविचारमाह॥ ॥सद्वयोरुभयतः
सतोःअन्नय स्त्रयोगुणाः॥एतदुक्तंभवति।भेगण्येकहृत्तेइत्यनेनप्रकारेणउभय
तोपिपदिसन्नारेभवतस्तदात्रयोगुणइत्यर्थः।मिश्रेतत्रकळमिति॥मिश्रेएकतःशु

भानारा।एकतोऽशुभा।एवंविधेमित्रेसतिनक्षत्रकळं॥तेषांत्रयाणांत्रकळं॥तछकळं
सार्धैकोगुणइतिस्यर्थसिद्धं॥उक्तंच।एकतोलभ्यतेतारा शुभाचैवाशुभान्यतः।तदा
सार्धोगुणश्चैकातारा शुद्धौमिथ स्त्रयः॥उभयोर्नशुभातारातदाशून्यंसमादिशेदि
ति॥ ॥अथयोनिगुणविचारमाह॥ ॥अतिसुहृदोवैदाश्चत्वारोगुणाः॥मित्रयोस्त्र
यः।द्विषतोवैरिणोरेकः॥स्वभावगुणयोर्द्वौ॥महद्वैरिणोःखंशून्यं गुणःस्यात्।एवं
पंचत्रकारेणयोनिगुणाः॥अस्यविवेकःअष्टाविंशतिनक्षत्राणांअश्वाद्यःसर्वाश्च
तुर्दशयोनयः॥तत्रसिंहेभंमहिषाश्वंश्वादियङ्कं॥नन्महद्वैरं॥तत्रापिमहद्वैरम
हिषाश्वंवानरमेषकं।एतद्द्वयंउदासीनं॥स्वभावगुणंपरस्परघातभावात्॥अथैक
योनिष्वतिमित्रत्वंज्ञेयं॥एकयोनिषुपिगजयोःश्वानयोर्मार्जारयोर्व्याघ्रयोःसिंह्यो ५०

रेकयोनित्वेपिनमित्रत्वं॥परस्परकलहकारणात्॥एतद्धग्मपंचकंस्वभावगुणं॥ए
तद्घुग्मपंचकंत्रतमहद्वैरस्थंमहिषाश्वंवानरमेषकंएतद्द्वयमित्येतद्घुग्मस मकंस्वभा
वगुणंव्याघ्रसुसर्पोडुरनकुळेनुदासीनः॥सिंहोप्येषूदासीनः॥तथाएतौव्याघ्रसिंहौअ
न्येषांवैरिणौ॥सर्पमार्जारयोर्वैरंश्वमेषयोर्मैत्रं॥गोमहिषयोर्मैत्रं।उंडुरसर्पयोर्वैरं॥ए
वंत्रमित्रोदासिन्यादिकं विचार्यउक्तवद्गुणाःज्ञातव्याः॥औदासीन्येस्वभावगुण
वद्गुणग्रहणं॥उदासीनानांगुणायद्यपिनोक्तास्तथापिस्वभावगुणेमहिषाश्वेमेषवा
नरेचऔदासिन्यंदृश्यते॥तस्मादेतदुदासीनेगुणग्रहणंकर्त्तव्यमित्यर्थोलभ्यते॥उ
क्तंच॥महावैरेचस्वस्वभावंयथाक्रमं॥मैत्रेचैवातिमैत्रेचरवेंडुद्वित्रिगुणाइति॥अथ
खेचरगुणविचारमाह॥ ॥एकेनोभयमित्रयोःसमानाभधंसमानतिकेचत्वारःसम

मित्रकेरिपुहितेभूमिर्दासेत्रयः॥नादेवोमनुजावधूरिहरसाःषड्पर्यायेशत्रवःषट्
साम्येस्वपक्षरुषःसुरवधूरत्रैकोन्यत्रखं॥३९॥ ॥एकःईशोयस्मिंस्तदेकेशंउ
भयंमित्रेयस्मिंस्तदुभयमित्रंएकेशंचउभयमित्रंचएकेशोभयमित्रेतयोःशरमिता
पंचगुणाः ग्राह्याः॥उभयत्रापिपंचपंचगुणाःग्राह्याः॥अर्द्धसमानतिकेसमउदा
सीनः॥अरातिःशत्रुः॥एवंयस्मिन्मेळेसमानतिकंतत्रअर्द्धंएकस्यार्धंगुणः॥एवंस
ममित्रकेचत्वारोगुणाः॥रिपुहितेअरिरुहृदिभूरेकःघुदासेत्रयः॥द्वौदासौयस्मि ३
तत्रतस्मिन् न्नेत्रयोगुणाः॥अनुक्तेगुणाभावेः॥उक्तंच॥तत्रैकाधिपतिर्यैमित्रत्वेगुणपंचकं॥ च
चत्वारःसममित्रत्वेद्वयोःसाम्येत्रयोगुणाः।मित्रवैरेगुणश्चैकःसमवैरेगुणार्धकं।
परस्परंखेटवैरेगुणशून्यंविनिर्दिशेदिति॥ ॥अथगणगुणविचारमाह॥ ॥नादेवै ५१

ति।यत्रनावरःदेवःदेवगणः॥वधूःमनुजा।मनुष्यगणाभवंति।इहरसाःषड्गुणाः
प ग्राह्याःतद्वैपरीत्येतयोर्वैरीत्येतद्वशरमिताःपंचगुणाग्राह्याः॥एतदुक्तंभ
वति॥यत्रवरेमनुष्यगणःवधूर्देवगणाअत्रपंचगुणाग्राह्याइत्यर्थः॥पक्षाम्ये॥
साम्येगणसाम्येषड्गुणाःग्राह्याः॥यत्रअस्वपक्षरुषःसुरवधूर्देवगणा स्त्रीभवंति।
अत्रैकःएकोगुणोग्राह्याः॥अन्यत्रउक्तादन्यत्रखंशून्यंगुणोग्राह्य ः॥ ॥अथकूटगु
ण विचारमाह॥ ॥डुःकूटेयदियोनिमैत्रमबळादूरंतदाभोधयोनोचेत्खंखनयोर्ये
दैकमिहभूर्भोघ्यैक्यकेखंगुणः॥सत्कूटेवरहरनाभरिपुतापदभिन्नरक्षैकभे
पंचान्यत्रसुकूटकेचगिरयोथोनाद्रिभेदेगजाः॥४०॥ ॥टी०॥ ॥अनुक्तेगुणाभावः
डुःकूटेद्विर्द्वादशादौसतियदियोनिमैत्रं।अबळादूरंस्त्रीदूरंस्यात्तदाभोधयश्चत्वारो

गुणाग्राह्याः॥नोचेद्यदायोनिमैत्रमबळादूरंनस्यात्॥तदाखंशून्यंगुणः॥अनयोर्योनि
मैत्रस्त्रीदूरयोर्मध्येयत्रएकंस्यात्॥इहभूरेकोगुणः॥भांघ्रि क्यकेनक्षत्रैकचरणेखं
शून्यंगुणोग्राह्यः॥अथसत्कूटेसतियदिवरदूरयोर्वैरंयोनिवैरंचस्यात्तदारसाः ष
ऋणाग्राह्याः॥ ॥अथनाडीगुणविचारमाह॥ ॥अथोनाडीति॥नाडीभेदेगजाअष्टौ
गुणाग्राह्याः॥अन्यकेगुणभावः॥इतिघटितं॥ ॥छ॥अथस्त्रियोविवाहकाळमाह
॥स्त्रीणामष्टमवर्षेतुस्त्रिषून्नृणांनीर्णव्रतानामयुक्ष्वब्धेषुत्रिचरणधमाघयुगयोर्मार्गे
विवाहःशुभः।ज्येष्ठंपूर्वजयोरन्यजेऽधिमरुचिंज्ञेज्योनखेदाचितं. यन्मासादिजनुर्न
वंप्रथमकेगर्भेत्यजेन्नानुजे॥५२॥ ॥टी०॥ ॥स्त्रीणामष्टमवर्षेतुःसकान्नात्त्रिषु
वर्षेषुविवाहःशुभःस्यात्॥अष्टमनवमदशमेषुशुभःस्यादित्यर्थः॥तथाचसंवर्तः ५२

अष्टवर्षाभवेद्गौरीनववर्षाचरोहिणी॥दशवर्षाभवेत्कंन्याह्यदश्चैवपलीं
मता॥गौरीदानानागलोकंवैकुंठंरोहिणीददत्॥कन्यादानाद्ब्रह्मलोकंरौद्र
वंनुरजस्वलेति॥ ॥तथाचकारिकायामुक्तं॥ ॥षडष्टमध्येनोह्याकन्यावं
षद्वयंयतः॥सोमोभुंक्तेऽनस्तद्वद्गंधर्वश्चतथानळइति॥अस्यवाक्यैसहायि स्य
नीश्रुतिर्वदति॥सोमःप्रथमोविविदेत्युपक्रम्यसोमोददद्गंधर्वायगंधर्वो
ददद्ग्नयेइत्यंता॥नन्वस्यविरोधोब्रह्मपुराणे॥ ॥गौतमीमहात्म्येभानुतीर्थ
वर्णनेविष्णिभानुसंवादेदृश्यते॥विष्णिरुवाच॥चतुर्थाद्वत्सरेऊर्ध्वंयावन्नदश रा
मात्ययः॥तावद्विवाहःकन्यायाःपित्राकार्यःप्रयत्नतः॥इतिसत्यं॥इतिपुराण
वाक्यंतूद्वाहविषयं॥श्रौतंस्मार्त्तंब्राह्मणादिविषयमित्यर्थः॥सप्तमंविषम

त्वान्नारदादिभिःस्त्रीविवाहेनांगीकृतं॥तस्मात्सर्ववर्णानामविरुद्धमेवोक्तं॥
स्त्रीणामष्टमवर्षंतत्रिधितिकथितकालादूर्द्धंकदाचिद्दर्शनाभनिमित्तादौसम
वर्षेषुद्वादशाचतुर्दशाषोडशेषुविवाहोयंथांतरेणोक्तः॥कालनिर्णयदीपिकावि
वरणेस्वयंवरार्थंकालद्वयमुक्तं॥जीवत्पितृकायाऋतौवर्षत्रयानंतरंस्वयंवरकालः
अदातृकायाअपिऋतौवर्षत्रयानंतरंस्वयंवरकालः॥अदातृकायइत्येतत्स
र्ववर्णसाधारणं॥कन्याप्रदातृत्रैविध्योक्तः॥पितापितामहोभ्राताभ्रातावंधुर्यदान
हि॥ऋतौवर्षत्रयादूर्ध्वंकन्याकुर्यात्स्वयंवरमिति॥बौधायनोप्याह॥ ॥वर्षाणि
त्रीणिऋतुमतीकांक्षेतपितृशासनं॥ततश्चतुर्थेवर्षेतुविंदतेसदृशंपतिंइति॥
अथपुंसांविवाहकालमाह॥ ॥ऋणांतीर्णव्रतानांक्रतव्रतविसर्गाणां॥अपुंक्ष ५३

क्षेषुविषमेषुवर्षेषुविवाहःशुभःस्यात्॥तुविशेषउक्तवर्षेधुकइत्याह॥अत्रच
णधमाघयुगयोः॥अत्रविषमवर्षेषुणधोवैशाखःमाघःप्रसिद्धःअनयोर्युगेयु
गळेणधयुगंमाघयुगंवैशाखज्येष्ठयुगंमाघफाल्गुनावित्यर्थः।मार्गेमार्गशिर्षे
विवाहःशुभःस्यात्॥एतेपंचमासावहुसंमताः॥एषुज्येष्ठमासंसर्वजनयोःप्रथम
जातयोःहयोःत्यजेत्॥तथाचनारदः॥ज्येष्ठेनज्येष्ठयोःकार्य्यंनृणार्य्योःपाणिपी
डनं॥तयोरेकतरेज्येष्ठेज्येष्ठमासेपिकारयेत्॥दोषांतरमाह॥हिमरुचिंचंद्र
मसंज्ञेज्योनखेदान्वितंबुधगुरुरहितान्यग्रहयुक्तंपापग्रहशुक्रान्यतमयुक्तं
त्यजेत्॥अनिष्टफळश्रवणात्॥उक्तंचविवाहवृंदावने॥अशुभशुक्रसखः
सखनस्सूनिति॥सर्वशुभकर्मसाधारणोयंदोषः॥अथत्याज्यप्रकरणेमासाद्यं

जनिसंभवमिति॥यदुक्तंतस्यविशेषनिर्णयमाह॥यन्मासादिजनुर्भवंप्रथमकेगर्भेत्यजेन्मानुजे॥स्पष्टार्थः॥अत्रनारदः॥नजन्ममासेजन्मर्क्षेनजन्मदिवसेपिच॥आद्यगर्भेसुतस्याथदुहितुर्वाकरग्रहइति॥ ॥अथविवाहनक्षत्राण्याह॥मूलोत्साकमेघास्त्रिरेहनिलयुग्मैत्रंविवाहेशुभंपापत्रकमनिंदुभुक्खलयुतंभोग्यंचविद्धंनभं॥विश्वेंद्वोर्यममित्रयोर्हिकभयोःपैत्रर्क्षहस्त्योर्मिथोंत्यार्यम्णोःउनरस्त्वयोर्वरुणभस्वासोरुभाहस्तयोः॥७॥ ॥टी०॥ ॥मूलंप्रसिद्धं।अंत्यंरेवतीअर्कोहस्तःमघाप्रसिद्धास्त्रिरेहिण्युत्तराःइंदुर्मृगःअनिलःस्वातीएभिःसहितंमैत्रमनुराधाविवाहेशुभंशुभफलदमित्यर्थः।अथैतेष्वेकेषुनिंद्यमाहपापयुक्तंपापग्रहयुक्तंअनिंदुभुक्तंचंद्रभुक्तंएतदुक्तंभवति॥पापग्रहस्यकंनक्ष

त्रंचंद्रभोगरहितंनशुभंस्यात्॥उक्तंसंहितायदीपे॥एहयुक्तंत्रिभिर्भोगैःशुद्धंषड्भिर्ग्रहोपमं॥चेतुर्भिःशनिभोगेनदुष्टंद्वाभ्यांकुजेनवेति॥खलयुक्तंपापग्रहयुक्तंभोग्यंविद्धंचनस्यात्॥अथवेदामाह॥विश्वेंद्वोरितिउत्तराषाढमृगयोःभरण्यनुराधयोः।हिकभयोःकस्यभेकभेद्वेचतेकभेचहिकभे॥रेहिण्यभिजितौनयोःपैत्रर्क्षहस्तयोर्मिथःपरस्परं॥अंत्यार्यम्णोःरेवत्युत्तराफाल्गुन्योः॥उनःउनर्वसुः॥अस्यपुनर्वसुनक्षत्रस्यमूलमित्यर्थः॥उनर्वसूमूलयोरितियावत्॥वरुणभस्वात्योःशततारकास्वात्योःउभाहस्तयोःउत्तराभाद्रपदाहस्तयोःमिथःपरस्परंवेधःस्यादित्युत्तरेणश्लोकेनान्वयः॥ ॥अथकर्मविशेषेणनिर्णयमाह॥ ॥वेधोयंकरपीडनेनिगदितोनान्येषुनेष्टस्तथावेधःसप्तशलाककेशिवदिशःकार्ण

नवाद्यैर्युते॥वेधोंत्यादिमयोर्द्विकत्रिमतयोरंघ्र्योर्मिथःसद्भिर्विद्धेचरणंत्य
जेत्खलखगैःसर्वत्रिदंघ्रिंक्वचित्॥३३॥अयंत्रिकोवेधःकरपीडनेविवाहेपूर्वै
र्मुनिभिर्निगदितःनान्येषुकर्मसुअयंवेधोनोक्तइत्यर्थः तेषुविवाहात्अन्यक
र्मणिसप्तशलाककेचक्रेस्मृतःकथंभूतेसप्तशलाककेचक्रेत्रिवदिशःइशान्याः
सकाशात्काशीनवाद्यैःयुतेऊर्ध्वानुदैवतायस्मिंस्तिकाशीनवंतत्आद्ययेषांता
नितैर्युतेइशान्यादिप्रदक्षिणंकृतिकादिनक्षत्रैर्युक्तइत्यर्थःविवाहादृतेसर्वक
र्मसुसप्तशलाकाचक्रेवेधोवलोकनीयइति॥ ॥तथाचखल्वः॥ ॥चक्रेसप्तसप्त
शलाकाख्येभवेधःसर्वकर्मसु॥त्याज्यएवविवाहेषुतथैवपंचरेखजेइति॥अथ
पादवेधमाह॥ ॥सत्खगैःशुभंग्रहैःभेनक्षत्रेक्विधेसतिचरणंत्यजेत्॥विद्धंचरणं

त्यजेदित्यर्थः।वेधोंत्यादिमयोरिति।अंत्यादिमयोप्रथमयोश्चतुर्थः॥द्विकत्रिमि
तयो॥अंघ्र्योश्चरणयोर्मिथःपरस्परंवेधःस्यात्॥ ॥अथास्यनिर्णयमाह॥ ॥ख
लखगैःपापग्रहैर्विद्धेसतिसर्वेनक्षत्रंत्यजेत्।इहास्मिन्पविद्धेक्वचिदन्यमुडुन्नील
नेसतिअंघ्रिंविद्धंचरणंत्यजेत्॥नक्तंचमांड्येन॥ ॥भिल्यंसोम्यग्रहैर्विद्धंपादमा
त्रंपरित्यजेत्।क्रूरैरुक्तसकलंत्याज्यमितिवेधविनिश्चयइति॥वैद्यनाथःविधमाय
नयोरंघ्र्योरन्योन्यंद्वितीययोः॥क्रूरैरपित्यजेत्पादंकेचिदत्रमहर्षयइति॥ ॥
अथवेधभंगमाह॥ ॥लग्नेशोभवगेथवाशशिनिसद्दृष्टेशुभेवांगगेहोरायांच
शुभस्यवाव्यधभयंनास्तीतितिग्मेजगुः॥भौमार्क्याश्रुति२षट्ऋतु६जिना२४षट्न
खभं२०हंत्यग्नोलत्नयाखेदोर्कीर्क१२मितंशशिमुनि७मितंपूर्णोनसत्नशुभे॥

॥५६॥ लग्नस्वामिनिभवगएकादशगेसतिवेधस्यदोषोनास्तीत्येकोभंगः॥अथ
वाऽशिनिसहदृष्टेसतीतिद्वितीयोभंगः॥अंगेनत्तीयशुभस्यहोरायांवेतिचतु
र्थोभंगः॥एषामन्यतमेसतिव्यधभयंनास्तीतिपूर्वेमुनयोजगुरुदुः॥ ॥तथाच
वसिष्ठः॥ ॥लग्नेशुभःसौम्ययुतेक्षितोवालग्नाधिनाथोभवगस्तथावा॥काला
ख्यहोरायदाशुभस्यभवेधदोषस्यतथाहिभंगइति॥बृहद्दैवज्ञेपि॥ ॥सघु
रुक्रनुगेशुभेव्यधभयंनोवाचयेलग्नयेहोरायांचशुभस्यवाऽशिनिसहदृष्टेपि
चार्येरुजेरिति॥ ॥अथलग्नमाह॥ ॥भौमादिति॥भौमात्सकाशात्खेटोग्रहो
रुक्रंतःक्रमात्क्रूरादिभंनक्षत्रंत्रयंतोलग्नयाहंति॥तत्रभौमस्तृतीयं॥बु
धआरुतिविंशतिमितं॥गुरुःषष्ठंशुक्रःजिनमितंचनुर्विंशं।शनिरष्टमं।राहुर्न ५६

वमितंविंशलग्नयाहंति॥अर्कःसूर्योर्कमितंद्वादशंशशीपूर्णश्चंद्रमाः॥मुनिमि
तंसप्तमं।अयतोलग्नयाहृतं।ततनक्षत्रंहतंमागधेमागधेदेशेनसत्तनशुभंस्या
त्॥ ॥तथाचसत्यसूरिः॥ ॥लग्नामागधकेदेशेपातंकौशकेकृतथा॥एकार्गलं
नुकाश्मीरेवेधंसर्वत्रवर्ज्जयेत्॥ ॥अथदोषांतरण्याह॥ ॥षण्मासंग्रहणोडुचं
द्रतनुगंविद्धर्क्षजन्मर्क्षकेस्याज्जेजन्मभलग्नकेतनुगतेसूर्यान्मनूडुत्यजेत्॥दंत
द्यंकदशार्कतोयुगगजास्तर्काःखबाणेंदवोनाडीःसंक्रमणेत्यजेद्दिविपदंप्रायो
रवेर्दूषिताः॥" ॥षण्मासंषण्मासपर्यंतंग्रहणोडुग्रहणनक्षत्रंचंद्रतनुगतंचं
द्रगतंलग्नगतंचत्याज्यं॥चंद्रगतमितियस्मिन्दिनेचंद्रमसायुक्तंभवति॥त
च्चंद्रगतंदिननक्षत्रमितियावत्॥तनुगंयथा॥ ॥अश्विन्यांग्रहणेज्ञातेसत्र्यंश

त्रयोदशभागांतरमेषलग्नेस्यश्विनीलग्नगास्यात्॥एवंभरण्याद्यपिग्रहणो
डुइत्यनेनअन्यान्यप्युत्पात्तडुष्टानित्याज्यानिविद्धर्क्षंविद्धनक्षत्रंजन्मर्क्षंजन्म
नक्षत्रंएतेनभेतनुगेत्याज्येभंचलग्नंचभलग्नंजन्मनिभलग्नेजन्मभलग्नेत
एवजन्मभलग्नके॥जन्मराशिर्जन्मलग्नंचतनुगतेत्याज्ये॥लग्नांतर्गतनक्षत्र
ज्ञानार्थंसूत्रं॥नवघ्नतनुवेदाघ्नंसैकंस्यात्तारकंतनौ॥अर्कर्क्षांत्सूर्यनक्षत्रात्
मन्दुचनुदृग्नंनक्षत्रंसजेत्॥अथसूर्यादीनांराशिसंक्रमणेत्याज्यघटिकाः
आह॥ ॥त्याज्यइति॥ ॥रव्यीडुकुजसौम्यानांसंक्रमणेरविसंक्रमणेक्रमेणरद्
ध्येकद्व्यङ्कास्त्याज्याः॥तद्यथा॥रविसंक्रमणेरद्नाड्यो द्वात्रिंशद्घटिकास्त्याज्याः
॥संक्रमकालात्पूर्वतःषोडशपरतोपिषोडशघटिकाः॥एवंद्वात्रिंशद्घटिकास्त्या

ज्याइत्यर्थः॥तथाचंद्रसंक्रमणेद्वेनाड्यौ॥भौमसंक्रमणेनवघटिकाः॥बुधसंक्रम
णेद्वेघटिके॥गुरोःसंक्रमणेअर्ध्यष्टचतुरशीतिघटिकाःशनेःसंक्रमणेखत्रिंश
यःपंचाशदधिकशतघटिका१५०शुक्रस्यषट्घटिकास्त्याज्याः॥ ॥अथसंधि
शेषमाह॥ ॥षट्षष्टीक्रतुसंधितस्तिथिभयुक्संधौहिनाड्यौग्रहान्त्यादेर्दि
वसांस्त्रिवेदषड्भान्भागर्हितान्संत्यजेत्॥उत्पातेडुहमुक्षमंचऋक्षिणोरा
काष्टमीप्राग्दलेविद्धमेत्येकतरद्योरवह्नुलेरुसेनिरेकेषिह॥धूर्ई॥ ॥टी॥
क्रतुसंधितःवसंतादिक्रतुषट्कस्यैःषट्षष्टिःषड्भिरधिकाषष्टीस्याज्येत्यर्थः॥क्रतु
प्रवृत्तिलक्षणंरत्नमालायां॥ ॥मृगादिराशिद्वयभानुभोगान्षडर्तवःस्युस्त्रिभि
रेवसंतः।ग्रीष्मश्चवर्षाचशरच्चतद्वद्धेमंतनामकथितोत्रषष्ठः॥तिथिभयुक्संधौ

तिथिनक्षत्रयोगानांसंधौहिनाड्योष्टयकहेहेघटिकेत्याज्ये॥अथपूर्वमुक्तंग्रह
जनिप्रांतोऽन्नवंसूतकंमिति॥ ॥तत्रग्रहणसूतकमाह॥ ॥ग्रहादिति॥ग्रहात्ग्र
हणसकाशात्।उपरितनादैस्तच्चरणैर्ग्रहणपादैस्त्रिरत्रेद४षट्६इभान८दिव
सांस्त्यजेत्॥एतदुक्तंभवति॥पादैकमात्रेदिवसेत्रीन्दिवसांस्त्यजेत्॥अर्द्धग्रहणे
चतुरोदिवसान्।त्रिपादग्रहणेषट्दिवसान्संत्यजेत्॥तएतदुक्तंभवति।पादग्र
हणेत्रयाणामर्द्धनवधा॥पादग्रहणेग्रहणात्सर्वसाद्धैकंदिवसं॥अर्द्धग्रहणेच
तुर्णामर्द्धौ॥पादत्रयग्रहणेषण्णामर्द्धंत्रीन्सर्वग्रहणेअष्टानामर्द्धंचतुरोदिवसा
न्।ग्रहणात्सूर्वंत्यजेत्॥तथाचोक्तंमार्ग्ङेयविवाहपटले॥ ॥सर्वग्रासेदिनान्यष्टौ
शुभकार्येषुवर्जयेत्॥त्रिभागोनेषट्दिवसानर्धग्रासेचतुर्दिनं॥चतुर्थांशोत्रिरा

त्रंतुग्रहणेचंद्रसूर्ययोरिति॥अत्रापंतरालेऽनुपानोज्ञेयः॥तथाचार्ष्टिषेणिः॥
ग्रहणात्त्रिदिनंपूर्वंपरतोदिनसप्तकमिति॥सर्वग्रहणविषयं॥ज्योतिःप्रकाशोऽ
पि॥स्वग्रासेसर्वपादेनखंडंग्रिहितुंक्षमः॥गजाष्टधिरमाज्ञानेष्टाःश्लोकदलत्र
हेरिति॥ ॥अथोत्पातेवर्ज्यकालमाह॥ ॥उत्पातेऽहमिति॥ ॥उत्पातेभूकंप
निर्घातमहोत्पातोल्कानिपातादिकेअहंअहिमितानांअहांसमाहारःअ
हंसमाहमित्यर्थः॥त्यजेत्॥उत्पातेजातेसतिसप्ताहंशुभेकर्मणित्यजेदित्य
र्थः॥दीपांतरमाह॥ ॥उक्तंचऋषिभिः।केतोःउक्तंनदृश्यंत्यजेत्॥यावत्केतूद
यंस्तावन्मंगलंनकुर्यादित्यर्थः॥तथाचार्ष्टिषेणिः॥परंसप्ताहमुत्पातेत्यजेत्केतू
दयंशुभेरिति॥भद्रालक्षणमाह॥ ॥एकाष्टमीमारभ्यत्रिदिनंस्यात्॥एकापूर्णिमाश्र

ष्टमी प्रसिद्धा॥ अनयोस्तिथ्योः प्राग्दले पूर्वेद्युर्विद्धविष्टिः स्यात्॥ प्रांत्येऽहनि रुद्रयोः
एकादश्यनुथीरुद्रएकादशी अनयोः प्रांत्येदले विष्टिः स्यात्॥ एतच्च द्वादश्यनुषयंअ
वहुळेशुक्लेस्यात्॥ कृष्णेनिरेकेषिहद्वादशेषुतिथिषुनिरेकेषु कृष्णकृष्णपक्षे
विद्धस्यात्॥ भद्रापवादःशा।डीयविवाहपटलेदूषितःअतःकारणाद्वर्जनोक्तः॥
अथगंडांतलक्षणमाह॥ ॥सार्पेंद्रांतिमभांततोत्रिघटिकंपूर्णांततोध्व्यर्धकं
कीटांत्यालिविरामतःकुघटिकंगंडांतमुर्द्धीधरं॥ सावैशूव्यहगाजियोगविर
तौभंतत्रचंद्रायुधंडुर्योगदिनभाच्चसानिरयुक्भेर्कस्तदैकार्गलः॥ ॥४७॥
टी०॥ ॥सार्पअश्लेषाइंद्रेज्येष्ठाअंतिमभंरेवतीएषामंततस्माल्लाल्लाकृप
रपरएकीपरतःअर्धिघटिकंगंडांतंस्यात्अर्ध्यश्चतस्रोघटिकायस्मिन्निसे ५९

ष्ठिघटिकंचतुर्थघटिकमित्यर्थः॥ एतडुक्रंभवति॥ उक्तनक्षत्रात्पूर्वघटिकाद्व
यंपरतोद्वयंघटिकाएवंघटिकाचतुष्टयंनक्षत्रगंडांतं॥ ॥अथतिथिगंडांतमा
ह॥ ॥पूर्णांततोर्ध्वकंपूर्णाःपंचमीदशमीपूर्णिमाःतासांअंततःअर्ध्यर्ध
कंगंडांतंपूर्वापरतःस्यात्॥ ॥अथलग्नगंडांतमाह॥ ॥कीटांत्यालिविरामतः
कुघटिकंकीटःकर्कटःअंत्योमीनःअलिर्वृश्चिकःएषांविरामोवसानंतस्मात्कु
घटिकंएकघटिकंभागर्द्धघटिका।परतोर्द्धघटिका॥ एवमेकघटिकंलग्नंगंडांतं
स्यात्॥ अथचंद्रायुधमाह॥ ॥सावैइतिसासाध्ययोगःवैधृतिःशूशूळःव्यय
तिपातः॥ गंगंडांतः॥ तदाख्ययोगानांविरतिरवसानंतत्रयद्भंनक्षत्रंतस्मिन्चंद्रा
युधंस्यात्अयुधंघातकं॥ तस्मात्तन्नक्षत्रंवर्ज्यमित्यर्थः॥ ॥अथैकार्गळमाह॥ ॥

दुर्योगइति॥ ॥विष्कंभातिगंडशूलगंडव्याघातवज्रव्यतिपातपरिघवैधृतयोनव
दुर्योगाः॥एषामन्यतमेसतिदिनभादिदिननक्षत्रादिसाभिजिद्युग्मभेअभि
जितासह्युक्तभेविषमनक्षत्रेयदार्कःसूर्योभवतितदाएकार्गलंस्यात्॥एकार्ग
लाशुभावरोधिनीयस्मिन्नित्येकार्गलःशुभफलावरोधकइत्यर्थः॥ ॥अथ
वारदोषमाह॥ ॥सूर्याद्यामदलंदिवैवनिगमाद्यश्वीशनागत्रिषट्संख्याक
कुलिकंदिवेंद्ररविदिङ्नृत्तुवेदहिकं॥व्येकंतन्निशिषोडशांशमपरेतिथ्यंश
मुशंतिनैःकालंकंटकमैनियंटममरेज्यन्यास्युजिद्भःक्रमात्॥४८॥ ॥दी०॥
सूर्यात्सकाशात्तत्तद्वारेषुक्रमेणनिगमादिकंयमदलंयामार्द्धमुशंतित्यजंतिमुनय
इतिशेषः॥उगमितंरवौ॥सप्तमितंसोमे।अश्विनौहौतन्मितंभौमे।इषवःपंचत

न्मितंबुधे।नागाःअष्टतन्मितंगुरौत्रिमितंशुक्रे।अब्धयःषट्तन्मितंशनौइत्येत
द्यामदलंदिवैवउशंतिनरात्रौ॥ ॥अथकुलिकादीन्याह॥ ॥इनादौसूर्यादौवा
रेदिवाइंद्रादिकंषोडशांशाःकुलिकंउशंति।अपरेतिथ्यंशंपंचदशांशंकुलि
कंउशंति।तन्निशितद्वौव्येकंएकरहितंइंद्रादिकंषोडशांशंचउशंति॥तद्य
था॥रवौदिवाइंदुमितंचतुर्दशांशंतद्रात्रौ।त्रयोदशांसोमेदिवाद्वादशांशंतद्रात्रौए
कादशमित्यादि॥अथतैरेवइंद्रादिभिर्मुहूर्तैरमरेज्यन्यास्युजिद्भःसकाशा
क्रमात्कालंकंटकंएनियंटंइनस्यापत्यंउमानैर्नियमः।तस्यघंटोयमयंटइ
त्यर्थः॥तंउशंति।एतदुक्तंभवति॥गुरुवासरेचतुर्दशांशात्रयोदशांशान्नवमं
मित्यादिअमरेज्योगुरुस्तस्मात्सकाशात्तत्तद्वारेषुइंद्रादिभिःमुहूर्तैःकालंउशंति।

ज्ञानबुधानतैरेवेंद्रादिभिःकंटकं। अस्फुजिछुक्रस्तस्मात्सकाशान्नैरेवेंद्रादिभु
क्तैःएनिघंटंयमघंटंनुयंति॥ ॥अथमुहूर्त्तानाह॥ ॥शुक्रेंद्वीज्ययमेषुगौ
करविभूतुल्यामुहूर्त्तादिनाडुष्टाःकुजेस्युःनिश्चयोयइतरेसंत्यर्द्धयामादिषु।
प्रेक्ष्यःसंप्रतिदृष्टिसूर्यचरणेब्रह्महितीयेपमःसूर्याद्याभनुविश्वपाग्नियमलें
द्वस्वर्कभैर्मृत्युदाः॥ ४९॥ ॥टी०॥शुक्रःप्रसिद्धः इंदुश्चंद्रः ईज्योगुरुःयमःशनिःए
षुक्रमेणगोकरविभूतुल्यामुहूर्त्तादिनाडुष्टाःस्युःडुमुहूर्त्तइत्यर्थः कुजनिश्च
गःकुजनिश्चिअगःसन्नमोमुहूर्त्तः॥अथयंथांतरे॥अर्यम्णोर्केतुहिनकिरणेराक्ष
सघ्नालसंज्ञाविप्रादिषुहोडुमुहूर्त्तानुक्रमाः अत्रनुस्वल्पानुक्रमस्यपरिहारमा
हायइतरइति॥येऽतरेमुहूर्त्तायंथांतरेपठितास्तेसर्वेऽर्द्धयामादिषुसंतिअतोमया

चनोक्तायतोऽर्द्धयामादीनांत्यागेतेपित्यक्ताःस्युःकिंग्रंथविस्तरेणेतिभावः॥एत
त्सूत्रज्ञास्यंति॥यथारौचतुर्दशोमुहूर्त्तोडुमुहूर्त्तः॥तत्रकुलिकोपिचतुर्दशो
मुहूर्त्तस्तयोरेकत्रसंज्ञावइत्यन्येपिविचारगम्याः॥नन्वेवंचेन्नहिपूर्वैर्यथापठि
तं॥मैवं॥तैस्त्वनधिकाधिकदोषविवक्षयोक्तमित्यदोषः॥ ॥अथपातसंभव
कालमाह॥ ॥प्रेक्ष्यइति।संप्रतिसांप्रतंदृष्टिसूर्यचरणेदृष्टियोगस्यचतुर्थच
रणेतथाब्रह्महितीयेब्रह्मयोगस्यहितीयचरणेअपमःक्रांतिपातोविलोक्यः
ब्रह्मसिद्धांताद्युक्तप्रकरणविलोक्यइत्यर्थः॥अथमृत्युसर्वत्रवर्जयेदित्युक्त
त्वान्मृत्युयोगमाह॥ ॥अर्काद्याइति॥ ॥अर्काद्याःसूर्याद्याःक्रमेणाश्वादिभि
र्नक्षत्रैःसहमृत्युदाः॥अनुराधाविश्वेउत्तराषाढापाशीब्रह्मतारका।यमलौअश्वि

नी॥इंदुर्मृगः अहिरश्लेषा।अर्कर्क्षं हस्तः॥एतड्कूंभवति॥अर्कोनुराधयासहव
र्तमानोमृत्युदः॥सौम्यउत्तराषाढया।भौमश्चतताारकया॥बुधोऽश्वन्या॥गुरुर्मृगे
णशुक्रोऽश्लेषया।शनिर्हस्तेनसहितोमृत्युदःस्यादित्यर्थः॥ ॥अथविषघटिक
याह॥ ॥पंचाश्विजिनखाग्नयश्चखकृताभाखंडलाभूछनाखिंशद्द्विशरराः
खरामनखधृत्येकाश्विनोविंशतिः॥शक्रैंदवोवसवारसशराःसिद्धानखाग्न
दिशोधृत्यष्टीजिनखाग्नयोश्विनइभ्योत्रेखिनाड्योविषं॥५०॥ ॥टी०॥ ॥पंचा
शदिति।अश्विनःअश्विन्याःसकाशात्नक्षत्रेषुयाभ्यःपंचाशज्जिनेत्यादि
भ्योघटिकाभ्योयेपरतोद्विनाड्यःचतुर्नाड्योविषंस्यात्॥तड्कूंभवति॥अश्विन्यो
पंचशद्घटिकाभ्योऽनंतरंचतुर्नाड्योविषं।एवमन्यत्॥एवशांकन्यासएवव्याख्या

नं॥ ॥अथैषांसृष्टीकरणमाह॥ ॥नक्षत्रस्यगतैष्ययोगगुणितःस्वस्वध्रुवःष
ष्टिहृत्सृष्टःस्यात्ततऊर्ध्वमब्धिघटिकाःसृष्टाःसुरेवंकृताः॥चंद्रःसौम्यभगो
थवाशुभमुद्दिष्टोथवाखांशगःकोणस्थश्चसुरेषुवाविषभयंहंतीहसांगेग
पः॥५१॥नक्षत्रस्येति॥नक्षत्रगतैष्ययोगेनगुणितःस्वस्वध्रुवःपंचाशज्जिनादिः
षष्टिहृत्सृष्टःस्यात्॥अनऊर्ध्वंसृष्टानंतरंअब्धिघटिकाश्चतुर्नाड्यः॥एवंतुक्रमे
कारेणकृताःसत्यःसृष्टास्युः॥एतड्कूंभवति॥ध्रुवश्चतुर्नाड्योपिनक्षत्रस्यग
तैष्ययोगगुणिताःकार्याः॥षष्टिहृताश्चकार्याः।तासृष्टास्युःसृष्टानंतरंविषा
ख्याज्ञेयाइत्यर्थः॥अथासांविषघटीनामपवादः॥चंद्रइति।चंद्रःसौम्यगःशु
भराशिगःयन्नविषभयंहंति॥अथवाशुभमुद्दिष्टःशुभश्चासौमुद्दिष्टश्चशुभ

सुहृत्तेनदृष्टःसन्विषभंयंहंति॥अथवास्वांशगःस्वनवांशेवर्त्तमानःस
नभयंहंतिवाइत्यथवाकोणास्तस्वबंधुगोपिचंद्रोविषभयंहंति॥कोणेनव
मपंचमे।अस्तंसप्तमंखंदशमंबंधुश्चतुर्थे॥एतत्स्थानगोपिचंद्रोविषभयं
हंतीत्यर्थः॥अत्रास्मिन्कोणादिस्थानेसांगेसलग्नेवर्त्तमानोंऽगपोलग्नपो
विषभयंहंति॥एवंपंचभंगाःसंति॥ननुसप्तमःखेटोविवाहेनंदिनःकथमत्र
चंद्रोगृहीतः॥सत्यं॥इदंवाक्यंसर्वकर्मसाधारणीयं।तस्मान्निंदितंस्थान
वर्जयेत्वान्यत्रयोज्यः॥ ॥तथाचबृहस्पतिः॥चंद्रोविषघटीदोषंहंतिकेंद्र
त्रिकोणगःलग्नंविनाशुभैर्दृष्टंकेंद्रेवालग्नेथवाफल्गुनदीपे॥विषनाशु
त्वितंदोषंहंतिसौम्यदृष्टेगःशशी॥मित्रदृष्टेथवायत्रवर्गस्थोलग्नपोपिवे

ति॥ ॥अथविवाहलग्नेइष्टनिष्टयहानाह॥ ॥लग्नेचंद्रखलारिपौशशिसि
तौसर्वेद्युनेखेबुधोज्ञोंत्येगुःसुखगोष्टमःकुजशुभाःशुक्रस्तनीयःशुचे॥ला
भेसर्वखगाःशुभाअखिलगास्त्र्यष्टारिगाःसुःखलाश्चंद्रस्त्र्यंबुधनेश्रियेंशभ
दृगेंद्वस्यान्मृत्यवेष्टारिगः॥५२॥ ॥टी०॥ ॥चंद्रश्चखलाश्चचंद्रखलाःतेलग्ने
वर्त्तमानाःशुचेशोकायभवंति॥तथारिपोपष्ठेविधुसितौचंद्रशुक्रौतथासर्वे
द्युनेसर्वक्रूरसौम्याःखनेसप्तमे।तथाखेदशमेबुधः।तथाज्ञश्चद्वींत्येद्वादशो
।तथाऽशुःशुक्रःखगःचतुर्थःनविद्यंतेगावःकिरणायस्येत्यशुःशुक्रः॥शु
क्रस्तमोशुश्चेतिबृहज्जातकेशुक्रनामानि॥तथाष्टमाःकुजसौम्याःकुजश्चशु
भाश्चतथा॥शुक्रस्तनीयःस्पष्टार्थः॥एतेत्रयेकमुक्तस्थानगाःशुचेशोकाय

भवंति॥ ॥अथइष्टानाह।लाभेएकादशेसर्वखगाःतथाशुभाःसौम्यखगाः
निद्यंविनासर्वस्थानगाःतथाखलाःक्रूराःअष्टारिगाःतृतीयाष्टषष्ठगाःतत्रा
ष्टमभौमोनिंदितःतंविनाअष्टगाःपापाग्राह्याः।चंद्रस्त्वंबुधनेतृतीये चतुर्थे
द्विनीयेचंद्रः॥एतेप्रत्येकंश्रियेलक्ष्म्यैभवंति॥श्रीकराइत्यर्थः॥एवंशुभाशुभ
ग्रहानुक्तानत्रविशेषमाह॥ ॥अंशेति।अंशभद्गेदूअष्टारिगःसन्मृत्यवे
स्यात्॥अंशोनवांशःभंलग्नं।द्रेक्काणः२द्यूस्वामीनवांशस्वामीलग्नस्वामी
द्रेक्काणस्वामी॥एतेप्रत्येकमष्टमषष्ठगाः॥मृत्युहेतवोभवंतीत्यर्थः॥अथ
कतिचिद्दोषाणामपवादमाह॥तत्रप्रथमंभृगुषष्ठापवादमाह॥ ॥कन्यातो
क्षिकन्यागेहगभृगुःषष्ठेपिनोभृंगक्षतौमृत्युगतोपिनुनाक्षिनोर्गेह ६५

स्थितोवार्कगः॥शुक्रेत्यारिविधुःस्ववर्गदृगितःस्वोजोयुतीज्येतनौशुक्रेवा
शुभदोथकंटकनिजांशोज्येक्षितःसद्ग्रहः॥५३॥ ॥टी०॥ ॥कन्याप्रसिद्धा
शुक्रस्यनीचंतौक्षिकोधनुधरः॥नाक्षगेहंपूर्वोक्तं॥भृगुशुक्रःनाक्षरवींडइति।
तत्रवेर्यहंसिंहः॥इडगृहंकर्कटः।एषांकन्यादीनांअन्यतमगेहगतोभृगु
षष्ठोपिनोभंगकृत्॥लग्नभंगकरोनभवतीत्यर्थः॥तथाचकश्यपः।नीच
गेतनुरीयेवानाक्षेत्रगतोपिवा॥भृगुषष्ठाकयोदोषोनास्तितत्रनसंशय
इति॥ ॥अथकुजाष्टमदोषापवादमाह॥ ॥भौमोमृत्युगतोपिनाक्षिनो
र्गेहस्थितोयदिभवति॥वाइत्यथवाअर्कगःअस्तंगतोयदिभवतितत
होनोभंगकृत्स्यात्॥अत्रनाक्षुर्बुधःकुजस्यविदरिःप्रागुक्तःतस्यगृहंमिथु

नःकन्याच॥ऋणेगृहंकर्कटःतदस्यएषामन्यतमस्थः॥अस्तंगतोवाऽष्टम
स्थोपिलग्नभंगकरोनभवतीत्यर्थः॥अस्तगइतिपाठस्तएवार्थः॥तथाचक
श्यपः॥अस्तगेनीचगेभौमेऋक्षेत्रगतोपिवा॥कुजाष्टमभवेदोषोनकिं
चिदपिविद्यतइति॥अथह्रादऋषेश्चंद्रापवादमाह॥ ॥शुक्लेइति।शुक्ले
शुक्लपक्षेऽस्तरिविधुःह्रादऋःषष्ठोवाचंद्रः॥सुवर्गदृगितःवर्गाश्चवर्गदृशः
शोभनानांवर्गदृशःसुवर्गदृशःइतःप्राप्तःसुवर्गदृगितःशुभवर्गशुभदृष्टि
शुक्रइत्यर्थः॥एवंविधेविधुःशुभदःस्यात्कस्मिन्सतिइज्येगुरौशुक्रेवा
ननौलग्नेसतिकथंभूतेगुरौ।स्वोजोयुजीरिति।सुतरांओजःस्वोजःउक्त
श्चबलंतेनयुनक्तीतिस्वोजोयुक्॥तस्मिन्स्वोजोयुजि॥अतिबलिष्ठेसती

त्यर्थः॥शुक्रस्याप्येनद्दिग्दोषणंएतद्भंगभवति।बलिष्ठेगुरौशुक्रेवाऽऽस
त्येवासतिशुक्लपक्षेचंद्रमाःशुभवर्गदृष्टिसहितोयदिभवतितदाह्रादऋ
षष्ठगोपिशुभदोइतिभंगकरोनस्यात्॥अन्यथानमुह्यत्तेदर्पणे॥कवौ
गुरौवाबलिनीस्थितेननौशुभेनदृष्टःशुभवर्गगःऋक्षी।विवर्द्धमानःशुभकृ
च्चनाशुभंकरोतितिष्ठन्नपिषष्ठरिष्फगोरिति॥अथसग्रहचंद्रदोषापवा
दमाह॥सग्रहःग्रहेणग्रहाभ्यांग्रहैर्वासहवर्त्तमानःसग्रहः बुधगुरुर्ज्येव
मन्यग्रहशुक्रइत्यर्थः॥यतःपूर्वशुक्रं।हिमरुचिंज्ञेज्योनखेटान्वितमिति।ए
वंविधःसग्रहोविधुःकेंद्रनिजवर्गेक्षितःसन्शुभदःस्यात्॥केंद्रंप्रसिद्धं।नि
जवर्गोनिजांऽशस्तवर्त्तमानोइज्यःकेंद्रनिजवर्गज्यःतेनइक्षितोवलोकितः

सग्रहचंद्रमाः॥शुभदइतिभंगकरोनस्यादित्यर्थः॥उक्तंचगुरुःस्वकीयवर्गे
स्थोवळवान्कंटकस्थितः॥पश्यन्स्वग्रहन्निर्तांशुंतदोषंविलयंनयेत्॥इति
॥ ॥अथकामान्यदोषापवादमाह॥ ॥दोषाणांज्ञातमिंदुजःज्ञातयुगंशुक्रो
गुरुर्घातयेल्लक्षंकंटककोणगोंगकमिनाम्बौजखिपातादिकान्॥भंगोये
विबळाननेत्रसफळाःसंध्यंशतुल्योफळःस्याद्भावांशसमोग्रहोखिळफलः
संध्यूर्ध्वगःस्यात्परः॥भ४॥ ॥टी०॥ ॥कंटककोणगःकेंद्रत्रिकोणगःइंदु
जोबुधोदोषाणांज्ञातंघातयेत्॥तत्स्थःशुक्रोदोषाणांज्ञातयुगंद्विज्ञातयु
गंघातयेत्॥तत्रस्थोगुरुर्दोषाणांलक्षंघातयेत्॥अपवादांतरमाह॥ ॥
अंगकंळग्नइनःसूर्यःअब्जःचंद्रोजस्विनचंद्रयोःसूर्यचंद्रयोरेजोबलम ६६

स्यास्तीतिइनचंद्रोजस्वि।एवंविधंलग्नंपातादिकान्घातयेत्॥उक्तंचवसिष्ठेन
एकार्गलोपग्रहपातलग्नाजामित्रकर्तृयुद्मादिदोषाः।नश्यंतिचंद्रार्कबलो
पपन्नैर्लग्नेयथार्कोभ्युदयेंधकारइति॥ ॥अथदोषापवादभंगमाह॥ ॥
भंगायेति।येभंगाःदोषभंगाःविबळाःगतबलास्तेत्रदोषभंगविषयेसफळा
नभवंति।दोषभंगसमर्थानभवंतीत्यर्थः॥तस्माद्दोषभंगकृतंबळंविचार्यदो
षभंगमादिशेत्॥इतिभावगतथाचोक्तमत्रि॥सामान्येनोदितादोषाभंगास्ते
षांतुतद्विदैः॥यदितेबळहिनाःस्युःप्रध्वंसाभावतांययुरिति॥ ॥अथभाव
शुद्धिमाह॥ ॥संध्यंशतुल्योफळइति॥संध्यंशातुल्यःसंधिभागसमानोग्रहो
फळदःस्यात्॥सदसत्फळदोनभवति।भावांशातुल्योग्रहोअतिबलफलःस्या

न॥संपूर्णफळदाताभवति॥अर्य्योन्मथेऽनुपातात्फळंवेद्यं।विशेषमाह॥
संध्यूर्ध्वगःस्यान्इति॥संध्यूर्ध्वगःसंध्यधिकोग्रहःपरःस्यात्॥परभावफळदो
भवतीत्यर्थः॥संध्यंशातुल्यइत्याद्युक्तंतर्हिकेनेसंधयःकेनैभावाइत्यपेक्षा
यांतत्साधनंकिंचित्स्थूळंदृत्तेनैकेनाह॥ ॥भागास्वुर्नतनाडिकारसहताल
ब्धीनयुक्प्राक्परेसूर्यःखंरससंयुक्खंकथितवलल्लग्नंसपञ्चांमदः॥व्यस्ता
श्चरिळवोथभन्युनइमौभूयोंगपातालयोःक्षेप्योपन्नतःससंधयइमेष
ङ्गान्विताःस्युपरे॥५५॥ ॥टी०॥ ॥ननाडिकारसाहताभागास्युः॥ननसा
धनंज्ञातकपन्हृताभुक्तं॥एत्रेःशेषमित्तंयुत्तंदिनदळेनाक्षोगतंशेषकंविस्ते
प्यंखलुपूर्वपश्चिमनतमिति॥एतदुक्तंभवति॥सूर्येष्टकालाभ्यामिष्टकाली

नेलग्नंसाधयित्वाननंचसाधयित्वाननइष्टकालभवंननंपक्षुणंसन्भागाः
स्युरित्यर्थः॥प्राक्पश्चिमेननेक्रमेणतन्यूनयुक्सूर्यःतैर्भागैर्न्यूनयुक्॥पू
र्वेणतेसतियुक्युक्तस्तात्कालिकःसूर्यःखंस्यात्।दृग्गमभावःस्यादित्यर्थः॥
तत्खंरसपञ्चांशोयुक्तंसत्सुखंस्यात्॥चतुर्थभावेस्यादित्यर्थःकथितवल्लग्नं
ज्ञेयांननसनषड्भंषड्भाग्निसहितंसत्मदःस्यात्॥सप्तमभावःस्यादित्यर्थः।
एवंभावचतुष्टयंसाधयित्वांनर्भावसाधनमाह॥ ॥व्यस्तार्त्रंत्रिलवइति
विगतःअस्तःअस्तिभावोयस्मान्नद्यस्तंनचननअस्तंचव्यस्तार्त्रंसमभाव
रहितदृग्गमभावइत्यर्थः॥तस्यत्रिलवोनत्र्यादिकोग्राह्यः॥अथदृक्युतः
द्विपतितःकार्यःएतौत्रौकेवलत्रिलवदृक्युतत्रिलवौपृथक्पृथक्कुरुदृग्

मौसंनौएथकेलनेअंशुनिचयोज्यौअयमर्थः॥कुम्नत्रिलवोलम्नेयोजितसन्
द्वितीयभावोभवति॥हृश्नोयोजितःसन्तृतीयभावोभवति॥अथहृक्च्युत
स्त्रिलवःकुम्नःअंशुनिपूर्वसाधितेचतुर्थभावयोजितःसन्पंचमभावोभव
ति॥ ॥तत्रैवहृश्नोयोजितःसन्षष्ठभावोभवति॥तेषद्तेनंतरासाधि
ताभावाःसपट्षड्भिःसहिताःकार्याःतेतत्तत्तमानेयाः॥लग्नंसषड्भमदृ
निवत्॥ननुसुखलाभोदयोभावाःस्युः॥ ॥अथसंधिसाधनमाह॥ ॥संधि
र्द्वियोगोर्धिनइति॥हृयोर्भावयोर्योगार्द्धंसिद्धिःस्यादितिस्पष्टं॥ ॥अथपाप
नरस्यचारख्या॥व्यस्तेतिसन्नरहितस्यदृग्गमभावस्यअरिबलःषड्भागोराश्या
दिकःसएथकभूच्युतःएकस्मात्पातितःइमौउभौभूयोवारंवरंअंगपातालयोः ६८

प्रथमचतुर्थयोःक्षेप्यौनतुतःलग्नात्संधयःसंधिसहिताःषड्भावाःस्युः॥इमे
षड्भावाःषड्भान्विताःसंतःपरेसंधयोभावाःस्युः॥एवंभावसाधनंकृत्वासं
ध्यंशातुल्येफलेइति॥प्रागुक्तंग्रहफलंविचार्यं॥अंतरेनुपातः॥भावसंध्यं
तरेणान्नंसंधिखेटांतरात्फलमिति॥ज्ञानकपहृतेःएतत्स्थूलभावानयनं।
सूक्ष्मंतुज्ञानकपहृतेःसकाशादवगंतव्यं॥ ॥अथकर्न्नरिदोषलक्षणंसा
पवादमाह॥ ॥इंदोर्वाहरिज्ञास्यखगतयोःस्यात्क्रूरयोःकर्न्नरीखेवंक्यंत
क्रुजर्महत्यथगुरोरिःफेशुभेवाननौ॥खेज्ञेसौम्यखगेपिवागुरुभृगुज्ञैःकेंद्र
कोणेश्ववा१४।७।९।१०।५॥चेत्तःकर्न्नरिकारकौदिविचरौनिचस्थितौसानहि
॥५९॥ ॥टी०॥ ॥इंदोश्चंद्रात्सकाशात्वाइत्यथवाहरिज्ञास्यात्सकाश

न्वाइत्यथवाहरिजाल्लग्नात्सकाशात्व्ययस्वगनयोःव्ययेद्वादशंस्वेद्वितीये
तिवुभयत्रगनयोःक्रूरयोःसतोःकर्त्तरीस्यात्॥अथमहत्कर्त्तरीलक्षणमाह।
स्वेद्वितीयेस्थितः। क्रूरोयदिवक्रीस्यात्॥अंतेद्वादशस्थितःक्रूरोयदिऋजुमा
र्गगामीस्यात्तदामहतीस्यात्॥एवंकर्त्तरीलक्षणमुक्त्वाथनङ्गमाह॥गुरोरिः
फेंत्येद्वादशेसतियाकर्त्तरीनस्यात्एवेत्येकोभंगः॥वाइत्थवाशुभेग्रहेषुबुध
गुरुशुक्राणांअन्यतमेनलग्नेसतिसानइतिद्वितीयोभंगः।स्वेद्वितीयेअन्ने
चंद्रेसतिसानेतितृतीयोभंगः।वाइत्थवासौम्यस्वगेद्वितीयेसतिसानेतिच
तुर्थोभंगः॥वाइत्थवासौम्यस्वगेद्वितीयेसतिसानेतिचतुर्थोभंगः।वाइत्य
थवाकेंद्रकोणेषुभृगुविदीज्यैःभृगुःशुक्रःविन्बुधः॥इज्योबृहस्पतिनैःषड्भिः

कालाच्चेतिसप्तम्यर्थेतृतीयाःसाकर्त्तरीनस्यादेवेतिपंचमोभंगः॥वाइत्यथवा
कर्त्तरीकारकोक्रूरोदिविचरौनीचस्थितायदास्यातांनदासानस्याद्देवेतिषष्ठो
भंगःहिअवधारणे॥ ॥अथपंचकदोषंसापवादमाह॥ ॥लग्नंसेततिथि
ग्रहेहीदिभद्रकवेदर्तुभूशेषकैरोगाग्निहरात्यासाख्यजरुजंरण्यर्कमौंजी
घुच॥अग्निभौमगृहद्युषुद्युशनिसेवेंदुधिनंहारमीज्यारेतीषपरंविवाह
सिनविन्संध्यासुहीनेननौ॥५७॥ ॥टी०॥ ॥लग्नंइष्टलग्नं।सेततिथिइत्ता
चासौतिथिश्चइततिथिःगततिथिःतयासहवर्त्तमानंसेततिथि।ग्रहेहीत्त
नवभद्रकंकार्यं॥इभद्रकवेदर्तुभूशेषकैः॥इभाऽष्टौ।हद्रौहे।वेदाश्चत्वारः।ऋ
तवःषट्।भूरेका।एतन्मितैःशेषैःक्रमेणरोगाग्निहरात्यजास्युः।रोगः

प्रसिद्धः।इनोराजा।राजाधिपःपतिःस्वामीनाथःपरिवृढःप्रभुःईशानभर्त्तेइत्न
इत्रिनेतिधनंजयः॥हरश्चौरःअंत्ययोमृत्युःएतेपंचकास्युरित्यर्थः॥एतदुक्तंभ
वति॥लग्नंशुक्लप्रतिपदादिगतितिथियुतंकृत्वानवभिर्हृत्वाभशेषेरोगः।
द्वित्रेषेऽग्निः।चतुःशेषेराजा।षट्शेषेचौरः॥एकशेषोमृत्युः॥अथैतेकुत्रव
र्ज्याइत्याह॥रव्यर्कमौंजीषुरुजंत्यज॥रवौभेऽर्केआदित्यवासरेमौंज्यांरुजं
त्यज॥भौमग्रहद्युषुअग्निंत्यज॥भौमादेषुप्रसिद्धस्तेषुद्युनिसेवेंदुषुइनं
द्युर्दिवानिःवासरः।सेवास्वामीसेवनं।इंदुःएषुइनंराजानंराजयंचकंत्यज॥
इज्योगुरुवारःआरेभौमः॥इतिर्गतिःयात्रेतियावत्॥तत्रहरतीतिहारःतंचौ
रपंचकमितियावत्॥अपरवर्जितंमृत्युपंचकंविवाहःप्रसिद्धःसितःशुक्रःवि

त्तुधःसंध्याकालःआसुमृत्युंसजेतिअस्यापवादमाह॥कस्मिन्सति।तनौल
ग्नेबलेहीनेहीनबलेसति।बलिष्ठेलग्नेसति।एषांकिमपिनबाधकइत्यर्थः।
तथाचज्योतिःप्रकाशे॥रोगंचौरंत्यजेद्राजौइत्यादि।तत्रापिचेल्लग्नंयत्नबला
द्यंतच्चनिःफलमिति॥बलंजातकात्ज्ञेयं।लग्नजातके॥अधिपयुतोदृष्टो
वाबुधगुरुनिरीक्षितश्चयोराशिःसभवतिबलवाचयदादृष्टेयुक्तोपिवाशेषै
रित्यादि॥॥अथभवनांशयोर्मृद्विसापवादमाह॥॥जन्मर्क्षोदयतोमृतीन
दयिपौनक्राश्वयेतल्लवाःनक्रेचांगगमंनकुनखलुनचेन्ननक्षामिमित्रैकना।
क्षलोशोधटयुग्मभीरूधनुषांविक्षालभांशौनथाचंद्रोष्ण्ययुतौमृतिंवितनु
तेदैन्यंचहीनौजसः॥५८॥ ॥टी०॥ ॥जन्मर्क्षोदयतजन्मराशिजन्मलग्नाभ्यां

मृतीयेऽष्टमभवनेयौचतद्धियौतयोर्मृत्युभवनयोःस्वामिनौतत्स्वामिनौत
योःअथवायमर्थः।तयोर्जन्मनिंद्यभयोःस्वामिनौतत्स्वामिनौतयोर्यदिमित्रै
कतानस्यात्॥मित्रंचएकश्चमित्रैकोमित्रैकयोर्भावोमित्रैकता॥साचेन्नस्यात्
अनेनसर्वोक्तस्यसार्थकताभवति॥यदितयोर्मित्रतास्यात्॥अथवाएकतास्या
न्नदानायंदोषइत्यर्थसिद्धं॥वसिष्ठः॥यस्याष्टलग्नेतद्धिश्वरेवारःशौतदीये
थविलग्नगेवा॥सप्तमोमोतियथामनोज्ञस्त्रिनेत्रभालांबकवह्निनेवेति।
अन्यचजन्मर्क्षलग्नलग्नाभ्यांरंध्रेशवष्ठौचयौ॥विलग्नसंस्थितानेतांस्तद्द
शंशानपित्यजेन्नृति॥बृहज्जातौ॥लग्नंजन्मर्क्षंत्याज्यमष्टमंसर्वकर्मसु
नत्वप्येकेत्वनास्त्येवतनस्त्वेवदोषकृत्॥नदोषोऽष्टमस्थयदिजन्मेशरंध्र ७१

सुहृदौचेन्नदाकार्यमंगलंमुनयोविदुरिति।चतुर्थेह्लादशेभवनयोर्दोषोनात्रो
क्तः।यतश्चतुर्थेह्लादशंलग्नंयदिगुणान्वितंइतिपूर्वाचार्यमतंहृदिधृत्वा
गुणमेवांगीकृतं॥तत्रस्त्रीहत्क्षपतिनचतनुंपंचषट्खेटोन्विनां।भंगमशुभं
चेद्देहवर्गोनतमिति॥सगुणस्येवांगीकारात्किंव्यस्तेर्थविरोधेतिभावेन॥॥
अंशशुद्धिमाह॥अस्तोंशाइति॥घटयुग्मभीरुधनुषांभंशाःशस्तःस्यात्।धट
लुलायुग्मंमिथुनं।भीरुःकंन्याधनुःपसिद्धं॥एषामंशोनवांशाःस्यात्॥तत्रापि
विशेषमाह॥विगतशौबुधोयेभ्यस्तेविज्ञाःनेचतेअस्ताश्चतेषांभांशौराशिन
यांशौमृतिंवितनुतः॥अर्थोहस्तमितस्यापिबुधस्यभांशोदोषकरोनभवतः।
तथाचेशेऽष्टमेशुक्रौचंद्रेणापयुतेणवासुक्रौमृतिंमरणंवितनुतःकुरुतः।वक्र

वरयोरितिशेषः।हिनौजसोनिर्बलस्यभांशौदीननांवितनुतः॥विशेषांतरमा
ह॥ ॥नोवर्गोनमतोविनांतिमलवंदद्याच्चरर्क्षेचरंचंद्रेतौलिमृगास्थगेनच
तनुंपंचेष्टखेटोन्विनां॥मेषादिष्वजनक्रतौलिककुलीरद्यानवांशाःक्रमादि
ष्टपूर्वनवांशकादन्नाहतास्त्र्याप्तालवाद्यानतनुः॥५९॥ ॥टी०॥ ॥वर्गोनमःव
र्गोनमेनविनाअंतिमलवंचरमंनवांशंनोदद्यात्॥यल्लग्नंसएवनवांशोवर्गोन
मं।तथाचरर्क्षेचरलग्नेचरंलवंचरंनवांशंनोदद्यात्॥कस्मिन्सति।चंद्रेतौलि
मृगास्थगेइत्येवोक्तंतन्मेषकर्कटयोर्विवाहनक्षत्राभावात्॥तथातनुंलग्नंपं
चेष्टखेटोनितांनोदद्यात्॥यत्रलग्नेपंचइष्टग्रहानभवंतितल्लग्नंनदेयमित्य
र्थः॥ ॥अथेष्टनवांशलग्नसाधनमाह॥ ॥तत्रतावन्मेषादिष्टआद्यांशाना ७२

ह।मेषादिष्विति।मेषादिष्वजनक्रतौलिकुलिरद्याःनवांशाःक्रमेणोक्ताः।
तद्यथा।मेषेजाद्याःमेषाद्याः।वृषेनक्राद्याः।मिथुनेतौलिकाद्याःसिंहाद्याःकर्क
टेकुलिरद्याःकर्कटाद्याः।एवंसिंहेऽनःसिंहमेषाद्याः।कन्यायांमकरद्याः।तू
लायांतुलाद्या।वृश्चिकेकर्काद्याः ॥धनेमेषाद्याः।मकरेमकरद्याः।कुं
भेतुलाद्याः।मीनेकर्काद्यानवांशाऊह्याः॥इष्टात्पूर्वनवांशकाःगतांशाःदन्नाह
ताःदन्नगुणिताःत्रिभिरप्ताहतालवाद्याभागाद्यातनुःस्यात्॥अत्रोदाहरणं
इष्टलग्नंमेषःतत्रमेषादिकाअंशाःप्रवर्त्तते॥इष्टांशाःकन्या।सिंहाद्याखष्टः।पू
र्वांशकःपंच॥एतेदन्नाहताः॥५०॥त्र्याप्ताःलवादिलब्धं१६।४०।इष्टलग्नसहि
तं।०।१६।४०॥अथोदयास्तसूद्दिमाह॥ ॥लग्नंशैखपदृग्युतौनृमुखदौचान्यो

न्यपाद्येक्षितौनाभ्यांसप्तमकौनथैवयुवनेनीचेन्नथोमृत्युदौ॥द्विघ्नेर्कोनविल
मकेरविसितज्ञेंद्वार्किजीवासृजोहोरेशाद्युपतेःखलेक्रिखलज्ञानेष्टाशुभेम
ध्यमा॥६०॥ ॥टी०॥ ॥लग्नांद्यौलग्ननवांशौस्वपदस्थुतौस्वस्वपतिनायुतौद्व
यौवासंतौनृसुखदौवरस्यसुखदौस्यातां।वाइत्यथवाअन्योन्यपतिनाआद्यौ
द्वेक्षितौवासंतौनृसुखदौस्यातां॥इत्युदयशुद्धिमुक्त्वास्तशुद्धिमाह॥नाभ्यांस
प्तमकौनथैवेतिनाभ्यांलग्नांशाभ्यांसकाशात्सप्तमकौअन्योन्यपाद्येक्षितौ
युवतेःसुखदौस्यातां।नोचेन्न।एवंचेन्नस्यात्॥तदातयोर्मृत्युदौस्यातांक्रमे
ण॥अथेष्टकाळेहोरासाधनमाह॥ ॥द्विघ्नेइति।अर्कोनविलग्नकेद्विघ्नेष्ट
तेसतिद्युपतेःसकाशाद्धोरेशाभवंति।तेषांगणनाक्रममाह॥तेकेहोरेशाः॥

रविसितज्ञेंद्वार्किजीवासृजः॥रविःप्रसिद्धःसितःशुक्रः।ज्ञोबुधः।इंदुश्चंद्रः।आ
र्किःशनिः।जीवोगुरुः।असृङ्मंगलः।खळेक्रिपापवारेस्वलग्नाद्धोरानेष्टाशुभे
मध्यमास्यात्।अर्थात्शुभहोराशुभनारापापवारेमध्यमास्यात्॥अत्रोदाहर
णं॥गुरुवारेइष्टार्कः१।२५।८॥इष्टालग्नं।४।१०।इदंअर्कोन॥२।१४। २।इदंद्वि
घ्नं।४।२८।४४।ऊर्ध्वकसमानागनाहोराश्चतस्रःवर्त्तमानायंचमीहोरासागणो
नाक्रमेणद्युपतेगुरोःसकाशाद्गणेनीया॥जीवासृजादिगणनयाबुधहोरावर्त्त
माना।अग्रेद्वेःपरमजामित्रगयद्वज्ञानार्थमुपायमाह॥ ॥तावन्नस्यफल
माह॥लग्नेंद्वोःस्मरगेशुभाशुभस्वगेलग्नाधिमृत्युतनोर्जांगोनाक्रूतमौरिका
स्वस्वयमैर्लब्धंयदाब्दीषवः॥सन्त्रिघ्नेचनिजांशभेलमखिलंपञ्चेदरिभा

यगेसूर्येवाखजलाद्यकोणगशुभोवाऽङ्गंत्रपश्येन्नतत्॥६१॥ ॥टीका॥ ॥लग्नं
स्वोस्मरगेसन्नमगेशुभाशुभखगेसतितदाआधिमृत्यूस्तः॥शुभेसतिआधिर्म
नसलाभोस्ति।अशुभेसतिमृत्युरस्ति।तदायदाकदाततःस्मरगाद्गुहात्अङ्गंगो
नात्चंद्रात्सन्नमःचंद्रोनः।अतःसन्नमस्थोलग्नोनइत्यर्थः॥तस्मात्कृतमौरिकान्
खखयमैर्हिन्त्या२००लब्धंअब्धिषवःचतुःपंचाशत्यान्॥नदैवअधिमृत्यूस्तः।
अन्यथानेत्यर्थः॥अत्रोदाहरणंपूर्वकल्पितमिदंलग्नं४।१०।०।तत्सन्नमगोयंक
श्चित्।१०।१५७।अयंलग्नोनः।६।१।७।अयंकृतमौरिकः।१०।८ ।७।अस्मात्खख
यमैः।२००।लब्धं।५४।अथास्यभंगमाह॥सन्निति।सन्सद्गृहःस्विष्टोऽत्रनिजांश
भेवर्त्तमानः॥अस्तंअस्तभवनंअखिलेपश्येन्नदानज्ञामित्रेनस्यात्॥

शोभनश्चासौऽष्टश्चऽतिस्विष्टःशुभमित्रं।स्विष्टश्चनिजंचउच्चश्चस्विष्टोच्चनिजांश
अंशश्चभंचअंशभं।स्विष्टोच्चनिजानांअंशभंस्विष्टोच्चनिजांशभंतस्मिन्।स्वि
ष्टस्यशुभमित्रस्यअंशोनवांशे।भेशेवर्त्तमानः।अथवाउच्चस्यअंशेभेवर्त्तमा
नः॥अथवानिजस्यस्वस्यांशेभेववर्त्तमानः।अस्तमखिलेपश्येत्॥तदातन्नै
सिकङ्गंगाःवाऽत्यथवाकेरवौअरिस्थायगेसतिपष्टतृतीयैकादशेसतितन्नेति
त्रयोभंगाः।वाऽत्यथवाखजलाद्यकोणगःशुभः।अङ्गेचंद्रमसंपूर्णंयथास्या
न्नथाऽक्षेत्पश्येत्।तदातन्न।खंदशमं।जलंचतुर्थं।आद्यलग्नं।कोणेनवपंचमे।
एषामन्यतमगतोन्यतमःशुभग्रहश्चंद्रमसंनिखिलदृष्ट्यायदिपश्येन्नदाज्ञा
मित्रंनस्यादित्यर्थः॥एतेपंचभंगाःसर्वेमिलिताश्चतुर्दशभंगाःसंपद्यंते॥ ७ ॥

॥अथदृष्टिलक्षणमाह॥ ॥त्र्यस्रंकोणमवायुरैनिगुरुभूगपुत्राःक्रमात्पूर्णया
दृष्ट्यान्येचरणोन्नरंचसकलाःपश्यंतिपूर्णंधनं॥भंहोरात्रिलवोनवांशकइ
नांशत्रिंशदंशाःक्रमाद्वर्गाःसप्तशुभजःपरैरुक्तसुहृद्दोनाब्ध्युनवर्गतनुः॥३५
॥त्र्यस्रंतृतीयदशमंकोणंनवपंचमं।आबायुश्चतुर्थाष्टमंएतद्युग्मत्रयक्रमे
णएनिगुरुभृपुत्राःशनिगुरुभौमाःपूर्णयादृष्ट्यापश्यंतिशनिस्त्र्यस्रं३।१०॥
पूर्णयादृष्ट्यापश्यति॥गुरुःकोणं९।५पूर्णदृष्ट्यापश्यति॥भृपुत्रःअबायु४
८।१०।५।तथाचैतद्युग्मत्रयंअन्येग्रहाश्चरणोन्नरंयथास्यात्तथापश्यंति।
तद्यथा॥त्र्यस्रं३।१०।एकयादृष्ट्यापश्यंति।कोणं९।५।द्विपाददृष्ट्या।अबापु
४।८।त्रिपाददृष्ट्यापश्यंति।सकलाःग्रहाःधनंसप्तमंपश्यंति॥ ॥अथषड्वर्गसा ७५

धनंविवक्षुस्तावन्नमान्याह॥भंहोरेति।भंगृहं।होरेत्यर्द्धं।त्रिलवोदक्काणःनवां
शकःप्रसिद्धः।इनांशोद्वादशांशाः।त्रिंशदंशाःप्रसिद्धाः।क्रमादेतेवर्गाप्रोक्ताःशुभजः
शुभग्रहजोवर्गःसप्तशुभःप्रोक्तः।परैराचार्यैःसुहृदोमित्रस्यवर्गःसप्तप्रोक्तःअधि
वर्गेनकंअंगंचतुर्वर्गोनंलग्ननसप्तप्रोक्तं॥अथैषांसाधनमाह॥ ॥प्रोक्तंपाराशृ
हमोजभेर्कशशिनोहोरेसमेज्ञार्कयोर्द्दकेद्प्राक्सुतधर्मपोनवळवःप्रोक्तःस्व
नोर्कांशकाःशुक्रज्ञेज्ययमाःसूर्यांशकाःसुनीभार्थेषवोयुग्मभेत्रिंशाख्येविषमेत
एवगदितास्तुल्याश्चषड्वर्गकः॥५६॥ ॥टी०॥ ॥गृहंयस्यग्रहस्ययत्गृहंप्राक्प्रो
क्तंभेनामंशुचामित्यादि॥ ॥अथहोरासाधनमाह॥ ॥ओजभेविषमराशौ
अर्कशशिनोर्होरेक्रमेणभवतः॥प्रथमंपंचदशभागेशुभर्कस्यहोरा॥अपरंपंच

दशाभागेषुशशिनश्चेद्दृस्यहोरास्यात्॥अथसमरशौअज्ञार्कयोहोरेक्रमेणभव
तः।प्रथमपंचदशभागेषुचंद्रसः॥द्वीतियपंचदशभागेषुरवेर्होरास्यात्॥अथ
द्रेक्काणसाधनमाह॥ ॥द्रेक्केडिति॥द्रेक्कोद्रेक्काणः।त्रिविधोदशादशाभागात्मकः
।तस्यद्रष्टईशः।प्राक्सुतधर्मपोज्ञेयः।प्राक्लग्नंसुतपंचमं।धर्मोनवमं।तान्पानी
तिप्राक्सुतधर्मपः।एतद्रुक्कंभवति।प्रथमद्रेक्काणस्वामीलग्नपतिः।द्वितीयद्रेक्का
णपतिःपंचमपतिः।तृतीयद्रेक्काणस्वामीनवमपतिःस्यादिति।नवलवःप्रोक्तः॥
भागेवशास्तोंशइत्यादि॥अथहादशांशसाधनं॥ ॥स्वतोर्कांशकः।स्वस्मादि
निस्वतःलग्नतःइत्यर्थः॥अर्कांशकोद्वादशांशोज्ञेयः॥तद्यथा॥राशीभागास्त्रिं
शत्३०एतेद्वादशभिर्विभाजिताःलब्धंसार्द्धभागद्वयं२।३०॥इदंद्वादशांशमा ७६

नं॥तदेवगणनीयं।सार्द्धभागद्वयंलग्नस्यद्वादशांशनाथःस्यात्॥अथत्रिंशां
शसाधनं।शुक्रेनिशुक्रःप्रसिद्धः।ज्ञोबुधः।इज्योगुरुः।यमःशनिः।अस्रजंगलः
एषांपंचानांक्रमेणात्रशरमुनिभार्थेषवःस्युः॥शरपंच।मुनयःसप्त।इभा
ष्टौअर्थाःपंच।इषवःपंचशुक्रादीनांभागास्युः॥एतद्युग्मभेसमरशौज्ञेयं।
एतदपिलग्नोत्पन्नभागावसानपर्यंतंगणयेत्॥यत्रविश्रांतिः।सत्रिंशांश
नाथःविषमेराशौतएवगदिताःग्रहाःभागाश्चव्यस्ताःविलोमाज्ञेयाः।इतिष
ड्वर्गोनिरूपितः॥अथदृष्टसाधनंविवक्षुस्तावत्सूर्यसाधनमाह॥ ॥संक्रांत्य
नरहो हतादिनगणादग्नेभपूर्वोरविर्मेषाद्यानभयुग्यनोपनतेवैराशौस
पङ्क्तिःसच॥तज्ज्ञेयांशाहतस्वोदयवियत्प्राप्तंतथालग्नोभुक्तांशकलितेन

फळंक्षेत्रफलंस्यादित्यर्थः॥कथंभूतंफळंसायं॥आयेनसहवर्त्तमानंसायं।इष्टाय
सहितमित्यर्थः॥एतत्क्वेष्टायनक्षेत्रजंफळंभवतिन्यासःवाइत्यथवासायेफळंइष्ट
हृद्द २१६॥घ्न्यायुतंसत्फळंस्यात्॥इष्टश्चअधिहृद्भक्तः।इष्टोइष्टायःतयोर्घ्नोहतिल
ब्धायुतमित्यर्थः।इदमपिक्वेष्टायनक्षेत्रजंफळंभवतीति।अत्रोक्तन्यासएवव्याख्या
नं॥तथाचभंगनाथदैवज्ञस्यसूत्रं॥इष्टताप्तिष्ठ्यूर्घातेयआयस्तेनउनितेष्टकःत्रि
हृल्लब्धाहतांगाश्चि२युतेचेष्टायनंभवेदिति॥ ॥अस्यार्थःइष्टभास्यष्टिघात।इष्ट

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७
॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥	॥

११६

भंचआप्तष्टिश्चतयोर्घातोगुणनंतस्मिन्प्रथक्॥स्यापितेयआयस्तेनउनितेष्टक
यदिऊनोनभवति॥तदाष्टौप्रक्षिप्यस्फुटनायः॥ऊनितेष्टायःस्त्रिहृत्॥लब्धाहृत्
श्चयुतेलब्धेनआहताश्चतेअगाश्चिनश्चतैरथक्स्थापितेइष्टभाःस्यष्टिघातेयुते
सतिइष्टायभंक्षेत्रफळंभवेत्॥आयश्चभंचआयभेयस्मिन्तत्तथा॥अत्रयदित्रि
भिर्निशेषे।भागोनगच्छतितदातत्रतावत्॥अशेष्याःयावत्त्रिर्भागोनिशेषेगच्छति
तथाचस्थालुगिदैवज्ञस्यसूत्रं।ष्येकेष्टर्क्षहताद्विबाणशशिनो१५२।त्यक्ता७।
युतास्तेपिचष्येकेष्टायहतैकनागघ्नसहिताषण्मूर्त्तिभिर्हताः२६।शेषंक्षेत्रफ
लंभवेदभिमतंक्वेष्टायनक्षेत्रजंस्याद्दैर्घ्यंतदभिष्टविस्तृतिहृतंदैर्घ्याहृतंविस्त
तिरिति॥स्पष्टार्थोयंश्लोकः॥इत्यादिविचारणयाइष्टक्षेत्रफळंअवकाशानुरू

पंहृदिश्त्वास्थलंसाधयेदित्यर्थः॥ ॥अथस्थलसाधनायसूत्रमोटनमाह॥।
द्विघ्नायामसमितंद्विपाश्रमजस्सूत्रंविधायांकयेआपामंग्रियुतेचविस्तृतिदळें
तात्कर्षकोणाभिधौ॥पाश्रौक्षेत्रविषमसंकुनिहितौकृत्वाघमाकर्षयेत्कोणे
संकुरितीतरेविनियाइज्ज्वंतयोश्चापरौ॥७१॥ ॥अजस्सूत्रंनूतनसूत्रंद्वि
घ्नायामसमितं॥द्विगुणितदैर्घ्यसमानमित्यर्थः॥द्विपाश्रं।द्वौपाश्रौयस्मिन्ततत्।
द्विपाश्रं॥एवंविधंसूत्रंविधायतदंतयोःपाश्रौकृत्वाअंकयेत्॥एतदुक्तंभवति
अत्रगोपीएजोक्त्यादाहरणं॥आपःदृष्टःपकल्पितःअत्रनक्षत्रंचएदृष्टंकल्पि
तंकश्चिद्गृहकर्तुःएतस्मिन्नानक्षत्रेप्रीतिर्देवर्तनोअतःकियन्मितेक्षेत्रफलेएत
दायनक्षत्रेभवतनदाह॥आयः।व्येकःपअस्यअधगोभूएएनंचपरस्परंहतिर ११७

७६भंदृष्टंएअनयोर्युतिएपभरतुभक्त्वाशेषं१३।कोहकप्रकृत्यादिशुगणनयात्र
योदशमितस्फ१पआयंआहिहतिः११आये२५सहित११७जातंदृष्टंक्षेत्रफलं।एव
दृष्टायदृष्टनक्षत्राभ्यांकल्पिताभ्यामन्यदपि॥क्षेत्रफलेअष्टांकज्ञानमुक्तंःअष्टावशे
दशेस्थानेदशमेदशमेतनःअष्टाधिकतयालेस्थानभमित२७स्थानकेषुच॥९॥
गोपीराजमतेआप्रकाशंतरेणअनेकधाक्षेत्रफलेपितएवायननक्षत्रेस्थानांतस्यो
दहृतिः॥इदंनागतंसायंकृतंस्पष्टंक्षेत्रफलं१७७इदंषष्टिहृभ्यायुतंकोर्थः दृष्टां
कएक१हिघ्न्या२दिशुएकःस्फःतत्रएकेनेष्टगुणिताअष्टिहृक२१६तथाद्वेके
न२।४३२त्रिभिश्च६४८एवंयथाक्रमंस्पष्टक्षेत्रफलेन११७पुनावादृष्टंक्षेत्रफलंसा
त३३३।५४९।७६५॥एभ्यश्चआयनक्षत्रेतेएवभवनःएवंसर्वत्र॥ ॥पूर्वकः

ल्पितक्षेत्रस्यदैर्घ्यमितसूत्रंद्विगुणंविधायतदंतयोःपाशौकृत्वाअंकयेत्॥कुत्रकु
त्रांकयेदित्याह॥आयामांग्रियुतेवापरंविस्तृतिदलेअंकयेत्॥त्रयश्चतेआयामं
मयश्चतेतथातैर्मिते।तस्मिन्॥एतदुक्तंभवति॥क्षेत्रदैर्घ्यंचतुर्भिर्भक्त्वालब्धंअंघ्रि
प्रमाणं।एकस्मादंतात्अंघ्रित्रयंमिलित्वाचिह्नयेत्॥तस्मादेवांतात्विस्तृतिदलेक्षे
त्रस्यविस्तारईदृमितेअंकयेत्॥तौअंकौकर्षकोणाभिधौस्तः॥अंघ्रित्रयेकृतोकः
कर्षाख्यविस्तृतिदलेकृतोंकःकोणाख्यः॥एवंसूत्रमोटनमुक्त्वारज्ज्वसाधनमा
ह॥पाशाविति॥पाशौक्षेत्रविरामशंकुनिहतौकृत्वाअघंअंकंआकर्षयेदित्यन्व
यः॥क्षेत्रस्यविरामौअंतौतयोःशंकू॥तयोर्निहतौ॥निक्षिप्तौकृत्वाआघंअंकंकर्षा
ख्यं॥आकर्षयेत्॥एतदुक्तंभवति॥क्षेत्रस्यमध्यभागेसाधितदिक्सूत्रोपरिदृष्टदै ११८

र्घ्यमितंसूत्रंप्रसार्यतदंतयोःशंकुनिखायतयोःशंकोःमोटितसूत्रांतपाशौनिधा
यकर्षाख्यंचिह्नंधृत्वाएकस्यांदिशिआकर्षयेद्यथोभयशंकुगतारज्जुःसमानाकृ
तिस्यात्॥तथाआकर्षयेदित्यर्थः॥कोणेशंकुरितिकोणेकोणचिह्नेयत्रकोणचि
ह्नंआगतंतत्रभूविशंकुर्निपेयइत्याध्याहारः॥इत्यमुनाप्रकारेणइतरःशंकुःनि
खेयः॥एतदुक्तंभवति।तदेवकर्षचिह्नं॥अन्यस्यांदिशिआकर्ष्यकोणेशंकुर्निखे
यःएवंकोणद्वयसाधनमभिधायअन्यकोणद्वयसाधनमाह॥विनिमयादिति॥
रज्वंतयोर्विनिमयाद्विपरितधारणात्॥अपरेकोणशंकुनिखेयौ॥एतदुक्तंभवति
रज्वंतौविपरीतौधृत्वापूर्ववत्कर्षाकर्षेणंकृत्वाकोणयोःशंकुनिखेयौ॥एवंक्षेत्रसा
धनमुक्त्वासूत्रंन्यासमाह॥आग्नेयादिदृढंप्रदक्षिणगतंसूत्रंसमासादयेन्मध्येवाम

कयाश्वसुप्तउरुपंध्यात्वातमुन्नानकं॥अष्टाश्र्यंशमगेंडुसंमितलवासुछाच्
विहायाग्रगोभागोनाभिरितःखनेल्लवमितंवामेनभिःपूरयेत्॥७२॥ ॥
आनेयादिदृढंप्रदक्षिणगतसूत्रंआसादयेत्॥मध्येक्षेत्रमध्येवामकपार्श्वे
सुप्तउरुपंप्रायुक्तशिरस्कंध्यात्वातंध्यानंउरुपंउन्नानंध्यायेत्॥कथंभूतंअ
ष्टाश्र्यं॥अष्टश्विनोभागायस्मिन्सतथातंअयमर्थः क्षेत्रप्रमाणंकंकलासरूप
वास्तुपुरुषरूपंप्रकल्प्यनवोष्टाविंशतिधाकुर्यात्॥एवंअष्टाश्र्यंशंप्रकल्प्य
छुछात्सकाशाअगेंडुसंमितलवान्सप्तदशभागान्विहायसप्तवाअग्रगस्त द
ग्रगोनाभिःइतोनाभेःसकाशात्वामेवामभागेलवमितंखनेत्॥अनंतरं॥अ
ग्नभिःपूरयेत्॥तथाचब्रह्मशंभुः॥सूत्रभिन्निशिलान्यासस्तंभस्थापेपणंतथा॥ ११९

पूर्वदक्षिणयोर्मध्येकुर्यादित्याहकाश्यपइति॥नारदः॥नभस्यादिषुमासेषुत्रि
षुत्रिषुयथाक्रमं॥पूर्वादिदिक्शरेवामपार्श्वेशायीप्रदक्षिणमिति।तथाचशि
ल्पशास्त्रे॥वास्तोःशिरसिपुछेचयाम्यकुक्षौचपृष्ठतः॥आयुःकामोखनेन्नैववा
मकुक्षौखनिःशुभा॥वास्तुकेत्रप्रमाणंचकल्पयित्वास्ववामके॥कुक्षौखानंविधा
यादौखानंविधायादौग्रावणैःपूरयेत्ततःइति॥तथाचलल्लः॥त्यजेद्दशाग्निशे भा
गेत्यत्रेसप्तदशकाः॥मध्येनाभिंविनानीयात्तत्रशंकुंप्रतिष्ठयेत्॥अस्थिर
स्यशिरेयत्रवास्तोःसकृणयेंकुरैः॥दैर्घ्यंवाविंशतिंतत्रकृत्वाष्टाश्विमितांशकानि
ति॥ ॥अथशंकुन्यासमाह॥ ॥नाकालेत्रनिधेयउक्तरुजोव्याप्तिद्
२४विंशाष्टहःकृत्संख्यांगुलकस्त्रिभागचतुरस्त्रष्टास्त्रकानस्त्रकः॥कंवक्षस्तल

मूरुपादयुगलंसंस्पृश्यविप्रादिकोरेखांसूत्रवदग्निजेनरचयेन्नच्छिन्नेऽङ्गिलाः
७२॥ ॥अत्रकुक्षिस्थलेनानरःशंकुःकालेमुहूर्त्तसमयेनिधेयः॥सकियत्प्र
माणइत्यपेक्षायांनृमानमाह॥अष्टाङ्गिप्रात्सकाशात्तवर्णपरत्वेनसिद्ध२४विंशा॰
ष्ठ्य१६हः स्तत्१२संख्यांगुलकःनिधेयः॥प्रतिष्ठायनीयः॥एतदुक्तंभवतिविप्रेण
सिद्धसंख्यांगुलकश्चतुर्विंशांगुलोनिधेयःक्षत्रियेणत्रिंशांगुलःवैश्येनअष्टांगु
लःषोडशांगुलःशूद्रेणअहःस्तसंख्यांगुलोद्वादशांगुलोनिधेयः॥किंलक्षणः॥
नाऊक्तरुजःशास्त्रोक्तदृष्टोऽनवः॥अनःकिंलक्षणःत्रिभागचतुरस्राष्टानकान
स्रःकत्रिभागेषुचतुरस्राष्टानकानस्रकाणियस्मिन्सतथा॥एतदुक्तंभवति॥यथा
प्रमाणंशंकुंनिधायविभज्यआद्यांशंचतुरस्रंद्वितीयांशंअष्टांशंतृतीयांशंअनलं १२९

वर्त्तुलंकुर्यादितिभावः॥तथाचोक्तंग्रंथांतरे॥स्याच्चतुर्विंशविंशाष्टद्वादशांगुलकै
क्रमात्॥विप्रादीनांशंकुमानंस्वर्णवस्वाग्नळंहृत॥खदिरार्जुनशालोत्थयुगपत्रत
रुद्भवं॥तंरक्तचंदनपालाशंमनस्रभृजुमव्रणं॥एवंलक्षणसंयुक्तंपरिकल्पश्रुतेरि
तेइति॥ ॥अथरेखाकरणमाह॥किमिति॥ ॥अग्निजेनसुवर्णेनब्राह्मणादिकः॥
कादिकंस्पृष्ट्वासूत्रवत्तरेखांकुर्यात्॥सूत्रवदिति॥आग्नेयादिगृहप्रदक्षिणंकु
र्यादित्यर्थः॥एतदुक्तंभवति॥ब्राह्मणःकिंशिरस्पृष्ट्वातर्जन्यावाकृत्वाआग्नेया
दिप्रदक्षिणंसूत्रानुगतांरेखांकुर्यात्॥तथैवक्षत्रियोवक्षःस्थलंस्पृष्ट्वारेखांकु
र्यात्॥वैश्यऊरुयुगलंस्पृष्ट्वा॥शूद्रःपादयुगळंस्पृष्ट्वारेखांकुर्यात्॥तथाचोक्त
ल्लः॥कृत्वासूत्रनिपातंमध्यांगुल्यापथवाप्रदक्षिण्याअंगुष्ठेनवामणिनाकक्षांतर

जनमुक्ताभिरेखांकुर्यादित्यादि॥तथाचभृगुःविप्रःक्षीर्षंनृपोवक्षोवैश्यश्चोरुपरःप
दौ॥स्पृष्ट्वारेखागृहारंभेकुर्यादग्नेःप्रदक्षिणमिति॥अग्नेरित्यग्नेय्याःतथाचका रि
कायांअंगुष्ठकेनदेशिन्यारेखांकुर्वीतसूत्रतः॥स्वर्णेनमणिनारूप्यमुक्तादधिफ
लाक्षतैःकुसुमैर्वनिरस्त्रेणनलोहेनचभस्मना।काष्ठादिभिर्नापसव्यंनवक्रांदो
षदर्शनात्॥शस्त्रेणशस्त्रमृत्कस्मादित्यादिसप्तमीरितमिति॥तथाचबृहद्यज्ञ
पद्धतौ॥शस्त्रेणशस्त्रमृत्युःवंधोलोहेनभस्मनाग्निभयं॥तस्करभयंतृणेनचलिखि
ताकाष्ठेनचराजभयं।वक्राचपादलिखितारुग्भयदाविरूपाक्रोशदाच।वर्मीगा
रस्खलितादंतेनचकर्त्रस्त्रभाय॥वैरमपसव्यलिखितप्रदक्षिणासंपदोविनि
र्देश्येति॥ ॥अथशिलान्यासमाह ॥भित्तेःशिलाअपिसूत्रवदाचरेत्॥भा ११

ग्नेय्यादिप्रदक्षिणंस्थापयेयुरित्यर्थः॥ ॥तथाचवराहः॥ ॥दक्षिणपूर्वकोणेक्र
त्वापूजांशिलान्यसेत्प्रथमं॥क्रोषाप्रदक्षिणेनस्तंभाश्चैवंप्रतिष्ठाप्यानि॥ ॥
अथभित्तिप्रसंगेनद्वारमाह॥ ॥पूर्वादौत्रिषडर्थपंचमलवेद्वाःसव्यतोकरं
तैर्दैर्घ्येद्वयंशंसमुच्छ्रिताधिलवकेसर्वासुदिक्षुदिता॥स्तंभोन्मेदशिरूनिनासु
समयेस्थाप्याशिरस्तत्रभाग्विस्तारष्टिरंध्रवान्वितैःकृतभकरैस्तुल्यंग्रहोच्यं
क्रिदुः॥७४॥ ॥पूर्वादाविति।दैर्घ्येगृहदैर्घ्येभंकानेनवभाजितेसतिपूर्वादौ
दिशिक्रमेणसव्यते।वामभागात्रिषडर्थपंचमलवेद्वाःद्वारंउक्तामुनिरिभरितो
शेषः॥त्रयश्च।षट्च।अर्थाश्च।पंचच।त्रिषडर्थपंच।एतेषांसंख्यापूरकोत्रि
षडर्थपंचमास्तेचतेलवाश्चतेषांसमाहारस्तस्मिन्॥एतदुक्तंभवति॥गृहदैर्घ्येन

वभागंकृत्वापूर्वाभिमुखेगृहेक्रियमाणेवामभागादंशद्वयंत्यक्त्वादक्षीणेद्वारं
कर्त्तव्यं॥दक्षिणाभिमुखेगृहेतथैवांशपंचकंत्यक्त्वाषष्ठेद्वारंकार्यं॥पश्चिमाभिमु
खेतथैवांशचतुष्कंत्यक्त्वापंचमांशेकार्यं॥उदङ्मुखेपंचमांशेएवंद्वारंकर्त्तव्यं॥
सर्वासुदिक्षुत्र्यखिलवकेचतुर्थभागेद्वारुदिता॥किंलक्षणाद्वाद्यंशसमुच्छ्रिता।
द्विभागेत्यातथाचवराहः॥दैर्घ्येनवांशात्पदमत्रसंख्याद्वारंशुभंप्राक्त्रिचतुर्थ
भागेचतुर्थषष्ठेदिग्विदक्षिणस्यांपश्चाच्चतुपंचमकेतथोदिगिति॥तथाचप्र्व
नःमनाधिकोनदिग्भागेद्वारंनीचैरुखक्षयःइति॥अथनिष्पन्नासुभित्तिषुस्तंभ
प्रतिष्ठामाह॥ ॥स्तंभोन्नेर्दिशीति॥ ॥अग्नेर्दिशिआग्नेय्यांसुसमयेपूर्वादिते
स्तंभःस्थाप्यःअत्रापुंक्तवरुजइत्यनुवर्त्तते॥किंलक्षणःपूजितः।प्राक्चंदनार्चि

तः।उकिं०शिरश्छत्रंभजतइतितथा।छत्रंतुकाकादिपक्षुपवे
शनभयात्॥स्तंभोपरिक्रियते।तथाचवराहः।छत्रस्यकबंधयुतःस्फुटधूपविले
पनःसमुत्थाप्यः।स्तंभस्तथैवकार्योद्वारेछायाःप्रयत्नेनेति॥तथाचोत्पलःस्तंभो
परियदाघूककाकगृध्रादिपक्षिणः॥व्यालादयश्चतिष्ठंतितदाकर्त्तुर्नशोभनं।
तस्मात्स्तंभोपरिछत्रंशाखांफलवतींतुवा॥धारयेदथवावस्त्रंबुधैरुक्तादिनिश्चि
तेनइति॥पुर्जरेकेचित्कालसर्पमवलोक्यतेनछून्यदिशिप्रथमस्तंभप्रतिष्ठां
कुर्वंतिः॥नरसत॥यतस्तदवलोकनंविवाहवेधांकोणेऽग्राद्यंस्तंभान्नेपयं
ति॥नहिषयं॥यदप्येकदेशीयं॥नबहुसंमतं॥कालसर्पस्तुयथा॥ईशानेतःस
र्पयंतिकालसर्पोविहायसृष्टिंगणयेद्दिवक्षु॥पश्चात्तिस्तन्मुखमध्यछत्रि

कंत्रिकंचैववृषसंक्रमादेःअहेःफणायांमरणंवरस्यमध्येकुमार्याःस्वजनस्य च
ष्ठे॥विधेयमेकंकिलशून्यदेशेविहायवेधांनिखनेच्चकीलमिति॥ग्रहस्तंभप्र
तिष्ठापनंबहुभिर्ग्रंथकारैरन्येष्यामेवभिहितं॥तथाचब्रह्मलक्षंभुः॥सूत्रेभिन्नि
श्चिलान्यासेस्तंभस्यारोपणंतथा॥पूर्वदक्षिणयोर्मध्येऊर्यादित्याहकश्यपः।
तथाचनारदः॥प्रासादेषुचहर्म्येषुगृहद्यन्येषुसर्वदा॥आग्नेय्यांप्रथमंस्तंभं
स्थापयेत्तद्विधानतः॥तद्यावत्परिहिरण्यार्यः॥दक्षिणपूर्वकोणेकृत्वा पू
र्णांश्चिलान्यसेत्प्रथमं॥शेषाःप्रदक्षिणेनस्तंभाश्चैवंप्रतिष्ठाप्यइति॥कात्यायन
गृह्यकारिकारिकायामप्युक्तं॥एकैकमुच्छ्रयेत्स्तंभं मंत्रैरेतैःश्चिलातले॥श्रियो
वसानइत्यंतैरिमामित्यादिभिर्गृही॥आग्नेय्यादिषुकोणेषुमंत्रैरेतैःश्चिलान्य

सेदिति॥गृह्यहरिहरभाष्येनालापद्धतिग्रंथेवमेवोक्तमित्यलमतिप्रसंगेनबहुक्त
तरुजरत्युक्त्वाछास्त्रांतरोक्तान्यवगंतव्यानि॥तथाचवास्तुशास्त्रे।श्रीपर्णी
रोहिणीशाकसर्जाश्वसरलाशुभाः॥पतंगरोध्रशालाख्यालालार्जुनकशिंशिपाः।
चंदनाशोकबदरीमधुकाश्चकदंबकाः॥प्रशस्ताश्चशमीनिंबबिल्ववर्जंगृहांतिं
के॥गृहेकाष्ठंसमंश्रेष्ठंमलिंदेविषमंशुभमिति॥नारदः॥प्लक्षोदुंबरचूताख्यानि
चलुहिविभिन्नकाः॥दग्धाकंटकनोद्वक्षावटाश्वत्थकपित्थकाः॥अगस्तिशिंशु
नालाख्यास्तिन्निडीकाश्चनिंदिताः॥अन्येचगृहनिर्माणेयोजनीयाःसदाद्रुमा इ
ति॥तथाचगर्गःपिच्छनमार्गमुलूखलवल्मीकोद्धाननाधस्तापसां॥श्रमजाःचैत्य
संगमसंभवाश्चपटनोयसिंकाश्च॥कुंजाननातवल्मीनिपिंडिकावज्रमारुतोपहताः

स्वपतितहस्तिनीपीडितश्वाभिलुष्टमधुनिलयाःनखोवर्जयित्वाव्याःशुभदासुः
स्निग्धपत्रकुसुमफलाःसुरदारुचंदनसमामधुकरतरवःशुभाद्विजातीनां॥क्षत्र
स्यारिष्टाश्चछत्रखदिरबिल्वाद्विजकरतवैश्यानांनीवखादिरकस्विंडुकस्यंदना
श्शुभफलदाः॥तिंडुककेसरसरलार्जुनौडुंबराळाश्वशूद्राणां॥सर्वेषांचरक्ता
सर्वेवृक्षाश्चनिंदिताश्चेति॥व्यासोपि॥अन्यवेश्मस्थितंदारुनैवान्यस्मिन्प्रयो
जयेत्॥नतत्रवसतेकर्त्तावसन्नपिनजीवति॥समरंगणे॥इष्टकाळोष्टपाषाणमृ
त्तिकाजीर्णमायसं॥तृणपर्णबुधैःप्रोक्तंदारुनंगृहायवैदृति॥शार्ङ्गधरः॥द्यूतने
द्यूतनंकाष्ठंजीर्णेजीर्णप्रशस्यते॥जीर्णेचनूतनंकाष्ठंनोजीर्णेनूतनंशुभमिति॥
वृक्षछेदनमार्घनाग्रंथांतरेऽका॥यानिहभूतानिवसंतितानिबलिंगृहित्वाविधि १२५

वत्प्रयुक्तं॥अन्यत्रवासंपरिकल्पयंतुक्षमंतुनाद्यमोनेस्तुतेभ्यदृति॥अथस्तंभप्र
संगेनगृहोच्यतामाह॥ ॥विस्तारेति॥ ॥विस्तारस्यगृहविस्तारस्यअष्टिळवःषोड
शांशस्तेन॥अन्विते॥तकरैश्चतुर्हस्तेस्कल्पंसमानंगृहोच्चंविदुर्मुनयदृत्यध्याहारः
॥तथाचरत्नकोशे॥विस्तारषोडशांशाः॥सचतुर्हस्तोभवेद्गृहोच्छ्रायदृति॥तथाचेल
स्तः॥नात्युच्छ्रितंनातिनीचंकुर्योत्सेधंयथारुचिति॥ ॥अथमुख्यगृहात्कस्यगृ
हंकस्यांदिशिकर्त्तव्यमित्याह॥ ॥स्नानाग्निस्वपिवस्त्रभोजनपशुद्व्यामरौक
कस्त्रिनीस्त्रीदौजळमीशितुर्दिशिपरंनायोरयास्युत्तरं॥आत्येशान्निभुवोय
थारुचिपरेगेहस्यदक्षेयरद्वांबुखूखलचूल्किकापिष्टपदप्रक्षाळनान्यूचिरे॥७५
॥ ॥स्नानेति।स्नानंप्रसिद्धं॥अग्निःप०स्वपिश्चयने॥वस्त्राणिप०भोजनंप्रक०

पञ्चयोगचादयःइत्यादीनि॥अमराःदेवाःएषांश्रोकांसिगृहाणितेषांस्थितिः
स्थापनं॥पूर्वादौदिक्षिक्रमेणकार्येत्यध्याहारः॥तथाचनारदः॥ ॥स्नानागारंततः
प्राच्यामाग्नेय्यांपूर्वकालयं॥याम्यांचशयनागारंनैर्ऋत्यांवस्त्रमंदिरं॥प्रतीच्यांभो
जनागारंवायव्यांपशुमंदिरं॥भांडकोशंचोत्तरस्यामीशान्यांदेवमंदिरमिति॥अ
थस्थापनमाह॥ईशानेतुईशानस्यदिशिजलंकार्यनान्यत्र॥ ॥तथाचलल्लः॥ ॥
पाच्यादिस्थेसलिलेसूतहानिःस्त्रिभयं॥रिपुभयंच॥स्त्रीकलहः॥स्त्रीदौष्ट्यं
नैरुज्यंचिंतात्मजस्यहिरिति॥अथान्यदध्याह॥परमिति॥परंभमुक्तंपदार्थज्ञानंवा
योर्दिशिकार्यं॥अन्यानिमारुत्यामितिश्लोकत्वात्॥अपाकदक्षिणस्यांदिशि
मूत्रकं॥मूत्रमेवमूत्रकंकार्यं॥स्थलसकोचेसति॥एतद्यस्योक्तंगृहमध्ये॥वास्तु १२५

तश्चस्वस्वस्थानेतारतम्येनियोज्यं॥अथशक्तिभुवःसंकोचेसतिकर्त्तव्यमाह॥ ॥
गल्पेरिति॥शक्तिभुवोरल्पेसतियथारुचिकार्यं॥गेहस्यदक्षेपरेआचार्यंघरट्टादि
कंनुचिरे॥घरट्टःपिष्टयंत्रं॥अंबुऊदकं॥ऊलूखलापिकंप्रसिद्धं॥तथाचोक्तंग्रंथांत
रे॥उलूखलंपिष्टयंत्रंअग्निस्थानंजलाश्रयंचेत्मनोदक्षिणेपार्श्वेपित्रणांपादशौ
चनमिति॥ ॥अथकेषुकेषुगृहेषुछायादिकंभाव्यंकेषुनभाव्यंइत्याह॥ ॥
द्वात्रिंशाधिकहस्तमध्विवदनंत्वालिंदादिकंनैधायादिकमीरितंतृणगृहंसर्वेषुमु
क्तदितं॥छन्नंवंशकपाटमर्चितनभंवेश्मोत्करित्वाविशेदारंभोदितमास्तुनारद
मतान्मायोर्जेषुकेषुतु॥५१॥ ॥द्वात्रिंशेभ्यःअधिकाःहस्तायस्मिन्गृहेप्रमाणतत्
द्वात्रिंशाधिकहस्तं॥अध्विवदनंचतुर्मुखं॥तार्णंतृणगृहं॥अलिंदादिकंअलिंदेप

दृशाळेतिलोकेप्रसिद्धं॥आदिशब्देननिर्व्यूहादिगृहभूषणंगृह्यते॥एषुआयादि
कंनश्रेरितं॥तथाचदैवज्ञवल्लभे॥अलिंदनिर्व्यूहविनिर्गमासाद्यचतुर्दिशंयेगृ
हभूषणाय॥अयादिकंतेषुनचिंतनीयंयतोननेवोक्तपरिगृहेस्युरिति॥तथाचचिं
तामणौ॥आयव्ययौमासशुद्धिंचिंतयेन्नतृणालयइति॥तथाचवसिष्ठः॥एकादशे
यवाहर्ध्वंयावद्राशिंशहस्तकं॥तावदायादिकंचिंत्यंतदुर्ध्वंनैवचिंतयेदिति।अथतृ
णगृहेविशेषमाह॥तृणगृहंसर्वेषुमास्वपिकर्तव्यमित्यर्थः॥ ॥अथनिष्पन्नगृ
हेतत्प्रवेशमाह॥ ॥छन्नमिति॥ ॥आरंभोदितमास्वाशास्वरिक्तावेश्मगृहंप्रवेशत्
आरंभायेऊदिताप्रोक्तास्तेचतेमासाश्चतेषुशास्वरीत्याशास्त्रोक्तविधिनागृहंप्रवि
शेत्स्वामीत्यर्थःकथंभूतंवेश्मछन्नंकुड्यैराच्छादितं॥पुनःकिंलक्षणंवश्यकपाटंव १२६

श्यंअर्वानंकपाटंयस्यतत्यावश्यमितिलगतिपुनर्यादितेवातथैवस्थिरंभवति॥
पुनःकिंलक्षणंअर्चितममंतोरणमालाद्यलंकृतं॥तथाचनारदः॥अकपाटमनालि
नमदत्तबलिभोजनं॥गृहंनप्रविशेद्देवविपदामाकरंहितदिति॥तथाचयवनः
स्वयमुद्घाटितेरंध्रेपिहितेचकुलक्षयः॥मनाद्यिकेनदिग्भागेद्वारेनीचेसुखक्षय
इति॥अथप्रवेशेमासविशेषमाह॥ ॥नारदमतान्माघोर्जशुक्रेषुमासेषुगृहं
विशेत्॥माघःप्रब्ऊर्जःकार्त्तिकः॥शुक्रोज्येष्ठःएषुगृहंप्रविशेदित्यर्थः॥आरंभोदि
तमास्विन्यनेनतृणगृहस्यसर्वमासेषुविहित्वात्स्वेवरंधोपिसर्वमासेषुविहितः
तथाचनारदः॥ ॥प्रवेशोमध्यमोज्ञेयःसौम्यकार्त्तिकमासयोः॥माघफाल्गुनवैशा
खज्येष्ठमासेषुशोभनमिति॥तथाचज्योतिष्प्रकाशे॥गृहारंभोदितैर्मासैर्थिल्ये

वीरेगृहंविशेदिति॥तथाग्रंथांतरे॥विशत्सौम्यायनेहर्म्यतृणागारंतुसर्वदेति।तथा
चव्यवहारसारतत्वे॥सौम्यायनेश्रावणमार्गपौषेजन्मर्क्षलग्नोपचयोदशांशो।वा
मांगतेर्केगृहवास्तुपूजांकृत्वाविशेदशभक्रूटशूरुमिति॥इदानीमपूर्वादि प्र
वेशानाह॥ ॥प्रारंभोदितभैप्रवेशउदितोऽपूर्वःसपूर्वस्थिरैर्मैत्रैश्चाच्युतमूळ
हस्तसहितैरारंभभैर्घात्मकः॥कृत्वंवेश्मभवंदिवैवविहितंरात्रौप्रवेशःक्वचित्
सूर्यर्क्षादिभयंचकंमनुमितारुद्रप्रवेशेनसत्॥७७॥ ॥प्रारंभोदितभैःगृह
प्रारंभोदितनक्षत्रैःपूर्वःप्रवेशःऊदितःमुनींद्रैरित्यध्याहारःअत्रप्रारंभोदितभैरि
त्युपलक्षणं॥तेनप्रारंभोदितंतिथिभादिकंसर्वंग्राह्यं॥अपूर्वोनामनूतनगृहेप्र
थमःप्रवेशउच्यते॥स्थिरैर्नक्षत्रैर्मैत्रैश्चसपूर्वःप्रवेशःउदितः॥सपूर्वोनामपूर्वत्रो १२७

वसानेयःक्रियते॥तथाचमांडव्यज्योतिष्प्रकाशे॥अपूर्वप्रवेशोगृहारंभधिष्ण्यैर्वि
धेयःकरोमध्यमोत्रेतिकेचित्॥सपूर्वस्थिरैर्मित्रभैरेवशुद्धेरन्योश्विमूळाच्यु
तारंभधिष्ण्यैः॥अपूर्वसंज्ञंप्रथमंप्रवेशंयात्रावसानेचसपूर्वसंज्ञं॥इंद्राकृयंचा
ग्निभयादिजातंगृहप्रवेशंत्रिविधंवदंतीति॥ ॥अथगृहकृत्यविषये॥ ॥दिनरा
त्रिविशेषनिर्णयमाह॥ ॥कृत्यंवेश्मभवामिति॥वेश्मभवंगृहंभवंयत्किंचित्कृ
त्यंतद्दिवैवविहितंउक्तंनरात्रौ॥क्वचिद्दिवामुहूर्त्ताभावेसतिरात्रौप्रवेशोविहितः
नान्यत्र॥तथाचवसिष्ठः॥दिवाप्रवेशःशुभदःसउक्तउक्तार्भिरुद्यो।निशिभास्करे
ह्नोःवलेनमत्स्यध्वजवासरस्यरात्रिविनासूर्यतिथिश्चरात्रिमिति॥ ॥अथकलत्र
वास्तुनक्षत्रशुद्धिमाह॥ ॥सूर्यर्क्षादिति॥सूर्यनक्षत्रादिभपंचकंतथासूर्यनक्षत्रा

दिनसुमिताश्चतुर्हृतमितानक्षत्राद्दृष्टनक्षत्राष्टकं प्रवेशेनसत्॥नशुभंस्या
त्॥अन्यानिशुभानीत्यर्थात्सिद्धं॥अत्रपूर्वोक्तानांनक्षत्राणांशुभाशुभत्वंज्ञात
व्यं॥ ॥अथप्रवेशेलग्नशुद्धिमाह॥ ॥लग्नेचोपचयस्थिरेरविमुखैःप्रारंभव
त्संस्थितैःसूर्येवामगतेखदिग्वदिनभैर्वेश्मप्रवेशःशुभः॥रंध्रेष्वहिभवेष्वपो
क्तगतःसूर्योयदास्यात्तदापूर्वाद्याननमालयंप्रविशतांस्याद्वामगोसौक्रमात्।
।७८॥ ॥उपचयस्थिरेलग्नेजन्मर्क्षजन्मलग्नाभ्यांनुपचयावहस्थिरेलग्नेवेश्म
प्रवेशःशुभःस्यात्॥कैःरविमुखैःसूर्याद्यैःप्रारंभवत्संस्थितैःगृहारंभार्थमुक्तंतद्व
त्संस्थितैरित्यर्थः॥कस्मिन्सति॥सूर्येवामगतेसति॥पुनःकैःखेदिग्वंदनभैः।यद्दि
ङ्मुखंगृहाद्दिङ्मुखैःप्रवेशोदितैर्नक्षत्रैरित्यर्थः॥ ॥अथवात्रसूर्यलक्षमाह॥रंध्रस्थि १२९

रंध्रेष्वष्टमेषट्सुपट्द्वितीयेभवे११भ्यःलग्नादिअष्टमपंचमद्वितीयैकादशेभ्यसकाशाद्यदासुतग
तःआपंचमगतःसूर्योयदास्यात्तदापूर्वाद्याननमालयंपूर्वादिमुखंगृहंप्रविशतां
मनुष्याणांअसौसूर्यःक्रमाद्वामगःस्यात्॥एतदुक्तंभवतिअष्टमात्पंचमसुवर्त्तमा
नःअर्कःपूर्वाभिमुखगृहेप्रविशतांवामोभवति॥पंचमात्पंचमुगतोदक्षिणमु
खेगृहेप्रविशतांवामोभवति॥ ॥छ॥ ॥इतिस्वोक्तमुहूर्त्तमार्त्तंडटीकायांगृ
प्रकरणं॥छ॥ ॥अथयात्राप्रकरणंव्याख्यायते॥तत्रादौकस्मिन्कालेयात्रा
कर्त्तव्येत्याह॥वारेचोपचयावहस्थसुदग्भास्विदंत्रयाणंजगुःकर्णात्यादितिती
हिकेष्वृगमैत्रार्केष्वनोजन्मभे॥सर्पार्द्रानियमाजपादपित्र्यत्वाष्ट्रत्रयेचाशुभं
रिक्तापर्व२२५२गुहाएमीहरिसिनास्थेषुज्ञशुक्रोन्मुखं॥१॥७९॥ ॥सुदग्भासुरो

भनादशांतईशादिदशोपदशासुउपचयावहस्यग्रहस्यवारे॥गोचराष्टकवर्गा
दौशुभफलग्रहस्यवारेप्रयाणंदृष्टंशुभंजगुराचार्याःकेऽकर्णात्यादितिभा द्वि
केऽकर्णःश्रवणः।अत्यरेवती।अदितिर्भंपुनर्वसुःएकांद्विकाःश्रवणधनिष्ठारेव
त्यश्वन्यौ।पुनर्वसुपुष्यौ।एभिरित्यर्थः।पुनःकेमृगमैत्रार्केषु॥मृगःप्र०पैत्रमनु
राधा॥अर्कोहस्तःतेषु॥एषुनवनक्षत्रेषुप्रयाणंशुभमित्यर्थः॥ ॥तत्रविशेषमा
ह॥ ॥नोजन्मभइति।जन्मभेजन्मनक्षत्रेश्रवणाद्यंन्यतमेपियानंशुभंनोजगुः।अ
थयेषुश्रशुभंतान्याह॥सार्पेति।सार्पमश्लेषा।आर्द्रेप्र०।अग्निःकृत्तिका॥यमोभ
रणी।अजैकपात्पू०भा०पितरोमघातिष्यःत्रयेचित्रात्रयेच॥एषुनवसुयानंन १२९
शुभंजगुः॥अन्यानिनवनक्षत्राणिमध्यमानीत्यर्थसिद्धं॥ ॥अथयासुतिथिषुअशुभं

तदाह॥रिक्तेति।रिक्तास्तुर्थिनवमीचतुर्दश्यः॥पर्वाणिपूर्णिमावास्योगुरुषष्ठीअ
ष्टमीप्रसिद्धा॥हरिर्द्वादशी।सितास्यंशुक्लप्रतिपत्।तेषुयानंअशुभंजगुः॥अथदि
न्यासुतिथिषुशुभं॥ ॥अन्यदुष्टमाह॥ज्ञेतिज्ञोबुधः।शुक्रःप्र०।तयोरुन्मुखंसमु
खंयानंशुक्लेघपिनक्षत्रादिषुअशुभंजेगुः॥बुधशुक्रसंमितंगमनंनिषिद्धमितिभा
वः॥ ॥अथशूलान्नाह॥प्राक्चंद्रासितशुक्रभंवसुपरार्द्धात्पंचभेज्यरनपाक्पश्चा
त्कार्कसितानुरुद्रुजबुधार्यमण्यस्त्यजेत्शूलकान्॥त्रिंशाष्टौनवभूमयोग्निगिरिंशा
विश्वेषयोर्कव्ध्यःषड्गाःखतिथिपर्वतादशदृशोप्येतांस्तिथीन्शतः॥२॥प्रा
गिति।प्राक्पूर्वस्यांदिशिचंद्रासितशुक्रभंत्यजेत्॥चंद्रः।असितःशनिः॥शुक्रभन्ये
षा।एतत्रयंपूर्वदिशित्यजेदित्यर्थः॥अनपाक्दक्षिणस्यांपंचपरार्द्धोधनिष्ठान्तरंश्री

त्पंचनक्षत्राणि।ईज्यःबृहस्पतिःएतान्दक्षिणस्यांत्यजेत्।पश्चात्पश्चिमस्यांकार्कसि
तान्।कंरेहिणि।अर्कोरविसितःशुक्रःएतान्पश्चिमस्यांदिशित्यजेत्।उत्तरस्यांदि
शिऋजवुधवार्यम्णेत्यजेत्॥ऋजोमंगलः।वुधःप्र०अर्यमोत्तराफाल्गुनीएतान्
शूळकानुत्तरस्यांन्यजेत्॥शूळपदस्यप्रत्येकंसंबंधः॥अथयोगिनीमाह॥त्रिं
शाष्टाविति॥एतान्प्रत्येकपदगतान्तिथिनीत्रातःएतान्तिथिन्त्यजेत्॥एतेके
त्रिंशाष्टौ३०।८।इशान्यांनवभूमयः॥९।१।प्राच्यां।अग्निगिरिशा३।११॥आग्नेयां
विश्वेषवः१३।५दक्षिणस्यांअर्काब्ध्यः१२।४।नैऋत्यांषड्रसाका६।१४।पश्चिमस्यां
तिथिपर्वतः१५।७।वायव्यांहयादस्रा१०।२।उत्तरस्यां॥अत्रोक्तन्यासएवव्याख्या
नं॥अथान्यन्निंद्यमाह॥ऐंइशायग्निभसमसभगणोवाचाग्निकाष्ठास्थितोनोल्लं १३०

घ्यंघ्यःपरिघस्त्वपावरुणभैप्राच्यैरुदङ्मुखंत्रजेत्॥सर्वान्त्रासुखोन्यमित्रतुरगैर्यात्रा
दथावश्यकेहित्वाशूळमनिष्टभैर्यदिनिजान्त्रोषंगळखिन्नंत्रजेत्॥३॥८०॥ ॥ऐंइति
ऐंआदिषुदिक्षुअग्निभानक्षत्रिकायःसकाशात्सप्तसप्तभगणे॥एतडुक्तंभवति॥
सप्तशळाकाचक्रंनिष्पाद्यपूर्वगतासुसप्तसुरेखासुईशानन्तक्षत्रिकादीनिसप्त
नक्षत्राणिन्यसेत्॥नन्वस्थानिसप्तदक्षिणगतरेखासुन्यसेत्॥एवंपश्चिमोत्तररेखा
सुक्रमेणत्यजेत्॥तेनोक्तायव्याग्नेयदिग्गतांरेखांकुर्यात्॥अस्यारेखायाःपरिघइति
संज्ञा।एवंनिष्पादितेचक्रेवायव्यग्निकाष्ठास्थितइति॥वायुःप्र०अग्निःप्र०अनयोः
काष्ठेदिशोवायव्याग्नेयौ॥तत्रस्थितःपरिघोनोल्लंघ्यः॥अथान्यत्प्रयोजनमाह॥ ॥
अपागिति॥अपाक्दक्षिणस्यांवरुणभैःप्रतिच्यैर्नक्षत्रैर्नव्रजेत्॥प्राच्यर्नक्षत्रैःउदक्

उत्तरस्यांनव्रजेत्॥नगच्छेत्। सर्वांसुसर्वदिक्षुरविन्यमित्रनुरेगेर्यायात्॥रविर्हस्तः१३ऋक्षः
उष्ट्रः।मित्रमनुराधा।तुरगोऽश्विनी।एभिर्नक्षत्रैसर्वदिक्षुगमनंशुभमित्यर्थः॥अथा
वश्यकृत्येऽस्यापवादमाह॥ ॥अथावश्यकेइति॥ ॥आवश्यकेकृत्येसतिनिंद्यैर्नि
षिद्धैर्यदिक्षुर्यानिनिंद्यानितैःनक्षत्रैस्तस्यांदिशितदाव्रजेत्॥तदाकदा।यदिनिजांशेष्टं
गलग्निर्भवेत्॥निजांशायांनिजगमनदिशायांइष्टंगलग्निःइष्टलग्नलाभःस्यात्।इष्ट
लग्नंवक्ष्यमाणलक्षणं।तद्यथोक्तगुणसंपन्नंयदास्यात्तदागच्छेदित्यर्थः।नोचेन्नेत्यर्थ
सिद्धं।किंकृत्वामूलभंहित्वा।पूर्वोक्तमूलनक्षत्रंत्यक्त्वामूलनक्षत्रेसतिनिजांशेष्टंग
लग्निःतत्रापिनगच्छेदित्यर्थः॥ ॥अथान्यदाह॥ ॥मिश्राख्यध्रुवर्भर्हिनादिमलवेती
क्ष्णेर्हितीयेतिमेक्षिप्रैर्नक्रमशोमृदूग्रचरभैरत्रित्रिभागेषियात्॥श्रुत्यर्कज्यमृगेषयं १३१

ननीयमोवैश्वांत्यपादःअवस्तिथ्यंशास्त्वभिजित्गमेसफलदोयामीविनापिक्षणः॥
६२॥ ॥मिश्राख्येरितिरिक्तादिमलवेत्रिधाविभक्तस्यदिनस्यार्धंशोमिश्राख्यैःसाधा
रणैर्नक्षत्रैःध्रुवभैश्चनइयात्॥नगच्छेत्॥द्वितीयेभागेतीक्ष्णैःअंतिमेतृतीयेभागेक्षि
प्रैःनक्षत्रैर्नइयात्॥अथरात्रित्रिभागेषुक्रमशोमृदूग्रचरभैर्नइयात्॥एत्रेःप्रथमे
भागेमृदुभिः।द्वितीयभागेध्रुवैःतृतीयेभागेचरभैर्नइयात्॥ ॥अत्रविशेषमाह।
श्रुनीति।श्रुत्यर्कैज्यमृगेषुत्रयंनियमोन॥श्रुतिश्रवणःअर्कोहस्तः१ऋक्षः उष्ट्रःमृगः
प्रसिद्धःएभिर्नक्षत्रैसर्वभागेषुगंतव्यमित्यर्थः॥अथाभिजिल्लक्षणंफलंचाह।वै
श्वेति।वैश्वमुत्तराषाढातस्यांत्यपादश्चतुर्थचरणःश्रवणस्तस्याद्यघस्रित्र्यंशःएत
त्प्रमाणेभिजित्स्यात्॥सोभिजित्यामिदक्षिणांदिशंविनासर्वदिक्फलदः।क्षणे

पित्र्यमिजिन्मुहूर्त्तोपियामिंविनाफलदःयात्रकाणामभिष्टफलदोभवेदित्यर्थः॥
अथान्यदाह॥एकार्केहयनान्नूक्तमनिश्चंभेदेदिवारात्रयोर्भौमेप्राक्शनिचेद्र्यो
र्गतमपाक्पश्चादशुर्वोर्हितं॥भृग्वर्कास्फुदगर्कभाद्युभमगैस्तद्दिसप्तोडुलस्त्र्यं
गाभ्यांविडलोनयोर्नगमनंश्रीदेवलोत्स्याहितं॥८२॥ ॥एकार्केहयनान्नूक्त
मिति॥अर्कश्चंद्रश्चतयोरयनंएकंचतत्॥अर्केहयनंचतत्तथा।तस्मान्नुकूलंग
तंगमनंअनिश्चंहितंस्यात्॥भेदेसतिदिवारात्रयोःक्रमेणशस्तंस्यात्॥अयमर्थः
सूर्योदिनस्वामीचंद्रोरात्रिस्वामी॥द्यौचेदुत्तरायणस्यातांतदाहर्निशमुदगमनंश
स्तं॥द्यौचेदुत्तरायनेभवतःस्तदाहर्निशंदक्षिणगमनंशस्तं॥भेदइति।रविचंद्रयोर
यनभेदेसतिदिवाःसूर्यायनदिशंप्रतिगमनंशस्तं॥एवंचंद्रायनदिशंप्रतिगमनंश १३२

स्तंस्यात्।अर्थादन्यथानशस्तंस्यात्।अत्रप्राचीउत्तरसंबंधिनीप्रतीचीदक्षिणसंबंधि
नीज्ञेया।तस्माद्यदाउदग्गमनंशस्तंतदाप्राग्गमनमपिशस्तं॥भवतियदादक्षिणदिग्
मनंशस्तंतदाप्रतीचीगमनमपिशस्तंस्यात्॥तथाचरत्नकोशेदिनकरप्रतिष्ठासमकरा
दावुत्तरेचपूर्वेच॥यायाचकर्कायदौयाम्यमार्गांप्रतीचींच॥अथान्यदाह॥भौमेइ
ति॥भौमेप्राक्पूर्वदिशिगतंगमनंहितंस्यात्॥शनिश्चंद्र्योःअपाक्दक्षिणस्यां
शुर्वोःबुधगुर्वोःपश्चात्पश्चिमायांभृग्वर्कास्फुक्शुक्रविदीनेउदक्उत्तरस्यांगतंहि
तंस्यात्॥ ॥अथाडलंचाह॥ ॥अर्कभादिति॥सूर्यनक्षत्राद्युभंदिननक्षत्रंअंकै
सप्तभिस्तद्दशेषितंसत्॥द्विसप्तद्वौवासप्तवाभवंति॥तदाडलःस्यात्॥अनयोरु
डुविडलयोर्गमनंश्रीदेवलोक्त्यादेवषीवचनेनहितंनस्यात्॥ ॥अथवारशूलदो

षमाह॥ ॥आज्यंदुग्धगुडैतिलान्दधियवान्माषानिनास्त्राश्यनोशूलैयानमनिष्ट
मिंद्रकुक्कुभोथाज्यंतिलान्नंनीमीन्॥डुग्धंप्राश्यचहस्त्यश्वनोहयनरैर्यानंसुयानंत
योर्ध्यानाद्यभवतिब्रुवेथहरिजंतिथ्यादिलक्षाधिकं॥६॥ ॥८३॥ ॥सुगमं॥इ
नास्तूर्यवारात्मकान्नादाज्यादीनन्प्राश्यप्रस्थायित्वाशूलेवारशूलेयानंप्रयाणंअ
नर्थकृन्नोभवति॥ ॥अथदिग्दोहमाह॥ ॥आज्यमिति।घृतादिकंप्राश्यपू
र्व्यादिषुपूर्वादिषुहस्त्यादियानंसुयानंभवति॥हस्तीप्र॰सिद्धः।अश्वःशकटः।ह
योश्वःनरःशिबिकावस्थकाःएतदुक्तंभवति॥घृतंप्राश्यहस्तिनाप्रागमनान्
सिद्धिः॥तिलान्नंतिलोदनं।प्राश्यरथेनदक्षिणंगमनात्सिद्धिःमत्स्यान्प्राश्य॰
अश्वेनपश्चिमगमनात्सिद्धिः॥डुग्धंप्राश्यनरेरुदग्गमनात्सिद्धिःस्यादित्यर्थः॥ १२३

असतिसंभवेअभक्षेचनिर्णयमाह॥तयोरिति॥तयोर्भक्ष्यवाहनयोर्ध्यानाद्धा
यानंसुयानंभति।ब्रूवेथहरिजमिति।हरिजंलग्नंब्रुवे॥कथंभूतंतिथ्यादिलक्षा
धिकंवलिष्टमित्यर्थः॥ ॥स्वर्क्षनर्धिघटास्तभाकुजृहान्यष्टरिपोर्भादसुस्व
र्क्षेगेरिपुंखलंजनिवलत्यक्तंतथासांप्रतं॥यात्रालग्नगतंत्यजेदथदिशामि
ष्टोर्कशुक्रोक्तजोरहुर्मंदश्चाशंकसौम्यगुरवःकेंद्रेदिगीशेव्रजेत्॥७॥ ॥८४॥
॥ ॥स्वर्क्षनर्धिघटादिकंयात्रालग्नांतंत्यजेत्॥स्वर्क्षंस्वराशिःअनर्धिःस्वराशेः
अनुपचयभवनं॥घटःकुंभःअस्तभं॥ ॥आस्तगतगृह
स्वराशिः॥अन्नृजृहंवक्रगृहस्वराशिः॥एतान रिपोर्भान्वैरिराशेःपष्टा
अष्टष्टोदयं॥गोनाश्विकर्किमिथुनः॥सशृगानिशाख्याः॥इष्टोदयाविमिश्र

नाकथितात्तएवेतिष्टष्टोदयं॥लग्नंजातकात्तज्ज्ञेयं॥स्वर्क्षांगेऽरिऽरुक्षंच॥
अंगंच।रुक्षांगंस्वस्मरुक्षांगंतस्येशःस्वामीतस्यरिऽस्तंखलःप्रसिद्धः॥जनिव
लत्रक।जन्मनिबलहीनंग्रहं।तथासांप्रतं।प्रस्तुतबल्मुक्तं॥इत्युक्तंसर्वयात्रा
गतंत्यजेत्॥अथदिग्पतिनाह॥दिशामिति॥दिशांपूर्वादीनांईशाःस्वामिनः॥
अकश्चक्रादयःपाठक्रमात्स्युःकेइे।१।४।७।१०।दिगीशासतिव्रजेत्गच्छेत्।यस्मिन्
केंइेलग्नागत्वंभवति।तत्केंइंवर्जयित्वाअन्यकेंइैर्दिगीशेसतिव्रजेत्॥इदमग्रि
मश्लोकेवक्ष्यति।अथदिक्पतौलल्लाटगेसति॥तद्दिग्गमनंनिषेधंललाटग्ल
क्षणंचाह॥दिक्पेनग्रवसेल्ललाटगइनःप्राच्यांतनौभालगःस्यात्पश्चान्मदनेर्क
जोऽनुगबुधःसौम्यांखगोपाकुजः॥एश्यांद्वित्रिगतोगुरुर्ज्वलनदिग्यायाय्यस्तो १२४

भृगुर्वायौषट्सुतगोविधुर्निर्ऋतिदिश्यष्टांकसंस्थेतमः॥८॥८५॥ ॥दिक्पेलला
टगेसतिनप्रवसेत्।प्रवासंनकुर्यात्।तत्रौलग्नेवर्त्तमानःइनःसूर्यःप्राक्प्राच्यांदि
शिभाळगःललाटगःस्यात्।मदनेसप्तमेवर्त्तमानोर्कजःशनिपश्चिमस्यांललाट
स्थितःस्यात्॥अनुगबुधश्चतुर्थगतोबुधैःसौम्यामुत्तरस्यांललाटस्थितःस्यात्॥
आयव्ययस्थो१२।११॥भृगुर्ज्वलनदिश्याग्नेय्यांललाटस्थितःस्यात्॥षट्सुतगो
विधुश्चंद्रोवायौवायव्यांललाटस्थितःस्यात्॥अष्टांकसंस्थेतमराहुर्निर्ऋ
तिदिशिललाटसंस्थितंस्यादिति॥८॥ ॥वक्रीकेंद्रगतस्वदीयदिवसेलग्नेस्व
वर्गेभवेद्यातुर्नाशकरःशुभोपितनुगोजन्मर्क्षलग्नेऽरिगः॥दिग्राश्यंद्यजभाग्य
भानिगुरुश्चपौल्यांऽतकेसार्पभंजन्मर्क्षाणिरवेरुपन्नवगभःखेटस्तनौहानिछत्॥

॥८६॥ ॥वक्रीग्रहःकेंद्रगतःसन्यातुर्गमनकर्तुर्नाशकरस्यात्॥तदीयदीक्षासोपि
वक्रग्रहस्यदिवसोपियातुर्नाशकरःस्यात्॥लग्नेऋक्षगेपिनाशकरःस्यात्॥जन्मर्क्ष
लग्नेद्विषःशुभोपितनुगोयातुर्नाशकरःस्यात्॥जन्मराशिजन्मलग्नेतयोःद्वयोस्तयोः
रिष्टः॥अथसूर्यादीनांजन्मनक्षत्राणिसुःद्वीशेविश्वाखासूर्यस्य॥अश्विःकृत्तिका
चंद्रस्य॥अंबुवपाभौमस्य॥अजःश्रवणोबुधस्य॥भाग्यंभंवैफागुसेःगुरुःपुष्यशु
क्रस्य॥पौष्णंरेवतीशनेः।याम्यंभरणीराहोः॥सार्पमश्लेषाकेतोः।यदीयभंयस्यग्र
हस्यभंजन्मनक्षत्रंहतंत्रिधोत्पातहतंस्यादसौग्रहोलग्नेस्थितोहानिकृत्स्यात्॥वे
शिःसौम्ययुतःतनौजनुपियेसङ्ख्यैर्युतारन्ध्रयोजन्माद्योपचयस्थिताअपितनोःख
र्क्षेचमित्रर्क्षगाः॥पापाअप्यतिशोभनास्तनुगताजन्मेश्वरैकेंद्रगोस्वारात्पक्षितनौ॥ १३५

शुभोनफलदोमित्राक्षिपापोर्थदः॥८७॥ ॥दी०॥ ॥सूर्याद्वितीयोरन्ध्रिःवेशिः
ससौम्ययुतःसन्अंगगोलग्नगोतिशोभनःस्यात्॥जनुषिजन्मकाले सङ्ख्यैर्द्वैर्युताः
येरन्धयःस्तेतनुगतातिशोभनास्युः॥जन्माद्योपचयस्थिताःजन्माद्योजन्मचंद्रःतस्मा
डुपचयानित्रिषडेकादशदशमानि॥तेषुस्थितायहास्तेतनुगताःअतिशोभनाःतनो
रपिजन्मलग्नादपउपचयस्थालग्नगताअतिशोभनास्युः॥स्वर्क्षेचमित्रर्क्षगाःजन्म
नियेस्वर्क्षगाउच्चगामित्रर्क्षगास्तेपापाअपितनुगताअपिशोभनास्युः॥जन्मेश्वरैज
न्मरन्ध्रिजन्मलग्नकेंद्रस्वामिनौकेंद्रगौअतिशोभनौस्यातां॥स्वारात्पक्षिस्ववैरिवारे
शुभःशुभग्रहःतनौलग्नेवर्तमानःनफलदोभवति॥मित्राक्षिपापःतनौवर्तमानोर्थदः
स्यात्॥तथाचयवनः॥रक्षकावर्धकाश्चैवयेस्युर्जन्मनिनायकाः॥तान्पापानपिनिर्दं

कोयात्रालग्नेनियोजयेत्दित्यादि॥ ॥अथयात्रालग्नेइष्टानिष्टांश्चश्लोकेनैकेना
ह॥न्यायार्यन्यगताःखलाःखइनजोन्त्यांत्यघष्टाष्टगोभृयःसोपचितोस्तखांऽसु
तगःशुक्रोस्तईज्योमृतौ॥नष्टस्तोव्ययगोग्रहान्वितशशी पातुर्महाविघ्नदाअन्यस्था
नगताजयार्थसुयदास्त्यांज्यंऽरेरंनचेत्॥१॥ ॥८८॥ ॥न्यायार्यन्यगताःखला
३त्रिआय११अरिष्टेभ्यःअन्यानि।१।२।४।५।७।८।९।१०।१२।तत्रगताःखलाःप
पग्रहाःखेदशमेइनजःशनिः॥न्यायार्यन्यगताःखलाइत्यनेनैवसिद्धेपिविशेषफ
लज्ञापनार्थंखइनजइत्युक्तं॥अंत्या१२घ१षष्ठा६ष्टगोऽश्वश्चंद्रःभस्थःपुनःस
चंद्रःअयचिंतःक्षीणचंद्रःकृष्णपक्षेचंद्रःअस्तंऽखां१०वु४सुतगः५अस्तेऽशुक्रः॥
ईज्योगुरुमृतौष्टनष्टोस्तंगतबुधोव्ययगतःगृहान्वितशशीयेनकेनापिग्रहेणग्रहा १३६

भ्यांग्रहैर्वायुक्तश्चंद्रमा।एतेप्रत्येकंयातुर्महाविघ्नदास्युः॥नानाप्रकारेणमरणंभ
गादीनददतीत्यर्थः॥अन्यस्थानगताःउक्तेभ्योन्यस्थानगताःसंतस्तदाजयार्थसु
खदास्युःतदाकदाचेद्यदिऽरेरंत्याज्यंनस्यात्॥अथप्रतिबुधशुक्रापवादमाह।
॥ ॥स्वग्रामैकपुरात्मस्थसुचतुर्वक्रेचतुर्गालकेत्रहेषुवधूप्रवेशनृपभी ङ
र्भिस्पीडास्फुरंच॥तीर्थस्वामीनीदेशयोर्भृगुवसिष्ठाज्यंगिरःकाव्यपेभारद्वाजजग
त्ययोर्हितकरंयानंसितस्योन्मुखं॥२॥ ॥८९॥ ॥स्वग्राम०प्र०एकपुरंप्रसिद्धंआ
त्मस्थांत्मगृहं॥चतुर्वक्रेचतुर्मुखेचतु०गालकंप्रसिद्धं॥उद्वाहाविवाहाः॥आ
स्यादयोविवाहाः॥तेषुवधूप्रवेशाः॥नृपभीःराजभयं।ङर्भिस्पीडाप्र०ताःतीर्थ
स्वामीनीदेशयोःतीर्थं॥तीर्थगमनं॥स्वामीनीदेशःस्वाम्याज्ञा॥तयोःभृगुवसिष्ठाज्य

गिरकाश्यपेभृग्वादिगोत्रसमूहे॥भारद्वाजवात्स्ययोर्गोत्रयोरेषकेषुसितशोनमुखं
शुक्रबुधसंमुखं॥यानेगमनंहितकरंस्यात्॥ ॥अथवधूप्रवेशेप्रतिशुक्रदोषोनो
क्तः॥तत्रभर्त्रासहगमनविषये॥भर्त्राविनागमनेदोषोदृश्यते।नवोढायास्तुवंध्य
त्वमिति।तथाचभीमपराक्रमे।स्वामीनानीयमानायांप्रतिशुक्रोनविद्यते॥तथाच
मासांतरं॥नवोढायास्तुवंध्यत्वंयदुक्तंसन्मुखेभृगौ॥तदत्रविबुधैर्ज्ञेयंकेव
लंतुद्विरागमइति॥तथाचलल्लः॥स्वभवनप्रवेशेदेशानांविग्रहेतथोद्व
हे॥नववधूगृहगमनेप्रतिशुक्रविचारणानास्तीति॥तथाचमात्स्ये॥चतुःशा
लंचतुर्द्वारंश्रलिंदैःसर्वतोयुतं॥नाम्नातत्सर्वतोभद्रंनतत्रप्रतिशुक्रतेति।तथा
चवसिष्ठः॥काश्यपेषवसिष्ठेषुभृग्वत्र्यंगिरसेषुच॥भारद्वाजेषुवात्स्येषुप्र १३७

तिशुक्रोनविद्यतइति॥ ॥तथान्यच्चापवादमाह॥ ॥चंद्रेवृषभमेषगेसतिसितोंधः
स्यात्तदानमुखंयानंसत्परपूर्वयोःसितविपर्यासात्सदावश्यके॥एजातर्पितवह्नि
भृग्वरसुहृत्स्नेहानुवृत्तिंत्यजन्नृपःकार्यमानयेत्त्रिदिवसैरेकाब्धिषट्कोत्थका
न।१९॥ ॥चंद्रेवृषभमेषगेसतिसितःशुक्रःअंधःस्यात्॥तदातस्मिन्काळेसंमुखं
यानंशुक्रसंमुखंसत्शुभंस्यात्॥तथाचगर्गः॥पौष्णादिवह्निमाघोयावन्निवर्तितंच
इमा॥तावंदंधोभवेच्छुक्रःप्रवेशेनिर्गमेशुभइति॥अथावश्यकेप्रवृत्तिमाह॥
परपूर्वयोरिति॥पश्चिमपूर्वयोसितविपर्यासात्शुक्रविपर्यासादावश्यकेरूढ्ये
सतियानंस्यात्॥ ॥एतदुक्तंभवति॥ ॥शुक्रेपूर्वकपाळगतेसतिपश्चिमांगच्छेत्
पश्चिमकपाळगतेसतिपूर्वंगच्छेत्॥तथाचज्योतिःप्रकाशे॥अत्यत्सुकेषुयाव १३८

॥श्रीमार्त्तंडप्रसन्न॥
हाष्टमीविस्मरणगेलीतेजाणण्यासंबंधयेकनंत्रोहे

त्याकरकपाळस्नोभ्रगुर्भवेत्। तावत्याशीदिशंगछेत्प्राचीप्रत्यक्स्थितस्तथेति ॥
अथप्रयाणाविधिमाह॥एनेतिति।एनात्रिदिवसैरेकाब्धिषट्कोशकान्त्रजेत्।
एतदुक्तंभवति॥प्रथमादिनेकोशंगछेत्। द्वितीयदिनेचतुष्कोशान्। तृतीयेषट्
कोशान्॥अर्थात्परतोयथेछंगछेत्॥कथंभूतःतर्पितवह्निभूसुरसुहृत्॥वह्नि
भिःभूसुराःब्राह्मणाःसुहृदोबांधवाःतर्पिताःयेनसतथा।अत्रायंभावःसमिच्चरु
तिलादिनावह्निंतर्पयित्वादक्षिणाग्नादिभिर्भूसुरंतर्पयित्वावस्त्रालंकरणादि
भिःसुहृदःकलत्रादिस्तर्पयित्वाव्रजेदिति॥किंकुर्वन्॥स्नेहानुवृत्तिंत्यजनसन्।
स्नेहेनअनुवृत्तिंजनःगृहागमनं॥इयंभावः॥यात्रार्थंवहिर्गत्वापुत्रादिस्नेहवशा
दवलोकनार्थंगृहंनागछेदिति॥कथंभूतःराजा॥तप्तःबुभुक्षितोनगछेदितिभावः॥

उनः किंलक्षणः कार्यमानाः। कार्यो येऽउत्कंठितांतःकरणः॥ तथाचरत्नावल्यां। स्व
स्वनिकेतात्सुरभवनात्प्रधानादाश्रयीद्रुरुगृहद्वाऽपि। यामात्कृताग्निकार्यः प्रा
ग्यहविष्यंहिज्ञानुमितमिति। तथाचबृहस्पतिः॥ दैवज्ञंप्रच्छयित्वा। विदुषंपूज्यश
क्तितः। प्रदक्षिणमिमाक्षत्वातिष्ठंध्यायेदुमापतिमिति॥ तथाचज्योतिःप्रकाशे।
संतोष्यस्वांगनांविज्ञानज्ञस्वाप्तिरथादिकं। शुचिःशुक्लांवरोक्लीबःनत्वेषंसुम
नाग्रजेदिति॥ तथाचकश्यपः॥ यात्रासमयेदक्षान्परागेग्रहस्यवैषम्ये॥ गोभू हि
रण्यवस्त्रैःसंपूज्यश्रद्धयाहिरण्यमिति॥ बृहद्यात्रायांस्नातोभुक्तानुलिप्तश्चसर्वा
लंकारभूषितः। शुक्लांबरधरःश्रीमान्जध्वगःसुखमेधतइति॥ भूपालवल्लभे।
ब्राह्मणान्नावमन्येतकोपयेन्ननिजांगनां॥ यात्रांकृत्वागृहंवैवसिद्धिकामोविशेद्गृ १३९

हमिति। लल्लःयात्रायांप्रस्थितोयश्चब्राह्मणानवमन्यते। तदंतंनीवितंतस्यना
सौप्रतिनिवर्त्ततइति। बृहद्यात्रायां॥ यस्तुसंप्रस्थितोयात्रांस्वभार्यांनाभिनंदति
।भार्यावानाभिनंदेतनास्यप्रतिनिवर्त्तनमिति॥ तथाचरत्नावल्यां॥ क्रोशंयाप
द्दिनाप्यर्द्धंप्रथमेहनिगच्छते॥ द्वितीयेयोजनंगत्वानिवसेत्तमहीपतिः। तृतीये
योजनंसार्द्धंवसेदाक्रम्यदूरतः॥ ततःपरंयथेष्टंतुयायान्मार्गेमहीश्वरइति। अथ
यात्रकस्यनियमानाह॥ क्रोधक्षौरंरतिःश्रमामिषगूढघृताक्तोद्गयासवक्षारा
भ्यांगभयासितांबरत्वमीक्षितंकदूक्तमे॥ क्षीरक्षौररतिःक्रमात्त्रिरात्रसप्ताहं
परंतद्दिनेरोगंस्त्र्यार्द्धंवकंसितान्यतिलकंप्रक्षालनंकेपीतिचेति॥ ९९॥ ॥क्रोधःप्र॰
क्षौरंप्र॰रतिःमैथुने। श्रमःक्लेशः॥ आमिषंमांसं। गूढःप्र॰ घृतं। घृतरमणं। अक्ष॥
अक्षमोक्षणं। उद्गयंप्रसिद्धं। आसवोमद्यं। क्षारं। क्षारेधान्यमापादि॥ अभ्यंगस्तैलो

भ्यंगः।भयंशंकारिशुभयमित्यर्थः।असितंतांबरणि।अन्यवस्त्राणिकुल्लादीनि।व
मिर्वमनं।तैलंप्रसिद्धं।कदुमरीच्यादिरित्यङ्गमेगमनेऽन्नेतत्यजेत्।अथऽन्नेषुकिं
कति।दिनंत्यजेदित्याह॥ ॥क्षीरेति।क्षीरक्षौररतीःक्रमात्त्रिउत्रारं५।समाश्चंहंसजे
त्।क्षीरंयुग्मत्र्यहं।क्षौरंपंचाहं।रतिंसमाहंसजेदित्यर्थः॥परंऊर्वरितंतद्दिनेप्रयाण
दिनेत्यजेत्।रोगंव्याधिंयावद्धोधंत्यजेत्॥प्रस्थानकेपिइत्येतत्यजेत्॥प्रस्थानकं
नामसुमुहूर्तसमयेकिंचिदभीष्टवस्तुचालनं।तऽकंरत्नमालायांछत्रायुधाद्यं
मनसस्त्वभीष्टंप्रचालयेदर्जायकंजयश्रीं॥एतत्तुकार्यवशात्क्रियते।प्रस्थानसंपू
र्णफलंनास्ति।तथाचरत्नकोशे।कार्यंचवशात्स्वयमगमनेभूभुर्तुःकेचिदार्याः।।छ
त्रायुधाद्यभीष्टवैनयिकंनिर्गमेकुर्युरिति॥तथाचगर्गः॥स्वशरीरोयःकश्चिन्नि
र्गच्छेच्छुरुत्यान्वितःतस्ययात्राफलंसर्वंसंपूर्णंपथिसिध्यतीति।तच्चालनादिश्चेष्ट १४०

तरात्।गृहाद्गृहांतरंगर्गआहसीमांतरंभृगुः।शरक्षेपाद्भरद्वाजोवसिष्ठोनगरद्व
हिरिति।एवंप्रस्थानेकृतेपिस्वयमन्यस्मिन्सुदिनेगच्छेत्॥तथाचज्योतिःप्रकाशे।
प्रस्थानेपिकृतेनेयान्महादोषान्वितेदिने॥गर्भयोगंविनाकालदृष्ट्यादौचालुते
तथेति॥रत्नमालायां।वसन्नेकत्रदशरात्रीतिऊर्ध्वंदिनानिनोसन्नकमांडलिकः॥
यःप्राकृतःसोपिचपंचरात्राभद्रेणयात्रापरतःप्रयोज्येति।एवंविधेप्रस्थानेपिक्रोध
क्षौरादीचर्यदित्यर्थः॥गर्गः॥क्रोधंक्षौरंतथावांतिंतैलाभ्यंगाश्रमोक्षणे॥धूतंमा
संगुडंतैलंयानेमद्यंपरित्यजेदिति॥रत्नकोशे॥कालियकंहिंगुलकंकुंकुमेर
क्तचंदनं॥पीतरक्तंचवसनंयातुर्नेष्टानितत्क्षणादिति॥दृढघात्रायां॥कटुतैल
कटूक्षारपक्वमांसान्नंतथा॥सुत्वायोयातिमोहेनव्याधितःसन्निवर्तत इति।
लल्लः॥ ॥प्रमत्तोव्याधितोभीतःश्रांतःक्रुद्धोबुभुक्षितः।अध्वानंनप्रपद्येत-लीव

मस्तथैवच॥रत्नावल्यां।स्वकीयांपरकीयांवास्त्रियंश्रुषमेववा॥ताडयित्वा
तुयोगछेत्तदंतंतस्यजीवितमिति॥भृगुः॥त्रिरात्रंवर्जयेत्क्षीरंपंचाहंक्षरकर्म
च।तद्रक्तश्रावशेषाणिसप्ताहंमैथुनंत्यजेत्॥ ॥यात्रायांगमनलक्षणंगर्गोक्तं
ज्ञेयं।मुहूर्त्तसमयेग्रामेहंसचारींघ्रिणाव्रजेत्॥दैवज्ञामात्यविप्राद्यश्रुरोगैस्वज
नैर्हृतः॥पूर्वदक्षिणमुत्क्रम्यपादंयात्रांतरंधिपः॥रात्रिंशतंपदंगत्वापानमारु
त्यसंव्रजेत्॥ततोनिरीक्षयेत्सम्यक्शकुनांश्चशुभाशुभान्॥तथैवसदसल्ल
क्षन्निमित्तानिचव्रजेदिति॥इदानींशकुनान्नाह॥ ॥वस्त्रालंकरणानिपू
र्णकलशोस्तोर्यध्वनिःश्रुत्रवान्शंखादर्शनृपाश्चदंतिसुरभीस्त्रीश्रुष्पधान्या
दिच॥दीपाविधूमवह्निसुरभीद्रव्याणिश्रुभ्रोदृषोवेश्याछत्रवितानचाम १४१

रकुमार्योमीनगोरोचने॥९२॥ ॥वस्त्राणिश्वेतवस्त्राणि।अन्यानित्रपशकु
नमध्येपठितानि।अकरणादिनिर्मितानितिपूर्णकलशःप्रसिद्धःतौर्यध्वनिः॥ग
ध्वनिः॥श्रुत्रवान्वर्द्धमानश्रुरुषः।शंखःप्र०आदर्शप्र०नृपोराजन्यः॥अश्वप्र०
दीतीहस्ती।सुरभीगौ।स्त्रीसौभाग्यवती।श्रुष्पाणिश्वेतानि।धान्यान्यक्लानि
क्लानित्वपशकुनेपठीतानि॥आदित्रशब्देनसुवर्णादिधातवः।दीपाप्र०दीपः
निर्धूमवह्निःधूमरहितोवह्निः॥सुरभीद्रव्याणिकर्पूरचंदनादीनि।श्रुभ्रोदृषः।
श्वेतदृषभः।वेश्याप्र०।अथसंक्षोचेनाह॥यद्यत्स्यांतनितांततोपकरणंकोरुध्र
नंगोमयंमृच्चाभोर्घघटान्वितःसहचरोधौतांवरोमौत्रकः॥उर्वादर्भरथाःपला
स्त्रमदिरावणीगुरुर्दैवविद्विप्रोमित्रमृगावरोधनवस्त्रंसिद्धार्थडुग्धादिच॥९३

यद्यत्स्वरूक्स्यांतनिमांतनोपकरणंस्यांतंअंतःकरणंतस्यनिमांतंअतिक्रांयितंनोष
कणंसनोपजनकंतत्किंबहुनोक्तेनएवंसंक्षेपेनोक्तेदानींयेषुसंतोपासंतोषभा
वःपूर्वाचार्यैःशकुनमध्येपठितानिनान्याह॥कोरुधृतंगोमयं।कोश्थिव्याःउ
ध्दृतंगोमयंमच्चएथिव्याःउद्धृतामृत्तिका॥अंभोर्घघटाचितःसहचरःउदकार्थ
कुंभयुक्तोजनःसहचरःसहचरतीतिसहचरःजलार्थीरिक्तकुंभस्तपथिकेनस
ह्यजेत्।निवर्त्तनेयेथापूर्णःकृतार्घःपथिकस्तथेत्युक्तवात्।धौतांवरोत्रकः
ध्वस्त्रःरजकःदूर्वाप्रसिद्धाः।दूर्वादर्भौ।तृणेतृणेपिशुभे।अपशकुनमध्येय
तृणंपठितंतदेतद्यतिरिक्तं।रक्तंत्रसिद्धं।पलंमांसं॥अस्त्ररक्तं।मदिरामद्यं।वणी
ब्रह्मचारीगुरुःप्रसिद्धः॥दैवचिन्त्योतिथी।विप्रोद्यौब्राह्मणोमित्रंइष्टःमृगः प

सिद्धः।अरोदनंश्रवंरोदनरहितंप्रेतंसिद्धार्थाःगौरसर्षपाः।डुग्धादिडुग्धदध्याज्ये
ननुयद्यत्स्वांतनिमांतनोपकारणमित्यनेनडुग्धंहेहणत्वात्सिद्धं॥पुनःकिमुक्तं
डुग्धमिति।सत्यंडुग्धंभक्षणेनिषिद्धं॥नत्संदेहनिवृत्त्यर्थंडुग्धंपठितमित्यदोषः
एवमेवान्यत्रविचारणीयं।तथाचवसंतःदध्यान्यडुर्वाक्षतपूर्णकुंभसिद्धान्न।
सिद्धार्थकचंदनानि॥आदर्शशंखामिषमीनमद्यागोरोचनागोमयमुध्दृतंगो
रिति।भारद्वाजःरजनाविप्रोसुहृद्धेम्यासप्तत्रास्त्रीकुमारिका॥अभिरूपोनरो
स्त्रीवागजोवाजीवृषःसितःरज्वाधृतान्यवर्णेगौःसवत्साचविशेषतः।शुध्दृतं
गोमयंमीनंमृत्तिकाचोध्दृतातथा।रजकोधौतवस्त्राश्चवैश्यातौर्यत्रिकध्वनिः
जयमंगळशब्दाश्चशुभा।तीपाठःप्रदीपकाः।दीपोवाप्रज्वलदग्निःपूर्णकुंभंनृपा

सर्वं॥मद्यंमांसंचरुधिरंभक्षाणिविविधानिच॥इक्षवोमधुतांबूलंवस्त्राळंकरणा
निच॥रौप्यंताम्रमणीस्वर्णंद्रव्यंदर्पणमक्षता:॥वितानंचामरंछत्रंदूर्वाहरूपनंद्वि
ज:॥दोलाचारुरथोदृहद्:पुत्रपौत्रार्थयुक्शुचि:॥चंदनानिसुगंधीनितथाऽष्मा
णिरोचना।घृतंदधिपय:पेयासिद्धमन्नंवचश्शुभं॥दैवज्ञासुगुरुर्देव:चितोत्सा ह
करणिच॥दृष्ट्वैतानिनरोयायात्सर्वार्थंलभतेतुसइति॥कुर्वन्दक्षिणत:सदेतदि
तरद्वामेप्रकुर्वन्व्रजेद्भस्मास्थिधनविट्तुषाश्मळवणोपानदृणायस्करः।पिण्या
कौषधकुल्थधान्यरुदन्तकंसधूमानल:कार्पासरुणऽष्मचर्मचगुडस्तैलायसिक
र्दमः॥९५॥ ॥एतत्अनंतरेकंसत्शुभंदक्षिणत:दक्षिणभागेकुर्वन्सन्इतरत्
अशुभंवक्षमाणंवामेकुर्वन्सन्व्रजेत्॥ ॥अथाशुभमाह।भस्मेति॥ ॥भस्मप्र० १४३

दधनप्र०विट्विष्ठा।तुषंधान्यादीनां।अस्थिप्र०।अश्मायापाण:।लवणंसामुद्रिकं॥ऊ
पानहौप्र०तृणंप्र०अयस्करोलोहकर:पिण्याकमर्दितिला:औषधंप्र०कुल्थंधान्यमा
षादि।रौद्रनादिप्र०॥मन्नोवांतऊभुक्षितांतकखळामुंडीजटीव्याधित।खंजव्यंगदिगं
बरायतिरिःकांषायिमुक्काळकौ॥चौरोभ्यक्तमलाविळाश्वयनितःपाश्यर्गळीगुर्वी
णीव्यंध्यारुल्लदृषाहिभेकसरटागोधावराह:श्वा:॥९६॥ ॥जाहौत्तूमहिष:
खरोष्ट्रमहीषारुढाश्वरिक्तोघट:।स्खिक्काप्राणिन्शिरोंगकंपपदवीबंधा:कुवागा ह
वौ॥पातोयानपलायनंश्वकलह:षढंक्षनंगोर्ज्वलद्हेमेतिप्रतिबंधकाकुशकुना
स्थिकादिकामृत्युदा:॥९७॥ ॥दी०॥मन्नकन्मन्न:वांत:वमित:।बुभूक्षितोरंक:अं
तक:।अंतक:प्राणिहिंसक:खलोदुर्जन:मुंडीमुंडित:जटीजटिल:॥व्याधितोरोगी।खं

जः पादेनखंजः॥व्यंगोंगहीनः॥दीर्घवरोनम्रः।यतिःसन्यासी।अरिर्वैरी।कापायी।
गैरिकरंजितवस्त्रः।मुक्तालकोमुक्तकेशः॥चौरःप्र०अभ्यक्तसैलाभ्यक्तः।मलावि
लोमलिनः॥पतितोजातिभ्रष्टः॥पक्षिप्राणिबंधनार्घपाशपाशवान्॥अर्गली
अर्गलावान्॥गुर्विणिसगर्भा।वंध्यानिरपत्या।रूक्षदृषद्रूक्षोनड्वान्॥अहिःस
र्पः।भेकोमंडूकः॥शरःप्रसिद्धः।गोधाप्र०।वाराहःप्र०।शशःप्र०।ग्राहःमंडली।लोके
सेहकेतिप्र०।ग्राहकोगात्रसंकोचिमंडलीचबुधैस्मृतइतिहलायुधः॥ओतुर्मार्जा
रः।महिषःप्र०।खरोष्ट्रमहिषारुढाःप्र०।रिक्तोघटःप्रसिद्धः।छिक्काक्षुतं।प्राणिन्नीरंसि
कंपः।प्राणिनांगोश्वादीनांप्राणिनांशिरःछादनं।अंगछादनंवापादछादनंवा।
पदवीवंधोमार्गवंधः॥ऊर्णनादिभिर्मार्गोवध्यते।कुवाक्।कुत्सितवाक्श्रवणं। १४४

आहवःसंग्रामोत्तिविडाळमहीपादीनां।पातःपतनं।वस्त्रादीनांस्खलनं।यानम
श्वादितस्यपलायनं।श्वाकलहः।शूनाकलहः।षंढंनपुंसकं।गोक्षुतं।प्रसिद्धं॥प्र
ज्वलद्वेश्मज्वलद्गृहंदर्शनं॥इत्येतेऽपशकुनाः॥प्रतिबंधकाः।कार्यप्रतिबंधकाः
स्युः॥छिक्कादिकाःअपशकुनाःमृत्युदाःस्युःतथोक्तमागमांतरे॥दृणगैरिकाप
सभस्मचर्मतुषौषधं॥सामुद्रंगुडपंकाहिमन्नंवांत्रंबुभूक्षितमित्यादि॥ ॥अथश
कुनांतरमाह॥ ॥भृंगाल्युष्ट्रपठछुकाश्वनखिनःस्त्रिसंज्ञकावामतःकालिकुक्कु
टपुंस्यथाश्वेक्षुरभिर्दक्षेमनोभीष्टदाः॥भारद्वाजशिखंडिचाश्वनकुलाहंसोजएते
दृग्यातादृष्टफलाःक्रमेसभरवोवामेपिदक्षेर्थदः॥९८॥ ॥भृंगोभ्रमरः।अलिर्द्वि
श्विकःउष्ट्रःप्र०पठन्शुकःशष्कुर्वाणोरजशुकश्च।नखिनःश्वानादयःस्त्रिसंज्ञकाः।

चटिकादयः॥एतेवामतःमनोभीष्टदास्युः॥काळीमहीषिकुक्कुटःप्रसिद्धः।त्रिखंडी
प्र·वामः प्र·॥नकुलोबभ्रुःहंसःप्र·नअजोमेषः॥एतेभारद्वाजादयः।दक्षंयानासं
तःइष्टफळास्युः॥अयमर्थः॥भारद्वाजादयोवामेवादक्षेवाग्रेवादृष्टादृष्टमा
त्रइष्टफळाःअभीष्टफळदाःभवंतित्यर्थः॥एसभरवोगर्दभध्वनिः॥वामेदृष्टे
वार्थदः॥ ॥अथयेषुयेषुकृत्येषुविपरीतत्रकुनाःशुभास्तानाह॥ ॥नघत्रारभ
यप्रवेससमरघतेषुनष्टक्षणेव्याधौस्युःशुभदाविलोमत्रकुनानाड्याडायाभरे॥
घाघेदुःत्रकुनेविवृत्यचशुचिर्भूत्वाष्टधास्वायमंकृत्वेयादपरेष्टिरेवारमपरेदत्वा
रुवर्णव्रजेत्॥९९॥ ॥नघत्रारेनघत्ररणंभयंचपादीनांप्रवेशोग्रामादिप्रवेशः
समरःसंग्रामः।घतंप·नष्टक्षणंनष्टवस्तुनःअवलोकनं॥व्याधौरोगोपचारेएषवि १५५

लोमत्रकुनाःविपरीतत्रकुनाःशुभदाः॥अयमर्थः॥गमनेयेऽपत्रकुनाः।तेनघ
त्रारदिशुभदाःस्युःतथाड्डायाःनाघाभरेपूर्णनायांविलोमत्रकुनाःशुभदास्युः।त
थाचवसंतः॥भवेदीडायांपरिपूरितायांसर्वोपिवामःत्रकुनाःप्रशस्तस्यात्पिंगलायां
परिपूरितायांसर्वोपसव्यःत्रकुनःप्रशस्तः॥संगरेणेकर्मणिचप्रवेशेशुक्लग्रहेनष्ट
विलोकनेच॥व्याधौसरिद्दुर्गवनादिकेषुत्रशस्तःप्रयाणाद्विपरीतभावइति॥अन्य
त्र।नघत्रारेभयेयुद्धेप्रवेशेनष्टविक्षणे॥त्रकुनाव्यस्तगाःत्रस्तानृपालोकेप्रया
णवदिति॥ ॥अथप्रथमेऽत्रकुनेज्ञातेसतिकर्तव्यमाह॥ ॥आघइति॥आ
घेप्रथमेऽःत्रकुनेज्ञातेसतिनिवृत्यविवर्तनंकृत्वातत्रशुचौदेशेऽउपविश्यशुचिः
प्रक्षालितपाणिपादःआचांतःकृताचमनःअसवःप्राणास्तेषांआयाम।प्राणाया

मःअष्टधा॥अष्टवारंप्राणायामंकृत्वाद्व्याहृछेत्॥चेद्यदिप्रमादःदुःस्वप्नःस्यात्तदा
विहत्यशुचिरचांतः॥अष्टिवारंषोडशवारंअस्वेन्नियमेत्॥अपरेतृतीयेदुःस्व
प्नेजातेसतिसुवर्णंदत्वाद्व्याहृछेत्॥एतदावश्यकगमनविषयं॥प्राणायामान
धिकारिणातावत्कालंस्थित्वाव्रजेत्॥तथाचम्योतिर्निबंधे॥विरुद्धस्वप्नेपूर्वेप्रा
णायामाष्टकंचरेत्॥द्वितीयेद्विगुणान्कृत्वातृतीयेनव्रजेत्क्वचित्॥ ॥तथाचवसं
तराजः॥ ॥जातेविरुद्धेस्वप्नेध्वनीनेव्याहृत्यकृत्वाकरपादशौचं॥आचम्यच
क्षीरतरोरधस्तान्निष्टन्प्रपन्नेछकुनांतरणीति॥तथाचआशीषणीःयदापश्येत्स्व
प्नेपश्येद्विपरीतमुपस्थितः॥विप्रायकांचनंदत्वानिर्विघ्नंकंव्रजेदिति॥ ॥इति
श्रीमूहूर्त्तमार्त्तंडटीकायांयात्राप्रकरणं॥ ॥छ॥ ॥अथमिश्रप्रकरणंविवक्षुस्ता

वद्यात्राभिषेकंदत्तार्द्दनाह॥ ॥जन्मांगर्क्षदशेस्वस्यसग्रहकुजेसार्कैर्वलिष्टैर्मृदुः
क्षिप्रेद्रुधवभैःस्थिरर्धितनौव्याधक्रिभूपस्थितिः॥स्वस्वर्क्षैःसमृदुध्रुवर्क्षचरभ
क्षिप्रैःस्करस्थापनंभौमुर्मायुगेचरधयुगळेव्यारेक्रिमूर्वाक्रके॥१०॥ ॥जन्मां
गर्क्षदशेस्वादिभिर्बलिष्टैस्तथामृद्वादिभिस्थिरर्द्धितनौव्याधक्रिभूपस्थितिः॥स्व
स्थास्यादित्यध्याहारः॥अंगंचऋक्षंचअंगर्क्षंजन्मनिअंगर्क्षंजन्मांगर्क्षं॥जन्मलग्न
जन्मराशिगते।चद्दशाच।जन्मांगर्क्षदशाःदशावर्त्तमानाःतासांद्दशाःजन्मांगर्क्ष
दशेस्वास्तेचसूर्यश्च॥सत्स्वेदाश्चतेतथा॥तेबलिष्टैस्वस्वादिभिःबळसमृद्धैः॥मृदु
क्षिप्रेद्रुधवाभैःस्थपं।स्थिरर्द्धितनौऋद्धिंगतातृतनुः॥ऋद्धितनुः॥स्थिराचसौ
ऋद्धितनुश्चसातथा॥तस्यांजन्मराशिजन्मलग्नाभ्यांस्थिरेपचयनृलग्नेव्याधक्रि

भौमरहितदिनेभूपस्थितिः॥राज्ञप्रतिष्ठाशुभास्यादित्यर्थः॥लग्नबलंप्राग्वत्॥प्राय
श्चंद्रमित्याद्यवलोकनीयं॥ ॥अथदेवस्थापनमुहूर्त्तीर्त्तरर्द्धेनाह॥ ॥स्वस्वर्क्षेरि
ति॥स्वस्वर्क्षैर्यस्यदेवस्यप्रतिष्ठाक्रीयतेतस्यनक्षत्रैःस्वेषंस्वंलग्नबलंप्राग्वत्॥
॥ ॥अथवस्त्रपरिधानंतस्यक्षालनंउडुंबरादिभक्षितफलंचेत्याईनाह॥ ॥
धार्यंवस्त्रदितीनपंचगुरुभाश्चान्यधवैर्ज्ञत्रयेज्ञोनेक्षाल्यमिहाखुभक्षितमसन्मध्य
त्रिभागेंबरं॥स्त्रीरक्तांबरभूषणेत्रविभृयाद्यादित्यपुष्यध्रुवैश्वेतेज्योरुणरुक्
मयोःकुजरविरुक्लेज्ञानिःस्वस्यते॥२०१॥ ॥धार्यमिति॥ ॥वसुर्धनिष्ठाअदि
तिःपुनर्वसुः।इनपंचहस्तपंचकंगुरुभंपुष्य॥अश्विनी।अंत्यंरेवती॥ध्रुवाणिरो
हिंण्यादीनि॥एतैर्नक्षत्रैर्ज्ञत्रयेबुधगुरुशुक्रवारे॥अंबरंवस्त्रं॥धार्यंनान्यत्र॥यचउक्तं॥ १४७

रवौजीर्णंविधौस्तोकंजलाईंदुःखदंकुजे॥बुधेधनंगुरौज्ञानंशुक्रेसौख्यंज्ञनौमलि
नमिति॥लग्नबलंप्राग्वत्॥ ॥अथक्षालनमाह॥इहास्मिन्धारणेकेनक्षत्रा
दौक्षाल्यंप्रक्षाळनीयं॥कथंभूतेइहबुधरहिते॥उक्तंच॥वस्त्रहेमाद्यलंकारधार
णेकैश्चभादिभिः॥तत्संहतिश्चनिर्माणंविदध्यात्क्षाळनमिति॥यद्यपियस्यागं
यदोगिनोगदितमेकुर्योदितिपूर्वमेवअंगसुकंकर्मोक्तंतथापिक्षाळनेबुधवर्ज
नार्थंज्ञोनेइहक्षाल्यमित्युक्तं॥बुधनिषेधश्चवाणात्॥उक्तंच॥ज्ञनौसोमसुतेश्रा
द्धेपक्षामावास्ययोस्तथा॥वस्त्राणांक्षाळनंचैवदहत्यासप्तमंकुळमिति॥ ॥अथ
ऊडुरादिभक्षितफलमाह॥ ॥आखुभक्षितफळेमिति॥आखुरुंदुरः।तेनभंव
रंमध्यत्रिभागेभक्षितंअसदृष्टफळंस्यात्॥एतदुक्तंभवति॥वस्त्रत्रिभागरूपा

यदिभक्षितभागंमध्यत्रिभागेपतितदातदुष्टमित्यर्थः॥आखुरित्युपलक्षणं॥ते
नाग्निदग्धंगवादिभक्षितंमघादिप्लिनंज्ञेयं॥तथाचोक्तंहतत्रते॥ ॥दग्धंवाफ
टितंचगोमयमक्षीपंकैर्विलिप्तंतथाहतंमूखकर्पुकसरशुभदंमध्यत्रिभागेशु
क्लमिति॥ ॥अथस्त्रियारक्तवस्त्रधारणंअनुक्तग्रहणकुत्रकुत्रप्राग्वस्त्यतउत्तरा
र्द्धनाह॥ ॥स्त्रीति॥स्त्रीअत्रऊर्द्धेवस्त्रधारणंभादौअंबरंभूषणंबिभृयात्॥धारये
त्॥कथंभूतेअत्र॥व्यादित्यपुष्यध्रुवे।विगतानिपुष्यध्रुवानियस्मात्तत्तथा।तस्मि
न्यतोत्रस्त्रियारक्तवस्त्रभूषणधारणेदोषोदृश्यते॥तथाचोक्तं॥पुष्यादित्यध्रुवैर्धि
ष्ण्यैःस्वर्णरक्तांबरादिकं॥नवंनभूषणंधार्यंनार्यादयितरायुषेति॥लग्नबलंप्राग्व
त्॥ ॥अथचंद्रादीनांप्राबल्यमाह॥ ॥श्वेतेवस्त्रेनिरौप्यमुक्ताफलादिकेअच्चश्चं

द्रोहितः।सोमेवारेश्वेतवस्त्रंधार्यमितिभावः॥कुजरवीअरुणरुक्मयोःप्राबल्येते।प्रा
निःकृष्णेवस्त्रंनीलवस्त्रादिकेप्राबल्यते॥प्रज्ञौतद्वार्यमितिभावः।अत्रयेसर्वंधार्यमि
तिपुरैवोक्तं॥ ॥अथनराणांभूषणधारणंहस्तचरणेनाह॥ ॥वस्त्रोक्तैर्व्यनिलहय
श्विभिरगेंगेनुविभूषाहितावित्राज्ञोत्सवलब्धिपूर्दितमनुकेपीष्टकारणं॥मैत्रा
र्कानिळमूलदस्त्रहरिभेहिज्याजपादेत्तरेपण्यानांक्रयविक्रयौघटपरर्घ्यंगे३।६।११।
९॥स्वभौतनु३॥वस्त्रोक्तैर्भादिभिर्वस्वदितिज्यात्यत्रोक्तेअंगेस्थिरलग्नेनुः॥नर
स्यअलंकृतिरलंकरणंहितंस्यात्॥किलसर्पैःवस्त्रोक्तैःव्यनिलहयाश्विभिःअनि
लहयंस्वातीयुगं।अश्विनीप्र०विगताअनिलहयाश्विन्योयेभ्यस्तानितस्मिन्॥स्वा
तीविशाखाऽश्विनीरहितैरित्यर्थः॥लग्नबलंप्राग्वत्॥ ॥अथद्वितीयचरणेनवि

शेषमाह॥ ॥विप्राज्ञेइति।विप्राज्ञाब्राह्मणज्ञा॥ऊत्सवोविवाहादिकः॥लब्धिर्लाभः।
आमुत्सन्तुअनुक्तेपिभाद्यैधारणंवस्त्रादिधारणं।इष्टकृत्स्यात्॥तथाचोक्तंव्यासेन॥ल
ब्धंराजप्रसादेनविप्रादेज्ञातकरयहे॥प्रीत्यानवोत्सवंवस्त्रंधार्यंनिद्येपिभादिकेति॥॥
॥ ॥अथोत्तरार्द्धेनपण्यानांक्रयविक्रयावाह॥मैत्रेति।मैत्रंअनुराधा।शेषंसुगमं॥
घटपर्य्यंगेघटःकुंभः॥तस्मात्परंअन्यतमंतच्चतत्कुंभंगंचंकुंभंगंनपचयलग्ने।त
स्मिन्कुंभव्यतिरिक्तेपचयलग्नेपण्यानांद्राक्षाफळखर्जूरादिनांक्रयविक्रयौतनुविला
रय॥कस्यांसत्यां।स्वशुक्रेसत्यां।स्वंधनभावःतस्यशुद्धिःपापरहित्यंतस्यांसत्यां।शेषंभा
स्वत्॥तथाचोक्तं।दशमैकादशेलग्नेवित्तकेंद्रत्रिकोणगैः॥शुभैपण्यस्यकर्मोक्तंवर्जयि
त्वाघटोदयमिति॥ ॥अथदशार्द्धेनधनिष्ठापंचकेवर्ण्यमाह॥ ॥प्रेतज्वालनशय्यका वि

तनेलंभोछूयंयाम्यदिग्यानंकाष्टरणोच्चयंपरिहरेत्कुंभद्वयस्थेविधौ॥सेवेछाधृ
ववारुणांत्यवसुभैःखायेरवौवाकुजेसंन्यासस्थिरभैर्खळैर्गतबलैःषष्ठ्यत्यगेभार्गवे
॥१०२॥ ॥ ॥प्रेतज्वालनेत्यादि॥कुंभद्वयस्थेविधौसतिकुंभमीनयोश्चद्रेसतिपरि
हरेत्॥स्पष्टं॥ ॥अथोत्तरार्द्धेनसेवामाह॥सेवेति।धृवादिभिर्नक्षत्रैःसेवाद्यशी
स्यात्॥सुगमं।कस्मिन्सति।खायेरवौसति।वाद्यथवाकुजेसति।खंदशमं।आयए
कादशम।अनयोरन्यतमेरविभौमयोरन्यतमेसतीत्यर्थः॥शेषंप्राग्वत्॥ ॥अथच
तुर्थचरणेनसन्यासमाह॥ ॥सन्यासइति॥स्थिरभेनक्षत्रेस्थिरलग्नेचसंन्यासःशुभः
स्यात्॥कैःखळैर्गतबलैरित्यर्थः॥सप्तम्यर्थेतृतीया॥कस्मिन्सतिभार्गवेशुक्रेषष्ठं
स्थगे१२।सति॥शेषंप्राग्वत्॥तथाच॥त्रिषडेकादशेसौरिर्व्ययेषष्ठेचभार्गवः॥सब

ऊधर्मपेनीवेकेंद्रोदिक्षाविरक्तिकृदिति॥ ॥अथदृत्तद्वयेनऋषिकर्माह॥ ॥ऊद्याहर्क्ष
चरहियेंद्रळघुभत्वाष्टैःशुभास्यात्ऋषिर्व्यार्किनारखगाक्षियुग्मनुषगोकन्याविलग्ने
तिथौ॥व्यंकौजेसदिग्निरंशैपंचदशभिर्लवैः॥१॥३॥५॥७॥११॥१३॥१५॥१०॥प्रणम्यखगभूसुरान्सिताछाद
नःस्वर्णोधृष्टहलंस-कसुदृषैःसौम्योपदुस्त्रिर्नयेत्॥१०३॥ ॥ऊद्याहर्क्षाणिपूर्वोक्ता
निमूलं॥त्यार्केत्यादीनिएकादशसंख्याकानिचरणिप्र०द्विपंविशारवा॥इंद्वोन्येष्ट
।लघुभानिप्र०त्वाष्ट्रंचित्रा॥तैर्व्यार्किःशोरखताक्षि॥आर्किःशनिः।शोबुध।आरेभौ
मः॥विगताःआर्किर्यस्मादेभ्यस्तेचतेखगाश्च॥तेषांअहःदिनतस्मिन्॥ऋतिभौ
मबुधरहितयोरित्यर्थः॥युग्मंमृगोकन्याविलग्नेयुग्मंमिथुनंमृगोमीनः॥गौदृ
षः।कंन्यापद्मएषामन्यतमविलग्नेतिथौव्यंकौजे॥विगतःअंकनवमीयस्मादसौव्यं १५०

कःसचासौओजश्चओजोविषमःतस्मिन्वेनेमीव्यतिरिक्तविषमतिथावित्यर्थः॥
किंलक्षणेव्यंजकौजेतिथौ।सदिग्निदिक्दशमीतयासहवर्त्तमाने॥१॥३५॥७॥११
१३।१५।१०॥ऋषिःशुभास्यात्॥तथाचोक्तं।चंद्रेतिशुभे।शुभतिथौ।शुभवारयोगेवा
रगुरौऋक्षेजशुक्रगमस्तिवारे॥लग्नेदृषेमिथुनेमृगकन्यकायांऋक्षंऋषिप्रक
रणंध्रुवपेनिधनेइति॥अन्यच्च॥दशम्येकादशीचैवतृतीयाचत्रयोदशी॥सप्तमी
चैवप्रतिपंचमीपञ्चसुखावहा॥हत्यष्टमीबलीवर्दान्नवमीस्त्रीघातिनी॥चतुर्थी
कीटजननीपतिंहंतिचतुर्दशीरवौहरस्पतौचंद्रेशुक्रेकुर्याद्विरोधनः॥बुधार्कि
भूमिपुत्राश्चनभवंतिफलप्रदाःइति॥ ॥अथविधिमाह॥ ॥सिताछादनःश्वेतध
रःपटुःकृशलः॥कर्त्ताखगभूसुरान्देवान्प्रणम्य॥मनोवाक्कायकर्मभिर्नमस्कृ

त्वा॥स्वर्णोहत्यहलंसुवर्णघर्षितांगंहलंसमुक्तसुहृषैःस्फटिकहृषणास्तैःसहवर्तमानाः
समुक्ताःशोभनाःहृषाःसुहृषाःगुणावयवपूर्णाःनीरोगाःसमुक्ताश्चतेसुहृषाश्चतथातैः
कृत्वासौमींऊत्तरस्यांदिशित्रिवारंनयेत्॥हलेनपरुतीःकुर्यादितिभावः॥उत्तरदि
शंप्रतित्रिवारनयनेनपंचरेखाऊत्पद्यंते॥तद्यथा॥प्रथमगमनेनैका।आवर्तनेद्वि
तीया॥उत्तरुत्तरंप्रतितृतीयगमनेनपंचरेखाभवंति॥अधिकानकार्याइतिभावः॥
सौम्यांपदुःत्रिर्नयेदित्यत्रपदुग्रहणंअखंडरिष्टरेखाकरणार्थं॥तथाचोक्तं॥स्नात्वा
सुचंद्रतारासुशुचिःशुक्लेनवाससा॥स्नात्वागंधैश्चपुष्पैश्चपूजयित्वाविशेषतः॥एष
वांग्रहसंयुक्तांपूजयित्वाप्रजापतिं॥अग्निंप्रदक्षिणीकृत्यदातव्याश्चैवदक्षिणा॥इ
त्यौहपौनियोक्तव्यौनश्चयुतेनवा॥हेमशृंगहलाग्रेणछिन्नरेखांनकारयेत्॥उत्तरा १५१

भिमुखोभूत्वाक्षीरेणार्द्रंप्रदापयेत्॥विल्वंवंछिन्नलांगूलंकपिलंवृषभंत्यजेत्॥ह
लप्रवाहनंकार्यंनीरुग्भीर्दृषकर्षकैः॥हलादिभिर्दृढैःक्षेमंकृदृढैनशुभंभवेत्॥वृष
भायदियुध्येतनस्यविघ्नंसदाभवेत्॥तस्यप्रकारेणनिर्विघ्नंकारयेत्तदा॥एकोनत्रय
करीरेखातृतीयाचार्थदृद्धिदा॥पंचमीचभवेद्रेखावहुसस्यफलप्रदा॥अतऊर्द्धन
कर्तव्यामहादोषस्तुतोभवेत्॥स्मर्तव्यावसवःशुक्रःएधुनामासचंद्रमाः॥परशते
रेहलीचैवसर्वविघ्नोपशांतयइति॥अत्रदुर्निमित्तानितत्रैवोक्तानि॥हलेप्रवा१
ह्यमानेतुकर्मछुत्पद्यतेयदि॥गृहिणोमृतयेतस्यतनोनेश्चभयंभवेत्॥इषानंगो
यदाकृष्टःसंतासोनीवितस्यच॥सुतनाशोयुगेभग्नेसमानेस्त्रीयतेक्षिप्रं॥योकछे
देतुव्यासंगःसस्यहानिश्चजायते॥हलेप्रवह्यमाणेतुगौरेकःपतपेद्यपि॥पतपेद्युक्त

मात्रस्तुबंधनेचप्रयच्छति॥ज्वरतिसाररोगेणकृषिभंगंविनिर्दिशेत्॥एवदेयकर्कमा
त्रस्ततोगौरवनतेयदि॥नहेनयुक्तमात्रस्ततदासस्यचतुर्गुणंमिति॥ ॥अथकृषि
विषयेलांगलचक्रमाह॥त्रित्रित्रीघनळार्थरामहुतभुक्भेषर्कभुक्कादसत्सऋक्षः
कृषिभैर्विवारुणहरिंद्वैबीजवापःशुभःसूर्यर्क्षादितृतीयतो२।४।५।६।७।८।९
१०।तिथतित।११।२०।२१।२२।२३।२४।२५।२६।श्वाष्टभैसत्फलःप्रोक्तोन्यैःफणि
सप्तमाद्रविरुद्रमितैस्तच्छेदनंवापभैः॥१०४॥ ॥अर्कभुक्तात्सूर्यभुक्तान्नक्षत्रात्स
काशात्त्रिव्यादिष्वस्तानाष्टकस्थितेष्वनक्षत्रेष्वअसत्तदित्येतत्फलद्वयंभूयः॥
वारंवारंस्यात्॥एतदुक्तंभवति॥सूर्यर्क्षतनक्षत्रस्यआदिमान्नक्षत्रात्सकाशात्त्रि
ष्वअसत्इष्टफलंस्यात्॥तदनंतरंत्रिषसत्शुभंस्यात्॥ततःइषपंचसुसत्॥ततोऽनले १५२

ष्वत्रिषुअसत्॥ततःअर्थेपंचसुसत्॥ततःरामेषुत्रिषुअसत्॥ततोकृतभूक्षत्रिषुस
त्स्यादित्यर्थः॥अथोबीजोत्पत्तिमाह॥कृषिभैरिति॥कृषिभैः कृषिनक्षत्रैःऋक्षाह
र्क्षचरद्विपेत्यादिभिः बीजवापःशुभःप्रोक्तः॥किंलक्षणैःकृषिभैः॥विवारुणहरि
द्वैः॥वारुणंशततारिकाः।हरिःश्रवण॥इंद्रोज्येष्ठाः विगताःवारुणहरिंद्राःयेभ्य
स्तानितथातैः शततारकाःश्रवणज्येष्ठारहितैरित्यर्थः॥कृषिभिरित्युपलक्षणं।
तस्मात्कृष्युक्तंसर्ववारादिकंज्ञेयं॥तथाचोक्तं॥मूखकानांभयंभौमेमंदेशालभक्षी
दयो॥नवएपच्चतिथौरिक्तेहीनेसोमेविशेषतः॥ष्पलग्नेथवामीनेकन्यायांमिथु
नेतथा॥वापयेत्सर्वसस्यानियदिच्छेत्सस्यसंपदइत्यादि॥उन्नवल्मीकवत्॥ ॥
अथबीजवापविषयेद्विभेदंफणिचक्रमाह॥ ॥सूर्यर्क्षादिति॥सूर्यनक्षत्रादि

तृतीयं॥तस्मादतिधृतिरेकोनविंशंतस्मात्अष्टर्षिः॥तृतीयादृषिः एकोनविं
शादृषिर्नक्षत्रे बीजवापः सत्फलः स्यात्॥अथतृतीयभेदमाह॥अन्यैरितिअ
न्यैरुचार्यैः फणिसप्तमात्राद्रु॥सप्तमात्सकाशात्रविमितैर्द्वादशभिर्नक्षत्रैबीज
वापः शुभः प्रोक्तः एतद्रुक्षंभवति॥एकुर्यस्मिन्नक्षत्रेभवति॥तस्माद्यत्सप्तमंनक्ष
त्रंतत्फणिसप्तमंउच्यते॥तस्मात्सकाशाद्द्वादशभिरित्यर्थः॥एहेस्तुफणितिना
मग्रंथांतरप्रसिद्धं॥वराहमिहिराचार्येणैकुस्वरूपविकल्पाः ग्रंथांतरेकाःदुग्धा
हिनास्वकृतःसंहितायां॥अमृतास्याद्विजेषाछन्नमयिशिरःकिलासुरस्येदं॥प्रा
णैरपरित्यक्तंग्रहतांयातंवदंत्येके॥इंद्रर्कमंडलाकृतिरसितत्वात्किलनदृश्यते॥
गमनेअन्यत्रपर्वकालात्वरप्रदानात्कमळयोनेः॥सुखशुक्रविभक्तोगंभुजंगमाका

रमुपरिष्टांत्यन्येइति॥भुजंगमाकारकथनात्फणीत्यभिधानंप्रसिद्धं॥रत्नमाळा
यामपि॥फणिभाद्विजोन्निकाळेस्फुटमिति॥तथाचगमांतरे॥एकुर्भादृष्टमंजा
द्विजोन्निपरिवर्जयेदिति॥अथधान्यछेदनमाह॥तछेदनंवापभैरिति॥तेषां
धान्यानांछेदनंतछेदनंवापभैर्बीजवापनक्षत्रैःप्रोक्तं॥ननुयस्यांगंयद्दोगि
नोगदितमेकुर्यादिति॥उरेप्रोक्तंतत्कथंपुनरुक्तंतछेदनंवापभैरितिसत्यं।कु
यिनक्षत्राणांबीजवापनक्षत्राणांचकिंचिद्भेदोस्ति॥द्वयोःकुप्यंगत्वात्तैःकार्य
मितिसदेहनिवारणार्थंतछेदनंवापभैरित्युक्तं॥॥अथनिष्पन्नधान्येक्रम
प्राप्तंमेथीरेपणंवृत्तचरणेनाह॥॥मेथींक्षीरतरोरुफानुरहितैरुद्वाहभेरेपयेत्त
माक्षनवहसंतरारदोःप्रोक्तंनवान्नंबुधैः॥मैत्राऽर्कात्यवसुत्तरेज्यवरुणैःसे द्वैः

शुभंनक्षत्रंलग्नेशेगुरुवीक्षितेहिवुकगेःसोम्येश्वसंगीतकं॥७॥ ॥मेथीमिति
क्षीरतरेवटिल्लक्षादेर्मेथीरुहाहवैर्विवाहनक्षत्रैःमूलत्वार्केत्वादि।निरोपये
त्॥निखनेत्॥मेथीनामखलेधान्यमर्दनार्थंवृषपंक्तियोजनार्थंकाष्ठमारोप्य
ते॥मेथ्यंतेसंगम्यंतेवृषभाअस्मिन्नितिमेथिः॥वंसिमेथिःखलेन्यस्तंदारु
यत्पशुबंधनं।इत्यमरः॥किंलक्षणैरुहाहवैः॥नुफानुरहितेःउफा।उत्तरफा
ल्गुनीअनुः।अनुराधाभ्यांरहितैः॥उक्तंच॥रोहिणीरेवतीमूलस्वातीह
स्तोमृगास्तथा॥आषाढोत्तरहस्ततथाभाद्रपदामताः॥बंधनेसर्वबीजानांत
थाशाळप्रवेशने॥उःखदावतेदाचैवानुराधोत्तरफाल्गुनी॥वटश्चसप्तपर्ण
श्चभंगारीशाल्मलीतथा॥औडुंबरीतथाधात्रीयाचान्याक्षीरवाहिनी॥स्त्रीनाम्नी ५५४

कर्षकैर्नित्यंमेथिकार्यफलप्रदेति॥ ॥अथनवधान्यप्रसंगेननवान्नकर्मद्वि
तीयचरणेनाह॥ ॥अन्नप्राशनमैरिति।वसंतशरदोःऋत्वोःअन्नप्राशन
मैन्नवान्नंनवान्नंकर्मबुधैःप्रोक्तं।अन्नप्राशनमैरित्युपलक्षणं॥तस्माद न्न
प्राशनोक्तंतिथिवारादिकमत्रग्राह्यं।सामिकस्तुनवान्नकर्मणाविनाव्रीह्या
दीनांनवनवमितानामक्षणेदोषप्रसंगादवश्यंकंकर्मतत्॥नवधान्यानिमा
नि।व्रीहयोनवगोधूमानीवाराःकंगुवैणवः॥शालयोमुद्गमोराश्चनवनाघा
न्नवानिस्मृति॥एषांमध्येसरत्संभवानिधान्यानिव्रीह्याग्रयणेनविनाभक्ष
णीयानि।वसंतसंभवानियवाग्रयणेनविनाभक्षणीयानि॥ ॥इतिनियमा
दिकंकर्मशरदृतौक्रियते॥तत्अन्नप्राशनोदितैस्तिथिभादिभिःमासेप

षष्ठमेवेत्यत्रोक्तैःनवान्नंकर्त्तव्यमित्यर्थः॥ ॥अथोत्तरार्द्धेनृत्यसंगीतयोरं
भमाह॥ ॥मैत्रार्कहस्त्यश्विनीपुष्यश्रवणपुनर्वसुमृगशिरोरेवतीषु नृत्यसंगीतकं
कारयेत्॥ मैत्रेत्यादि॥ मैत्रमनुराधा॥अर्कोहस्तः॥अश्विरेवती॥वसवो धनिष्ठा॥
उत्तरास्तिस्रः॥इज्यः पुष्यः॥वरुणः शततारका॥इंद्राग्नी ज्येष्ठा॥तैर्नक्षत्रैर्नृत्यं
रभेत॥संगीतकंचारभेत॥कस्मिन्सति॥लग्नवर्त्तमानेशुक्रगुरुवीक्षितेसति॥
कैःहिबुकःगसौम्यैःचतुरस्रैःनक्षितैःसौम्यैःशुभैःप्राग्वत्॥अथनानापशूनां
